लघुकौमुदीव्याकरणम् ।

श्रीवरदराज कृतम् ।

पण्डितकुलपतिना

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृतं प्रकाशितञ्च ।

चतुर्थसंस्करणम् ।

कलिकातानगर्य्याम्

गोवर्द्धनयन्त्रे मुद्रितम् ।

इं १८७६ ।

सूचीपत्रम् ।

विषयः ।	पृष्ठाङ्कः ।	विषयः ।	पृष्ठाङ्कः ।
संज्ञाप्रकरणम्	१	सन्नन्ताः	११८
अच्सन्धिः	४	यङन्ताः	१२०
हल्सन्धिः	१०	यङ्लुगन्ताः	१२१
विसर्गसन्धिः	१६	नामधातवः	१२२
अजन्तपुंलिङ्गाः	१८	कण्ड्वादयः	१२४
अजन्तस्त्रीलिङ्गाः	३३	आत्मनेपदप्रक्रिया	१२४
अजन्तनपुंसकलिङ्गाः	३६	परस्मैपदप्रक्रिया	१२६
हलन्तपुंलिङ्गाः	३८	भावकर्म्मप्रक्रिया	१२६
हलन्तस्त्रीलिङ्गाः	५५	कर्म्मकर्त्तृप्रक्रिया	१२
हलन्तनपुंसकलिङ्गाः	५६	लकारार्थप्रक्रिया	१२
अव्ययानि	५७	कृदन्तप्रक्रिया	१३
भ्वादयः	५८	उणादयः	१३
अदादयः	८७	कारकप्रकरणम्	१४५
जुहोत्यादयः	८६	समासप्रकरणम्	१४७
दिवादयः	१००	अव्ययीभावः	१४८
स्वादयः	१०४	तत्पुरुषः	१५१
तुदादयः	१०५	बहुव्रीहिः	१५७
रुधादयः	११०	द्वन्द्वः	१६०
तनादयः	११२	समासान्ताः	१६१
क्र्यादयः	११४	तद्धिताः	१६१
चुरादयः	११७	स्त्रीप्रत्ययाः	१८०
ण्यन्ताः	११८		

इति सूचीपत्रम् ।

लघुकौमुदीव्याकरणम् ।

नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम् ।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥

अथ संज्ञाप्रकरणम् ।

अ इ उ ण् ॥ १ ॥ ऋ ऌ क् ॥ २ ॥ ए ओ ङ् ॥ ३ ॥ ऐ औ च् ॥ ४ ॥
ह य व र ट् ॥ ५ ॥ ल ण् ॥ ६ ॥ ञ म ङ ण न म् ॥ ७ ॥
झ भ ञ् ॥ ८ ॥ घ ढ ध ष् ॥ ९ ॥ ज ब ग ड द श् ॥ १० ॥
ख फ छ ठ थ च ट त व् ॥ ११ ॥ क प य् ॥ १२ ॥ श ष स र् ॥ १३ ॥ ह ल् ॥ १४ ॥

इति १४श माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानि ।

एषामन्त्या इतः । हकारादिषु अकार उच्चारणार्थः । लण् मध्ये वित्संज्ञकः ।

हलन्त्यम् । १ । ३ । ३ ॥

उपदेशेऽन्त्यं हल् इत् स्यात् । उपदेश आद्योच्चारणम् । सूत्रेषु अदृष्टसम्पदं सूत्रान्तरात् अनुवर्त्तनीयं सर्वत्र ॥

अदर्शनं लोपः । १ । १ । ६० ॥

प्रसक्तस्य अदर्शनं लोपसंज्ञं स्यात् ॥

तस्य लोपः । १ । ३ । ९ ॥

तस्येतो लोपः स्यात् णादयोऽणाद्यर्थाः ॥

आदिरन्त्येन सहेता । १ । १ । ७१ ॥

अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् । यथाऽणिति अ इ उ वर्णानां संज्ञा । एवमच् हल् अल् इत्यादयः ।

ऊकालोऽज्झ्रस्वदीर्घप्लुतः । १ । २ । २७ ॥

उश्च ऊश्च उ३श्च वः वाङ्काल इव कालो यस्य सोऽच् क्रमात् झ्रस्वदीर्घप्लुतसंज्ञः स्यात् । न प्रत्येकमुदात्तादिभेदेन त्रिधा ॥

उच्चैरुदात्तः । १ । २ । २९ ॥

नीचैरनुदात्तः । १ । २ । ३० ।

समाहारः स्वरितः । १ । २ । ३१ ॥

स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा ॥

मुखनासिकावचनोऽनुनासिकः । १ । २ । ८ ॥

मुखसहितनासिकयोच्चार्यमाणो वर्णो ऽनुनासिकसंज्ञः स्यात् । तदित्थम् । अ इ उ ऋ ऌ एषां वर्णानां प्रत्येकमष्टादश भेदाः । ऌवर्णस्य द्वादश तस्य दीर्घाऽभावात् । एचामपि द्वादश तेषां झ्रस्वाऽभावात् ॥

तुल्यास्यप्रयत्नं सवर्णम् । १ । १ । ९ ॥

ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ॥

ऋल्वर्णयोर्मिथः सावर्ण्यं वाच्यम् ॥

अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । ऌतुलसानान्दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठौष्ठम् । वकारस्य दन्तौष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य ।

प्रयत्नो द्विधा । आभ्यन्तरो बाह्यश्च । आद्यः पञ्चधा । स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयत्नं स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानाम् । ईषद्विवृतमूष्मणाम् । विवृतं स्वराणाम् । ऋऋऋऽवर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायान्तु विवृतमेव । बाह्यास्त्वेकादशधा । विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति । खरो विवाराः श्वासा अघोषाश्च । हशः संवारा नादा घोषाश्च । वर्गाणामाद्यतृतीयपञ्चमा यणश्चाऽल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः । कादयो मावसानाः स्पर्शाः । यणोऽन्तस्थाः । शल ऊष्माणः । अचः स्वराः । ⌒क⌒ख इति कखाभ्यां प्रागर्द्धविसर्गसदृशो जिह्वामूलीयः । ⌒प⌒फ इति पफाभ्यां प्रागर्द्धविसर्गसदृश उपध्मानीयः । अं अः इत्यचः परावनुस्वारविसर्गौ ।

अणुदित्सवर्णस्य चाप्रत्ययः । १ । १ । ६९ ॥

अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् । अत्रैवाण् परेण णकारेण । कु चु टु तु पु एते उदितः । तदेवम् इत्यष्टादशानां संज्ञा । तथेकारोकारौ । ऋकारस्त्रिंशतः । एवं ऌकारोऽपि । एचो द्वादशानाम् । अनुनासिकाननुनासिकभेदेन यवला द्विधा । तेनाऽनुनासिकाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा ।

परः सन्निकर्षः संहिता । १ । १ । १०९ ॥

वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ।

हलोऽनन्तराः संयोगः । १ । १ । ७ ॥

अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ।

सुप्तिङन्तं पदम् । १ । ४ । १४ ॥

सुबन्तन्तिङन्तञ्च पदसंज्ञं स्यात् ।

इति संज्ञाप्रकरणम् ।

अथ अच्सन्धिः ।

इको यणचि । ६ । १ । ७७ ॥

इकः स्थाने यण् स्यादचि संहितायां विषये । सुधी उपास्य इति स्थिते ।

तस्मिन्निति निर्दिष्टे पूर्वस्य । १ । १ । ६६ ॥

सप्तमीनिर्देशेन विधीयमानं कार्य्यं वर्णान्तरेणाऽव्यवहितस्य पूर्वस्य बोध्यम् ।

स्थानेऽन्तरतमः । १ । १ । ५० ॥

प्रसङ्गे सति सदृशतम आदेशः स्यात् । सु ध् य् उपास्य इति जाते ।

अनचि च । ८ । ४ । ४७ ॥

अचः परस्य यरो द्वे वा स्तो न त्वचि ।

झलाञ्जशोऽन्ते । ८ । ४ । ५३ ॥

स्पष्टम् । इति धकारस्य दकारः ।

संयोगान्तस्य लोपः । ८ । २ । २३ ॥

संयोगान्तं यत् पदन्तदन्तस्य लोपः स्यात् ।

अलोऽन्त्यस्य । १ । १ । ५२ ॥

षष्ठीनिर्दिष्टस्यान्त्यस्यादेशः स्यात् । इति प्राप्ते ।

यणः प्रतिषेधो वाच्यः । सुद्युपास्यः । मद्धरिः ।

धात्रंशः । लाङ्गतिः ।

एचोऽयवायावः । ६ । १ । ७८ ॥

एचः क्रमादय् अव् आय् आव् एते स्युरचि ।

यथासंख्यमनुदेशः समानाम् । १ । ३ । १० ॥

समसम्बन्धी विधिर्यथासंख्यं स्यात् । हरये । विष्णवे । नायकः । पावकः । गोपयसोर्यत् ।

वान्तो यि प्रत्यये । ६ । १ । ७९ ॥

यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः । गव्यम् । नाव्यम् ।

अध्वपरिमाणे च । गव्यूतिः ।

अदेङ्गुणः । १ । १ । २ ॥

अत् एङ् च गुणसंज्ञः स्यात् ।

तपरस्तत्कालस्य । १ । १ । ७० ॥

तः परो यस्मात् स च तात्परश्चोच्चार्यमाणः समकालस्यैव संज्ञा स्यात् ।

आद्गुणः । ६ । १ । ८७ ॥

अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् । उपेन्द्रः । गङ्गोदकम् ।

उपदेशेऽजनुनासिक इत् । १ । ३ । २ ॥

उपदेशे ऽनुनासिको ऽजित्संज्ञः स्यात् । प्रतिज्ञानुनासिक्याः पाणिनीयाः । लण् सूत्रस्था ऽवर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा ।

उरण् रपरः । १ । १ । ५१ ॥

ऋ इति त्रिंशत: संज्ञेत्युक्तन्तत्स्थाने योऽण् स रपर: सन्नेव प्रवर्त्तते । क्रष्णर्द्धि: । तवल्कार: ।

लोप: शाकल्यस्य । ८ । ३ । १९ ॥

अवर्णपूर्वयो: पदान्तयोर्य्यवयोर्वा लोपो ऽशि परे ।

पूर्वत्रासिद्धम् । ८ । २ । १ ॥

सपादसप्ताध्यायीम्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वम्रति परं शास्त्रमसिद्धम् । हर इह । हरयिह । विष्ण इह । विष्णविह ।

वृद्धिरादैच् । १ । १ । १ ॥

आदैच्च वृद्धिसंज्ञ: स्यात् ।

वृद्धिरेचि । ६ । १ । ८८ ॥

आदेचि परे वृद्धिरेकादेश: स्यात् । गुणापवाद: । क्रष्णैकत्वम् । गङ्गौघ: । देवैश्वर्य्यम् । क्रष्णौत्कण्ठ्यम् ।

एत्येधत्यूठ्सु । ६ । १ । ८९ ॥

अवर्णादेजाद्योरेत्ये धत्योरूठि च परे वृद्धिरेकादेश: स्यात् । उपैति । उपैधते । प्रष्ठौह: । एजाद्यो: किम् ? उपेत: । मां भवान् प्रेदिधत् ।

अक्षादूहिण्यामुपसंख्यानम् । अक्षौहिणी सेना ।

प्रादूहोढ्योढ्येषेष्येषु । प्रौह: । प्रौढ: । प्रौढि: । प्रैष: । प्रैष्य: ।

ऋते च तृतीयासमासे । सुखेन ऋत: सुखार्त्त: । तृतीयेति किम् ? परमर्त्त: ।

प्रवत्सतरकम्बलवसनार्णदशानामृणे । प्रार्णम् । वत्सतरार्णम् । इत्यादि ।

उपसर्गाः क्रियायोगे । १ । ४ । ५९ ॥

प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः ।

प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । वि । आङ् । नि । अधि । अपि । अति । सु । उत् । अभि । प्रति । परि । उप । एते प्रादयः ।

भूवादयो धातवः । १ । ३ । १ ॥

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।

उपसर्गादृति धातौ । ६ । १ । ९१ ॥

अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् । प्रार्च्छति ।

एङि पररूपम् । ६ । १ । ९४ ॥

आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात् । प्रेजते । उपोषति ।

अचोऽन्त्यादि टिः । १ । १ । ६४ ॥

अचामध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् । शकन्ध्वादिषु पररूपं वाच्यम् । तच्च टेः । शकन्धुः । कर्क्कन्धुः । मनीषा । लाङ्गलीषा । आकृतिगणोऽयम् । मार्त्तण्डः ।

ओमाङोश्च । ६ । १ । ९५ ॥

ओमि आङि चात्परे पररूपमेकादेशः स्यात् । शिवायोन्नमः । शिव-एहि, शिवेहि ।

अकः सवर्णे दीर्घः । ६ । १ । १०१ ॥

अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात् । दैत्यारिः । श्रीशः । विष्णूदयः । होतृकारः ।

एङः पदान्तादति । ६ । १ । १०९ ॥

पदान्तादेङो ऽति परे पूर्वरूपमेकादेशः स्यात् । हरे ऽव । विष्णो ऽव ।

सर्वत्र विभाषा गोः । ६ । १ । १२२ ॥

लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः स्यात् पदान्ते । गो अग्रम् । गोऽग्रम् । एङन्तस्य किम् ? चित्रग्वग्रम् । पदान्ते किम् ? गोः ।

अनेकाल् शित् सर्वस्य । १ । १ । ५५ ॥

इति प्राप्ते ।

ङिच्च । १ । ५३ ॥

ङिदनेकालप्यन्त्यस्यैव स्यात् ।

अवङ् स्फोटायनस्य । ६ । १ । १२३ ॥

पदान्ते एङन्तस्य गोरवङ् वाचि । गोऽग्रम् । गवाग्रम् । पदान्ते किम् ? गवि ।

इन्द्रे च । ६ । १ । १२४ ॥

गोरवङ् स्यादिन्द्रे । गवेन्द्रः ।

दूराद्धूते च । ८ । २ । ८४ ॥

दूरात् सम्बोधने वाक्यस्य टेः प्लुतो वा ।

प्लुतप्रगृह्या अचि नित्यम् । ६ । १ । १२५ ॥

एते ऽचि प्रकृत्या स्युः । आगच्छ कृष्ण ३ अत्र गौश्चरति ।

ईदूदेद् द्विवचनं प्रगृह्यम् । १ । १ । ११ ॥

ईदूदेदन्तं द्विवचनम्प्रगृह्यं स्यात् । हरी एतौ विष्णू इमौ । गङ्गे अमू ।

अदसो मात् । १ । १ । १२ ॥

अस्मात्परावीदूतौ प्रगृह्यौ स्तः । अमी ईशाः । रामकृष्णावमू आसाते । माल्किम् ? अमुकेऽत्र ।

चादयोऽसत्वे । १ । ४ । ५७ ॥

अद्रव्यार्थाश्चादयो निपाताः स्युः ।

प्रादयः ॥ १ ॥ ४ ॥ ५८ ॥

एतेऽपि तथा ।

निपात एकाजनाङ् । १ । १ । १४ ॥

एकोऽज् निपात आङ्वर्ज्यः प्रगृह्यः । इ इन्द्रः । उ उमेशः । वाक्यस्मरणयोरडित् । आ एवन्नु मन्यसे । आ एवङ्किल तत् । अन्यत्र ङित् । ईषदुष्णम् । ओष्णम् ।

ओत् । १ । १ । १५ ॥

ओदन्तो निपातः प्रगृह्यः स्यात् । अहो ईशाः ।

सम्बुद्धौ शाकल्यस्येतावनार्षे । १ । १ । १६ ॥

सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्यो ऽवैदिके इतौ परे । विष्णो इति । विष्ण इति । विष्णविति ।

मय उञो वो वा । ८ । ३ । ३३ ॥

मयः परस्य, उञो वो वा अचि । किम्बुक्तम् । किमु उक्तम् ।

इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च । ६ । १ । १२७ ॥

पदान्ता इको ह्रस्वो वा स्युरसवर्णे ऽचि । ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः । चक्रि अत्र चक्रयत्र । पदान्ता इति किम् ? गौर्यौ ।

अचो रहाभ्यां द्वे । ८ । ४ । ४६ ॥

अचः पराभ्यां रेफहकाराभ्यामुत्तरस्य यरो द्वे वा स्तः । गौर्य्यौ । न समासे । वाप्यश्वः ।

ऋत्यकः । ६ । १ । १२८ ॥

ऋति परे पदान्ता अकः प्राग्वत् वा । ब्रह्म ऋषिः । ब्रह्मा ऋषिः । ब्रह्मर्षिः । पदान्ताः किम् ? आर्च्छत् ।

इति स्वरसन्धिः ।

अथ हल्सन्धिः ।

स्तो श्चुना श्चुः । ८ । ४ । ४० ॥

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । रामश्शेते । रामश्चिनोति । सच्चित् । शार्ङ्गिञ्जय ।

शात् । ८ । ४ । ४४ ॥

शात्परस्य तवर्गस्य चुत्वं न स्यात् । विश्नः । प्रश्नः ।

ष्टुना ष्टुः । ८ । ४ । ४१ ॥

स्तोः ष्टुना योगे ष्टुः । रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे ।

नपदान्ताट्टोरनाम् । ८ । ४ । ४२ ॥

पदान्ताट्टवर्गात्परस्याऽनामः स्तोष्टुर्न स्यात् । षट् सन्त । षट् ते । पदान्तात्किम् ? ईट्टे । टोः किम् ? सर्पिष्टमम् ।

अनाम्नवतिनगरीणामिति वाच्यम् । षण्णाम् । षण्णवतिः । षण्णगर्य्यः ।

तोः षि। ८। ४। ४३॥

तवर्गस्य षकारे परे न ष्टुत्वम्। सन् षष्ठः।

झलाञ्जशोऽन्ते। ८। २। ३९॥

पदान्ते झलाञ्जशः स्युः। वागीशः।

यरोऽनुनासिकेऽनुनासिको वा। ८। ४। ४५॥

यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्।

एतन्मुरारिः। एतद्मुरारिः।

प्रत्यये भाषायान्नित्यम्। तन्मात्रम्। चिन्मयम्।

तोर्लि। ८। ४। ६०॥

तवर्गस्य लकारे परे परसवर्णः स्यात्। तल्लयः। विद्वांल्लिखति। नस्याऽनुनासिको लः।

उदः स्थास्तम्भोः पूर्वस्य। ८। ४। ६१॥

उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्।

तस्मादित्युत्तरस्य। १। १। १६७॥

पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाऽव्यवहितस्य परस्य ज्ञेयम्।

आदेः परस्य। १। १। ५४॥

परस्य यदिहितं तत्तस्यादेर्बोध्यम्। इति सस्य षः।

झरो झरि सवर्णे। ८। ४। ६५॥

हलः परस्य झरो वा लोपः सवर्णे झरि।

खरि च। ८। ४। ५५॥

खरि झलाञ्चरः स्युः इत्युदो दस्य तः। उत्थानम्। उत्तम्भनम्।

झयो होऽन्यतरस्याम्। ८। ४। ६२।

झयः परस्य हस्य पूर्वसवर्णः वा स्यात्। नादस्य घोषस्य संवारस्य महाप्राणस्य हस्य तादृशो वर्गचतुर्थः एव आदेशः। वाग्घरिः। वाग्हरिः।

शश्छोऽटि। ८। ४। ६३॥

झयः परस्य शस्य छो वा स्यात् अटि। तद् शिव इत्यत्र दस्य चुत्वेन जकारे कृते खरि चेति जकारस्य चकारः। तच्छिवः। तद् शिवः।

छत्वममीति वाच्यम्। तच्छ्लोकेन।

मोऽनुस्वारः। ८। ३। २३॥

मान्तस्य पदस्यानुस्वारः स्यात् हलि। हरिं वन्दे।

नश्चापदान्तस्य झलि। ८। ३। २४॥

नस्य मस्य चापदान्तस्य झलि अनुस्वारः। यशांसि। आक्रंस्यते। झलि किं? मन्यसे।

अनुस्वारस्य ययि परसवर्णः। ८। ४। ५८॥

शान्तः।

वा पदान्तस्य। ८। ४। ५९॥

पदान्तस्य अनुस्वारस्य ययि परे परसवर्णो वा स्यात्। त्वङ्करोषि। त्वं करोषि।

मो राजि समः क्वौ। ८। ३। २५॥

क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट्।

हे मपरे वा। ८। ३। २६॥

मपरे हकारे परे मस्य मः वा स्यात्। किम् ह्लयति। किं ह्लयति।

यवलपरे यवला वा। किंय्ह्यः किंह्यः। किंव्ह्लयति। किं ह्लयति। किंल्ह्लादयति। किंह्लादयति।

न परे नः। ८। ३। २७॥

नपरे हकारे मस्य नः स्यात् वा। किन्ह्नुते किं ह्नुते।

डः सि धुट्। ८। ३। २९॥

डात् परस्य सस्य धुड्वा स्यात्।

आद्यन्तौ टकितौ। १। १। ४६॥

टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तौ अवयवौ स्तः। षट्सन्तः। षट्त्सन्तः।

ङ्णोः कुक्टुक् शरि। ८। ३। २८॥

ङकारणकारयोः कुक् टुकौ आगमौ वा स्तः शरि परे। प्राङ्षष्ठः प्राङ्ख्षष्ठः प्राङ्क्षष्ठः। सुगण्षष्ठः। सुगण्ट्षष्ठः। सुगण्ट्ष्षष्ठः।

नश्च। ८। ३। ३०॥

नकारान्तात् परस्य सस्य धुड्वा स्यात्। सनत्सः। सन्सः।

शि तुक्। ८। ३। ३१॥

पदान्तस्य नस्य शे परे तुग् वा स्यात्। सञ्छ्रुभुः सञ्च्छ्रुभुः। सञ्श्रुभुः। सञ् श्रुभुः।

ङमो ह्रस्वादचि ङमुण् नित्यम्। ८। ३। ३२॥

ह्रस्वात् परो यो ङम् ण् पदं तस्मात् परस्याचो

नित्यं ङमुट् आगमः स्यात् । प्रत्यङ्ङात्मा । सुगस्कोशः । सन्नच्युतः ।

समः सुटि ॥ ८ ॥ ३ ॥ ५ ॥

समो रुः स्यात् सुटि ।

अलानुनासिकः पूर्वस्य तु वा । ८ । ३ । २ ॥

अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् ।

अनुनासिकात् परोऽनुस्वारः । ८ । ३ । ४ ॥

अनुनासिकं विहाय रोः पूर्वस्मात् परोऽनुस्वारागमः स्यात् ।

खरवसानयोर्विसर्जनीयः । ८ । ३ । १५ ॥

खरि अवसाने च पदान्तस्य रस्य विसर्गः स्यात् ।
सम्मुङ्गानां सो वक्तव्यः । संस्कर्त्ता । सँस्कर्त्ता ।

पुमः खय्यम्परे । ८ । ३ । ६ ॥

अम्परे खयि पुमश्शब्दस्य रुः स्यात् । पुँस्कोकिलः । पुंस्कोकिलः । पुँस्पुत्रः पुंस्पुत्रः । अम्परे किं ? पुंश्चीरम् । खयि किं ? पुंदासः । व्याजादेशे न । पुंव्यानम् ।

नश्छव्यप्रशान् । ८ । ३ । ७ ॥

अम्परे छवि नकारान्तस्य पदस्य रुः स्यात् । नतु प्रशान्-शब्दस्य ।

विसर्जनीयस्य सः । ८ । ३ । ३४ ॥

खरि विसर्जनीयस्य सः स्यात् । चक्रिंस्त्रायस्व । चक्रिंस्त्रायस्व । अप्रशान् किम् ? प्रशान्तनोति । पदस्येति किम् ? हन्ति । अम्परे किम् ? सन् त्सरुः ।

नॄन् पे । ८ । ३ । १० ॥

नॄनित्यस्य रुः स्यात् वा पकारे परे ।

कुप्वोः ≀क ≀पौ च । ८ । ३ । ३७ ॥

कवर्गे पवर्गे च परे विसर्गस्य क्रमात् ≀क ≀पौ जिह्वामूलीयोपाध्मानीयौ स्तः । चाद्विसर्गः । नॄ≀पाहि । नॄं≀पाहि । नॄः पाहि । नॄः पाहि नॄन् पाहि ।

तस्य परमाम्रेडितम् । ८ । १ । २ ॥

द्विरुक्तस्य परमाम्रेडितं स्यात् ।

कानाम्रेडिते । ८ । ३ । १२ ॥

कान्नकारस्य रुः स्यात् आम्रेडिते परे । कांस्कान् । कांस्कान् ।

छे च । ६ । १ । ७३ ॥

ह्रस्वस्य छे परे तुक् आगमः स्यात् संहितायाम् । शिवच्छाया ।

पदान्ताद्वा । ६ । १ । ७६ ॥

दीर्घात् पदान्तात् छे परे तुग् वा । लक्ष्मीछाया । लक्ष्मीच्छाया ।

इति हल्सन्धिः ।

अथ विसर्गसन्धिः ।

विसर्जनीयस्य सः । ८ । ३ । ३४ ॥

विसर्जनीयस्य सः स्यात् खरि परे । विष्णुस्त्राता ।

वा शरि । ८ । ३ । ३६ ॥

शरि परे विसर्गस्य विसर्गो वा स्यात् । हरिः शेते हरिश्शेते ।

समजुषो रुः । ८ । २ । ६६ ॥

पदान्तस्य सस्य सजुषशब्दस्य च रुः स्यात् ।

अतो रोरप्लुतादप्लुते । ६ । १ । ११३ ॥

अप्लुतादतः परस्य रो रुः स्यादप्लुतेऽति । शिवोऽर्च्यः ।

हशि च । ६ । १ । ११४ ॥

अप्लुतादतः परस्य रो रुत् स्यात् हशि । शिवोवन्द्यः ।

भो भगो अघो अवर्णपूर्वस्य योऽशि ।८।३।१७॥

एतत्पूर्वस्य रो यादेशः स्यात् अशि । देवा इह । देवायिह अशि किम् ? देवाः सन्ति । भोस् भगोस् अघोस् इति सकारान्ता निपाताः । तेषां रोर्य्यत्वे कृते ।

हलि सर्वेषाम् । ८ । ३ । २२ ॥

भोभगो अघो अपूर्वस्य लघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन । भो देवाः । भो लक्ष्मि । भोविद्वन्द्व भगो नमस्ते । अघो याहि । देवा नद्याः । देवा यान्ति । हलि कम् ? । देवायिह ।

रोऽसुपि । ८ । २ । ६९ ॥

अह्नो रेफादेशः स्यात् नतु सुपि। अहरहः। अहर्गणः। असुपि किम्? अहोभ्याम्।

रोरि। ८। ३। १४॥

रेफस्य रेफे परे लोपः स्यात्।

ढ्रलोपे पूर्वस्य दीर्घोऽणः। ६। ३। १११॥

ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः। पुनारमते। हरीरम्यः। श्रीभू राजते। अणः किम्?। लृढ़ः लृढ़ः मनस् रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रो रीतिलोपे च प्राप्ते।

विप्रतिषेधे परं कार्य्यम्। १। ४। २॥

तुल्यबलविरोधे परं कार्यं स्यात्। इति लोपे प्राप्ते पूर्वत्रासिद्धम् इति रोरीत्यस्यासिद्धत्वादुत्वमेव। मनोरथः।

एतत्तदोः सुलोपोऽकोरनञ्समासे हलि। ६। १। १३२॥

अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्यात् हलि नतु नञ् समासे। एष विष्णुः। स श्रीभुः। अकोः किम्?। एषको रुद्रः। अनञ् समासे किम्?। असः शिवः। हलि किम्? एषोऽत्र।

सोऽचि लोपे चेत् पादपूरणम्। ६। १। १३४॥

स इत्यस्य सोर्लोपः स्यादचि पादस्येल्लोपे सत्येव पूर्य्येत। सेमामविड्ढि प्रभृतिम्। सैष दाशरथी रामः।

इति विसर्गसन्धिः।

अथ अजन्तपुंलिङ्गाः ।

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । १ । २ ।४५॥

धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् ।

कृत्तद्धितसमासाश्च । १ । २ । ४६ ॥

कृत्तद्धितान्तौ समासश्च प्रातिपदिकसंज्ञाः स्युः ।

स्वौजसमौट् छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसि-भ्याम्भ्यस्ङसोसाम्ङ्योस् सुप् । ४ । १ । २ ॥

सु औ जस् इति प्रथमा । अम् औट् शस् इति द्वितीया । टा भ्याम् भिस् इति तृतीया । ङे भ्याम् भ्यस् इति चतुर्थी । ङसि भ्याम् भ्यस् इति पञ्चमी । ङस् ओस् आम् इति षष्ठी । ङि ओस् सुप् इति सप्तमी ।

ङ्याप् प्रातिपदिकात् । ४ । १ । १ ॥

प्रत्ययः । ३ । १ । १ ॥

परश्च । ३ । १ । २ ॥

इत्यधिकृत्य ङ्यन्तादावन्तात् प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः ।

सुपः । १ । ४ । १०३ ॥

सुपस्त्रीणि त्रीणि वचनान्येकशः एकवचन-द्विवचनबहु-वचनसंज्ञानि स्युः ।

द्व्येकयोर्द्विवचनैकवचने । १ । ४ । २२ ॥

द्वित्वैकत्वयोरेतौ स्तः ।

बहुषु बहुवचनम् । १ । ४ । २१ ॥

बहुत्वविवक्षायां बहुवचनं स्यात् ।

विरामोऽवसानम् । १ । ४ । ११० ॥

वर्णानामभावोऽवसानसंज्ञः स्यात् रुत्वविसर्गौ रामः ।

सरूपाणामेकशेष एकविभक्तौ । १ । २।६४॥

एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते ।

प्रथमयोः पूर्वसवर्णः । ६ । १ । १०२ ॥

अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् । इति प्राप्ते ।

नादिचि । ६ । १ । १०४ ॥

अवर्णादिचि न पूर्वसवर्णदीर्घः । द्वद्विरेचि रामौ ।

बहुषु बहुवचनम् । १ । ४ । २१ ॥

चुटू । १ । ३ । ७ ॥

प्रत्ययादी चुटू इतौ स्तः ।

विभक्तिश्च । १ । ४ । १०४ ॥

सुप्तिङौ विभक्तिसंज्ञौ स्तः ।

न विभक्तौ तुस्माः । १ । ३ । ४ ॥

विभक्तिस्थास्तवर्गसकारमकारा इतः न स्युः । इति सकारस्य नेत्वम् । रामाः ।

एकवचनं सम्बुद्धिः । २ । ३ । ४९ ॥

सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात् ।

यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ।

१ । ४ । १३ ॥

यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परेऽङ्गसंज्ञं स्यात् ।

एङ् ह्रस्वात् सम्बुद्धेः । ६ । १ । ६९ ॥

एङन्तादह्रस्वान्ताच्चाङ्गादुत्तरस्य सम्बुद्धेर्लुप्यते सम्बुद्धेश्चेत् । हे राम । हे रामाः ।

अमि पूर्वः । ६ । १ । १०७ ॥

अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात् । रामम् । रामौ ।

लशक्वतद्धिते । १ । ३ । ८ ॥

तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः ।

तस्माच्छसो नः पुंसि । ६ । १ ।१०३ ॥

पूर्वसवर्णदीर्घात्परो यः शसः सकारः तस्य नः स्यात् पुंसि ।

अट्कुप्वाङ्नुम्व्यवायेऽपि । ८ । ४ । २

अट् कवर्गः पवर्गः आङ् नुम् च एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः । समानपदे इति प्राप्ते ।

पदान्तस्य । ८ । ४ । ३७ ॥

पदान्तस्य नस्य णत्वं न स्यात् । रामान् ।

टाङसिङसामिनात् स्याः। ७। १। १२॥

अदन्ताट्टादीनामिनादयः स्युः। णत्वम् रामेण।

सुपि च। ७। ३। १०२॥

यञादौ सुपि अतोऽङ्गस्य दीर्घः। रामाभ्याम्॥

अतो भिस ऐस्। ७। १। ९॥

अकारान्तादङ्गात् भिस ऐस् स्यात्। अनेकाल्शित् सर्वस्य। रामैः।

ङेर्यः। ७। १। १३॥

अतोऽङ्गात्परस्य ङे इत्यस्य यादेशः स्यात्।

स्थानिवदादेशोऽनल्विधौ। १। १। ५६॥

आदेशः स्थानिवत् स्याद्वतु स्थान्यलाश्रयविधौ। इति स्थानिवत्त्वात् सुपि चेति दीर्घः। रामाय। रामाभ्याम्।

बहुवचने झल्येत्। ७। ३। १०३॥

झलादौ बहुवचने सुपि परे अतोऽङ्गस्य एकारः स्यात्। रामेभ्यः। बहुवचने किम्? रामः रामस्य। झलि किम्? रामाणम्। सुपि किम्। पचध्वम्।

वावसाने। ८। ४। ५६॥

अवसाने झलाश्चरो वा स्युः। रामात्। रामाद्। रामाभ्याम्। रामेभ्यः। रामस्य।

ओसि च। ७। ३। १०४॥

ओसि परे अतोऽङ्गस्य एकारः स्यात्। रामयोः।

ह्रस्वनद्यापो नुट् । ७ । १ । ५४ ॥

ह्रस्वान्तात् नद्यन्तादाबन्ताच्चाङ्गात्परस्याऽऽमो नुडागमः स्यात् ।

नामि । ६ । ४ । ३ ।

नामि परे अजन्ताङ्गस्य दीर्घः स्यात् । रामाणाम् । रामे । रामयोः । सुपि एत्वे कृते ।

आदेशप्रत्यययोः । ८ । ३ । ५९ ॥

इण्कुभ्याम्परस्यापदान्तस्यादेशस्य प्रत्ययावयवस्य च यः सकारस्तस्य मूर्धन्यादेशः स्यात् । ईषद्विवृतस्य तादृश एव षः । रामेषु । एवं कृष्णादयोऽप्यदन्ताः ।

सर्वादीनि सर्वनामानि । १ । १ । २७ ॥

सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवत् किम् ।

जसःशी । ७ । १ । १७ ॥

अदन्तात् सर्वनाम्नः परस्य जसःशी स्यात् । अनेकाल्त्वात् सर्वादेशः । सर्वे ।

सर्वनाम्नः स्मै । ७ । १ । १४ ॥

अतः सर्वनाम्नो ङेः इत्यस्य स्मै स्यात् । सर्वस्मै ।

ङसिङ्योः स्मात्स्मिनौ । ७ । १ । १५ ॥

अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः । सर्वस्मात् ।

आमि सर्वनाम्नः सुट्। ७। १। ५२॥

अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्। एत्वे षत्वे। सर्वेषाम्। सर्वस्मिन्। शेषं रामवत्। एवं विश्वादयोऽप्यदन्ताः। उभशब्दो नित्यं द्विवचनान्तः। उभौ २। उभाभ्याम् ३। उभयोः २। तस्येह पाठोऽकजर्थः। डतरडतमौ प्रत्ययौ। प्रत्ययग्रहणे तदन्तग्रहणमिति तदन्ता ग्राह्याः। नेम इत्यर्धे। समः सर्वपर्यायस्तुल्यपर्यायस्तु न समानामिति ज्ञापकात्।

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। १। १। ३४॥

एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणसूत्रात्. सर्वत्र या प्राप्ता सा जसि वा। पूर्वे। पूर्वाः। असंज्ञायां किम्। उत्तराः कुरवः। स्वाभिधेयापेक्षावधिनियमो व्यवस्था। व्यवस्थायां किम्। दक्षिणा गाथकाः कुशला इत्यर्थः।

स्वमज्ञातिधनाख्यायाम्। १। १। ३५॥

ज्ञातिधनान्यवाचिनः स्वशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात्। स्वे स्वाः। आत्मीया इत्यर्थः आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः ज्ञातयोऽर्था वा।

अन्तरं बहिर्योगोपसंव्यानयोः। १। ४। ३६॥

बाह्ये परिधानीये चार्थे अन्तरशब्दस्य या प्राप्ता संज्ञा सा जसि वा स्यात्। अन्तरे अन्तरा वा गृहाः। बाह्या इत्यर्थः। अन्तरे अन्तरा वा शाटकाः। परिधानीया इत्यर्थः।

पूर्वादिभ्यो नवभ्यो वा । ७ । १ । १६ ॥

एभ्यो: ङसिङ्यो: स्मात्स्मिनौ वा स्त: । पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । एवं परादीनाम् । शेषं सर्ववत् ।

प्रथमचरमतया ऽल्पार्द्धकतिपयनेमाश्च ।१।१।३३॥

एते जसि उक्तसंज्ञा वा स्यु: । प्रथमे । प्रथमा: । तय: प्रत्यय: । द्वितये । द्वितया: । शेषं रामवत् । नेमे । नेमा: । शेषं सर्ववत् ।

तीयस्य ङित्सु वा । द्वितीयस्मै । द्वितीयाय इत्यादि । एवं तृतीय: । निर्जर: ।

जराया जरसन्यतरस्याम् । ७ । २ । १०१ ॥

जराशब्दस्य जरस् वा स्यात् अजादौ विभक्तौ । पदाङ्गाधिकारे तस्य तदन्तस्य च अनेकाल्त्वात् सर्वादेशे प्राप्ते निर्दिश्यमानस्यादेशा भवन्ति । एकदेशविकृतमनन्यवदिति जराशब्दस्य जरस् । निर्जरसौ । निर्जरस इत्यादि । पक्षे हलादौ च रामवत् । विश्वपा: ।

दीर्घाज्जसि च । ६ । १ । १०५ ॥

विश्वपौ । विश्वपा: । हे विश्वपा: । विश्वपाम् । विश्वपौ ।

सुडनपुंसकस्य । १ । १ । ४३ ॥

स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीवस्य ।

स्वादिष्वसर्वनामस्थाने । १ । ४ । १७ ॥

कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं पदं स्यात् ।

यचि भम् । १ । ४ । १८ ॥

यादिष्वजादिषु च कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वभसंज्ञं स्यात् ।

आकडारादेका संज्ञा । १ । ४ । १ ॥

इत ऊर्ङ् कड़ाराः कर्मधारये इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया । या पराऽनवकाशा च ।

आतो धातोः । ६ । ४ । १४० ॥

आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः स्यात् । अलोऽन्त्यस्य । विश्वपाः । विश्वपा । विश्वपाभ्यामित्यादि । एवं शङ्खभ्रादयः । धातोः किम् । हाहान् । हरिः । हरी ।

जसि च । ७ । ३ । १०९ ॥

ङ्ह्रस्वान्तस्याङ्गस्य गुणः स्यात् जसि परे । हरयः ।

ङ्ह्रस्वस्य गुणः । ७ । ३ । १०८ ॥

ङ्ह्रस्वस्य गुणः स्यात् सम्बुद्धौ । हे हरे । हरिम् । हरी । हरीन् ।

शेषो घ्यसखि । १ । ४ । ७ ॥

अनदीसंज्ञौ ङ्ह्रस्वौ याविवर्णोवर्णौ तदन्तं सखिवर्जं घिसंज्ञं स्यात् । शेषः किं ? मत्यै । एकसंज्ञाधिकारात् सिद्धे शेषग्रहणं स्पष्टार्थम् । ङ्ह्रस्वौ किम् ? वातप्रम्ये । यू किम् ? मात्रे ।

आङो नाऽस्त्रियाम् । ७ । ३ । १२० ॥

ङेः परस्याङो ना स्यादस्त्रियाम् । आङिति टा संज्ञा । हरिणा । अस्त्रियाम् किम् ? मत्या । हरिभ्याम् हरिभिः ।

ङेर्ङिति । ७ । ३ । १११ ॥

घिसंज्ञस्य ङिति सुपि गुणः स्यात् । हरये । ङेः किम् ?

सख्ये । ङिति किम् ? हरिभ्याम् । सुपि किम् ? पट्वी ।

ङसिङसोश्च । ६ । १ । ११० ॥

एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात् । हरेः । हर्योः । हरीणाम् ।

अच्च घेः । ७ । ३ । ११९ ॥

इदुद्भ्यामुत्तरस्य ङेरी स्यात् घेरन्तादेशश्चाकारः । हरौ । हर्योः हरिषु । एवं कव्यादयः ।

अनङ् सौ । ७ । १ । ९३ ॥

सख्युरङ्गस्यानङादेशः स्यात् असम्बुद्धौ सौ परे । ङिच्चेत्यन्तादेशः ।

अलोऽन्त्यात् पूर्व उपधा । १ । १ । ६५ ॥

अन्त्यादलः पूर्वो यो वर्णः स उपधासंज्ञः स्यात् ।

सर्वनामस्थाने चाऽसम्बुद्धौ । ६ । ४ । ८ ॥

नान्तस्योपधाया दीर्घः स्यात् असम्बुद्धौ सर्वनामस्थाने ।

अपृक्त एकाल्प्रत्ययः । १ । २ । ४१ ॥

एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् ।

हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ।६।१।६८॥

हलन्तात् परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसोरित्येतदपृक्तं हल् लुप्यते ।

न लोपः प्रातिपदिकान्तस्य । ८ । २ । ७ ॥

प्रातिपदिकसंज्ञकं यत् पदं तदन्तस्य नकारस्य लोपः स्यात् । सखा ।

सख्युरसम्बुद्धौ। ७। १। ९२॥

सख्युरङ्गात् परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत् स्यात्।

अचो ञ्णिति। ७। २। ११५॥

अजन्ताङ्गस्य वृद्धिर्ञिति णिति च परे। सखायौ। सखायः। हे सखे। सखायम्। सखायौ। सखीन्। सख्या। सख्ये।

ख्यत्यात् परस्य। ६। १। ११२॥

खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः स्यात्। सख्युः। सख्युः।

औत्। ७। ३। ११८॥

इदुद्भ्यां परस्य ङेरौत् स्यात्। सख्यौ। शेषं हरिवत्।

पतिः समास एव। १। ४। ८॥

पतिशब्दः समासे एव घिसंज्ञः स्यात्। पत्या। पत्ये। पत्युः २। पत्यौ। शेषं हरिवत्। समासे तु भूपतिना। भूपतये। कतिशब्दो नित्यं बहुवचनान्तः।

बहुगणवतुडति संख्या। १। १। २३॥

डति च। १। १। २५॥

डत्यन्ता संख्या षट् संज्ञा स्यात्।

षड्भ्यो लुक्। ७। १। २२॥

षड्भ्यः परयोः जश्शसोः लुक् स्यात्।

प्रत्ययस्य लुक्श्लुलुपः। १। १। ६१॥

लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात् तत्तत्संज्ञं स्यात्।

प्रत्ययलोपे प्रत्ययलक्षणम्। १। १। ६२॥

प्रत्यये लुप्तेऽपि तदाश्रितं कार्यं स्यात्। इति जसि चेति गुणे प्राप्ते।

न लुमताऽङ्गस्य। १। १। ६३॥

लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात्। कति २। कतिभिः। कतिभ्यः २। कतीनाम्। कतिषु। युष्मदस्मद्-षट्संज्ञकास्त्रिषु सरूपाः। त्रिशब्दो नित्यं बहुवचनान्तः। त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः २।

त्रेस्त्रयः। ७। १। ५३॥

त्रिशब्दस्य त्रयादेशः स्यात् आमि। त्रयाणाम्। गौणत्वे तु नेति केचित्। प्रियत्रीणाम्। वस्तुतस्तु प्रियत्रयाणाम्। त्रिषु।

त्यदादीनामः। ७। २। १०२॥

एषामकारोऽन्तादेशः स्यात् विभक्तौ। द्विपर्य्यन्तानामेवेष्टिः। द्वौ २। द्वाभ्याम् ३। द्वयोः २। पाति लोकमिति पपीः सूर्य्यः।

दीर्घाज्जसि च। ६। १। १०५॥

दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घः न स्यात्। पप्यौ। पप्यः। हे पपीः। पपीम्। पपीन्। पप्या। पपीभ्याम्। पपीभिः। पप्ये। पपीभ्यः २। पप्यः २। पप्योः २। दीर्घत्वान्न नुट्। पप्याम्। ङौ तु सवर्णदीर्घः। पपौ। पपीषु। एवं वात-प्रम्यादयः। बह्वयः श्रेयस्यो यस्य स बहुश्रेयसी।

यू स्त्र्याख्यौ नदी। १। ४। ३॥

ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः। प्रथमलिङ्ग-

ग्रहणञ्च । पूर्वं स्त्याख्यस्योपसर्जनत्वे ऽपि नदीत्वं वक्तव्यमित्यर्थः ।

अम्बार्थनद्योर्ह्रस्वः । ७ । ३ । १०७ ॥

अम्बार्थानां नद्यन्तानाञ्च ह्रस्वः स्यात् सम्बुद्धौ । हे बहुश्रेयसि ।

आण् नद्याः । ७ । ३ । ११२ ॥

नद्यन्तात्परेषां ङितामाडागमः स्यात् ।

आटश्च । ६ । १ । ९० ॥

आटो ऽचि परे वृद्धिरेकादेशः स्यात् । बहुश्रेयस्यै । बहुश्रेयस्याः २ । बहुश्रेयसीनाम् ।

ङेराम्नद्यामीभ्यः । ७ । ३ । ११७ ॥

नद्यन्तादावन्तान्नीशब्दात् परस्य ङेराम् स्यात् । बहुश्रेयस्याम् । शेषं पपीवत् । अद्यन्तत्वान्न सुलोपः । अतिलक्ष्मीः । शेषं बहुश्रेयसीवत् प्रधीः ।

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ । ६ । ४ । ७७ ॥

श्नु प्रत्ययान्तस्येवर्णोवर्णान्तस्य धातोर्भ्रू इत्यस्य चाङ्गस्येयङुवङौ स्तो ऽजादौ प्रत्यये परे । इतीयङि प्राप्ते ।

एरनेकाचो ऽसंयोगपूर्वस्य । ६ । ४ । ८२ ॥

धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे । प्रध्यौ२ । प्रध्यम् । प्रध्यः । प्रध्यि । शेषं पपीवत् । एवं ग्रामण्यौ । ङौ तु । ग्रामण्याम् । अनेकाचः किम् । नीः । नीयौ । नियः । अग्नि

शसि च परत्वादियङ्। नियम्। नियः। ङेराम्। नियाम्। असंयोगपूर्वस्य किम्। सुश्रियौ। यवक्रियौ।

गतिश्च। १। ४। ६०॥

प्रादयः क्रियायोगे गतिसंज्ञाः स्युः। गतिकारकेतरपूर्वपदस्य यण् नेष्यते। शुद्धधियौ।

न भूसुधियोः। ६। ४। ८५॥

एतयोरचि सुपि यण् न स्यात्। सुधियौ। सुधिय इत्यादि। सुखमिच्छतीति। सुखीः। सुतमिच्छतीति। सुतीः। सख्यौ। सुत्यौ। सुख्युः २। सुत्युः २। शेषं प्रधीवत्। शम्भुर्हरिवत्। एवं भान्वादयः।

तृज्वत्क्रोष्टुः। ३। १। ९५॥

क्रोष्टुस्तृजन्तेन तुल्यं वर्त्तते असम्बुद्धौ सर्वनामस्थाने परे। क्रोष्टुशब्दस्य क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः।

ऋतो ङि सर्वनामस्थानयोः। ७। १। ११०॥

ऋतोऽङ्गस्य गुणो ङौ सर्वनामस्थाने च इति प्राप्ते।

ऋदुशनस्पुरुदंशोऽनेहसाञ्च। ७। १। ९४॥

ऋदन्तानामुशनसादीनाञ्चानङ् स्यादसम्बुद्धौ सौ परे।

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्। ६। ४। ११॥

अबादीनामुपधाया दीर्घः स्यात् असम्बुद्धौ सर्वनामस्थाने परे। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। क्रोष्टून्।

विभाषा तृतीयादिष्वचि । ७ । १ । ९७ ॥

अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् । क्रोष्ट्रा । क्रोष्ट्रे ।

ऋत उत् । ६ । १ । १११ ॥

ऋतो ङसिङसोरति परे उदेकादेशः स्यात् । रपरत्वम् ।

रात् सस्य । ८ । २ । २४ ॥

रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य । रस्य विसर्गः । क्रोष्टुः । क्रोष्ट्रोः २ ।

नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन ।

क्रोष्टूनाम् । क्रोष्टरि । पक्षे हलादौ च शभ्रुवत् । ह्रस्वः । ह्रस्वौ । ह्रस्वाः । ह्रस्वम् । इत्यादि । अतिचमूशब्दे तु नदीकार्य्यं विशेषः । हे अतिचमु । अतिचम्वै । अतिचम्वाः २ । अतिचमूनाम् । खलपूः ।

ओः सुपि । ६ । ४ । ८३ ॥

धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचो ऽङ्गस्य यण् स्यादचि सुपि । खल्प्वौ । खल्प्वः । एवं सुल्वादयः । स्वभूः । स्वभुवौ । स्वभुवः । वर्षाभूः ।

वर्षाभ्वश्च । ६ । ४ । ८४ ॥

अस्योवर्णस्य यण् स्यादचि सुपि । वर्षाभ्वौ इत्यादि । दृन्भूः ।

दृन्करपुनः पूर्वस्य भुवो यण् वक्तव्यः ।

दृन्भ्वौ । एवङ्करभूः । धाता । हे धातः । धातारौ । धातारः ।

ऋवर्णान्तस्य णत्वं वाच्यम् । धातॄणाम् ।

एवं नप्त्रादयः । नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम् । तेनेह न दीर्घः । पिता । पितरौ । पितरः । पितरम् । शेषं धातृवत् । एवं जामात्रादयः । ना । नरौ । नरः । हे नः ।

नृ च । ६ । ४ । ६ ॥

नृ इत्येतस्य नामि वा दीर्घः स्यात् । नृणाम् । नॄणाम् ।

गोतो णित् । ७ । १ । ९० ॥

ओकारान्ताद्विहितं सर्वनामस्थानं णिदत् स्यात् । गौः । गावौ । गावः ।

औतो ऽम्शसोः । ६ । १ । ९३ ॥

ओतो ऽम्शसोरचि परे आकार एकादेशः स्यात् । गाम् । गावौ । गाः । गवा । गवे । गोः २ । इत्यादिः ।

रायो हलि । ७ । २ । ८५ ॥

रैशब्दस्याकारोऽन्तादेशः स्यात् हलि विभक्तौ । राः । रायौ । रायः । राया राभ्यामित्यादि । ग्लौः । ग्लावौ । ग्लावः । ग्लौभ्यामित्यादि ।

इत्यजन्ताः पुंलिङ्गाः ।

अजन्तस्त्रीलिङ्गाः।

रमा।

औङ आपः। ७। १। १८॥

आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा। रमे। रमाः।

सम्बुद्धौ च। ७। ३। १०६॥

आप एकारः स्यात्सम्बुद्धौ। एङ्ह्रस्वादिति सम्बुद्धिलोपः। हे रमे। हे रमाः। रमाम्। रमे। रमाः।

आङि चापः। ७। ३। १०५॥

आङि ओसि च परे आबन्तस्याऽङ्गस्य एकारः स्यात्। रमया। रमाभ्याम् ३। रमाभिः।

याडापः। ७। ३। ११३॥

आपः परस्य ङिद्वचनस्य याड़ागमः स्यात्। ह्रस्वादिरेचि। रमायै। रमाभ्यः २। रमायाः २। रमयोः रमाणाम्। रमायाम्। रमयोः। रमासु। एवं दुर्गाम्बिकादयः।

सर्वनाम्नः स्याड्ढ्रस्वश्च। ७। ३। ११४॥

आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः। सर्वस्यै। सर्वस्याः २। सर्वासाम्। सर्वस्याम्। शेषं रमावत्। एवं विश्वादय आबन्ताः।

विभाषा दिक्समासे बहुव्रीहौ। १। १। २८॥

अत्र सर्वनामता वा स्यात्। उत्तरपूर्वस्यै। उत्तरपूर्वायै।

तीयस्येति वा संज्ञा । द्वितीयस्यै । द्वितीयायै । एवं तृतीया । अम्बार्थेति ह्रस्वः । हे अम्ब । हे अक्क । हे अल्ल । जरा । जरसौ । जरे । इत्यादि पक्षे रमावत् । गोपा विश्वपावत् । मतिः । मती । मत्या ।

ङिति ह्रस्वश्च । १ । ४ । ६ ॥

इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे । मत्यै । मतये । मत्याः २ । मतेः २ ।

इदुद्भ्याम् । ७ । ३ । ११७ ॥

इदुद्भ्यां नदीसंज्ञकाभ्यां परस्य ङेराम् स्यात् । मत्याम् । मतौ । शेषं हरिवत् । एवं बुद्ध्यादयः ।

वाचतुरोः स्त्रियां तिस्र चतस्र । ७ । २ । ९९ ॥

स्त्रीलिङ्गयोरेतयोरेतौ स्तो विभक्तौ परतः ।

अचि र ऋतः । ७ । २ । १०० ॥

तिस्रचतस्र एतयोर्ऋकारस्य रेफादेशः स्यादचि गुणदीर्घौ-त्वानामपवादः । तिस्रः २ । तिसृभिः । तिसृभ्यः २ । आमि नुट् ।

न तिस्रचतस्र । ६ । ४ । ४ ॥

एतयोर्नामि दीर्घो न स्यात् । तिसृणाम् । तिसृषु । द्वे २ । द्वाभ्याम् ३ । द्वयोः २ । गौरी । गौर्यौ । गौर्यः । हे गौरि गौर्यौ इत्यादि । एवं नद्यादयः । लक्ष्मीः । शेषं गौरीवत् । एवं तरीतन्त्र्यादयः । स्त्री । हे स्त्रि ।

स्त्रियाः। ६। ४। ७९॥

स्त्रीशब्दस्य इयङ् स्यात् अजादौ प्रत्यये परे। स्त्रियौ। स्त्रियः।

वामशसोः। ६। ४। ८०॥

अमि शसि च स्त्रिया इयङ् वा स्यात्। स्त्रियम्। स्त्रीम्। स्त्रियः। स्त्रीः। स्त्रिया। स्त्रियै। स्त्रियाः २। परत्वान्नुट्। स्त्रीणाम्। स्त्रीषु। श्रीः। श्रियौ:। श्रियः।

नेयङुवङ्स्थानावस्त्री। १। ४। ४॥

इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री। हे श्रीः। श्रियौ। श्रियं श्रिये। श्रियाः श्रियः।

वामि। १। ४। ५॥

इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री। श्रीणाम्। श्रियाम्। श्रियि। श्रियाम्। धेनुर्मतिवत्।

स्त्रियाञ्च। ७। १। ९९॥

स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते।

ऋन्नेभ्यो ङीप्। ४। १। ५॥

ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् स्यात्। क्रोष्ट्री। बधूः गौरीवत्। भ्रूः श्रीवत्। स्वयम्भूः पुंवत्।

न षट्स्वस्रादिभ्यः। ४। १। १०॥

षट् संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न स्तः।

"स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा।

याता मातेति सप्तैते स्वस्रादय उदाहृताः॥"

स्वसा। स्वसारौ। स्वसारः। माता पितृवत्। शसि मातॄः द्यौर्गोवत्। राः पुंवत्। नौर्ग्लौवत्।

इत्यजन्ताः स्त्रीलिङ्गाः।

अजन्तनपुंसकलिङ्गाः।

अतोऽम्। ७। १। २४॥

अतोऽङ्गात् क्लीवात् स्वमोरम् स्यात्। ज्ञानम्। एङ्ह्रस्वादिति ह्रस्वोपः। हे ज्ञान।

नपुंसकाच्च। ७। १। १९॥

क्लीवात् परस्यौङः शी स्यात्। भसंज्ञायाम्।

यस्येति च। ६। ४। १४८॥

ईकारे तद्धिते च परे भस्येवर्णावर्णयोर्लोपः स्यात्। इत्यकारलोपे प्राप्ते औङः श्यान्प्रतिषेधो वाच्यः।

ज्ञाने।

जश्शसोः शिः। ७। १। २०॥

क्लीवात् अनयोः शि स्यात्।

शि सर्वनामस्थानम्। १। १। ४२॥

शि इत्येतदुत्तरसंज्ञं स्यात्।

नपुंसकस्य झलचः। ७। १। ७२॥

झलन्तस्याजन्तस्य च क्लीवस्य नुमागमः स्यात् सर्वनामस्थाने परे।

मिदचोऽन्त्यात् परः। १। १। ४७॥

अचां मध्ये योऽन्त्यस्तस्मात् परस्तस्यैवान्तावयवो मित् स्यात्। उपधादीर्घः। ज्ञानानि। पुनस्तद्वत्। शेषं पुंवत्। एवं धनफलादयः।

अट्कुप्वाङ्नुम्व्यवायेऽपि। ८। ४। २॥

नामि। ६। १। १७४॥

अट्कवर्गपवर्गाङ्नुम्भ्यां व्यवायेऽपि नामोऽवयवस्य णत्वं स्यात्। वारीणाम्। वारिणि। हलादौ हरिवत्।

यट्टतरादिभ्यः पञ्चभ्यः। ७। १। २५॥

एभ्यः क्लीवेभ्यः स्वमोरट्टादेशः स्यात्।

टेः। ६। ४। १४३॥

डिति परे भस्य टेर्लोपः स्यात्। कतरत्। कतरट्। कतरे। कतराणि। हे कतरत्। शेषं पुंवत्। एवं कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतमस्य त्वन्यतमम् इत्येव। एकतरात् प्रतिषेधो वक्तव्यः। एकतरम्।

ह्रस्वो नपुंसके प्रातिपदिकस्य। १। २। ४७॥

क्लीवे प्रातिपदिकस्य अजन्तस्य ह्रस्वः स्यात्। श्रीपम्। ज्ञानवत्।

स्वमोर्नपुंसकात्। ७। १। २३॥

क्लीवादङ्गात्परयोः स्वमोः लुक् स्यात्। वारि।

इदुदोऽप्टि विभक्तौ। ७। १। ७२॥

इदन्तस्य क्लीवस्य नुमागमः स्यात् अचि विभक्तौ। वारिणी। वारीणि। न नुमतेत्यस्यानित्यत्वात् पक्षे संबुद्धिनिमित्तो गुणः। हे वारि। हे वारे। घेर्ङितीति गुणे प्राप्ते।

हृद्यौत्वटज्वङ्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन।

वारिणे। वारिणः २। वारिणोः। नुमचिरेति नुट्। नामीति दीर्घः। वारीणाम्। वारिणि। हलादौ हरिवत्।

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः । ७ । १ । ७५ ॥

एषामनङ् स्यात् टादावचि स च उदात्तः ।

अल्लोपोऽनः । ६ । ४ । १३४ ॥

अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः स्यात् । दध्ना । दध्ने । दध्नः २ । दध्नोः २ ।

विभाषा ङिश्योः । ६ । ४ । १३६ ॥

अङ्गावयवोऽसर्वनामस्थानपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः । दध्नि । दधनि । शेषं वारिवत् । एवमस्थिसक्थ्यक्ष्णि । सुधि । सुधिनी । सुधीनि । हे सुधे । हे सुधि । सुधिनेत्यादि । मधु । मधुनी । मधूनि । हे मधो । हे मधु । सुतु । सुतुनी । सुतूनि । सुतुनेत्यादि । धातृ । धातृणी । धातॄणि । धातॄणाम् । हे धातः । एवं भ्रातृादयः ।

एच इग्घ्रस्वादेशे । १ । १ । ४८ ॥

आदिश्यमानेषु ह्रस्वेषु मध्ये एच इगेव स्यात् । प्रद्यु प्रद्युनी । प्रद्यूनि । प्रद्युनेत्यादि । प्रदि । प्रदिनी । प्रदीनि । प्रदिना । एकदेशविकृतमनन्यवत् । प्रदाभ्याम् । प्रदीनाम् । सुनु । सुनुनी । सुनूनि । सुनुनेत्यादि ।

इत्यजन्तनपुंसकलिङ्गाः ।

हलन्तपुंलिङ्गाः ।

हो ढः । ८ । २ । ३१ ॥

हस्य ढः स्यात् झलि पदान्ते च । लिट् । लिड् । लिहौ । लिहः । लिहम् । लिहौ । लिहः । लिहा लिड्भ्याम् । लिट्सु । लिट्त्सु ।

दादेर्धातो र्घः । ८ । २ । ३२ ॥

झलि पदान्ते चोपदेशे दादेर्धातोर्हस्य घः स्यात् ।

एकाचो वशो भष् झषन्तस्य स्ध्वोः । ८ । २ । ३७ ॥

धात्ववयवस्यैकाचो झषन्तस्य वशो भष् स्यात् से ध्वे पदान्ते च । धुक् । धुग् । दुहौ । दुहः । धुग्भ्याम् । धुक्षु ।

वा द्रुहमुहष्णुहष्णिहाम् । ८ । २ । ३३ ॥

एषां हस्य वा घः स्यात् झलि पदान्ते च । पक्षे ढः । ध्रुक् । ध्रुग् । ध्रुट् । ध्रुड् । द्रुहौ । द्रुहः । ध्रुग्भ्याम् । ध्रुड्भ्याम् । ध्रुक्षु । ध्रुट्सु । ध्रुट्त्सु । एवं मुह् ।

धात्वादेः षः सः । ६ । १ । ६४ ॥

स्नुट् । स्नुड् । स्नुक् । स्नुग् । एवं स्निह् ।

द्रलृयणः संप्रसारणम् । १ । १ । ४५ ॥

यणः स्थाने प्रत्युच्यमानो य इक् स सम्प्रसारणसंज्ञः स्यात् ।

वाह ऊठ् । ६ । ४ । १३२ ॥

भस्य वाहः संप्रसारणमूठ् स्यात् ।

संप्रसारणाच्च । ६ । १ । १०८ ॥

संप्रसारणादचि पूर्वरूपमेकादेशः स्यात् । विश्वौहः । विश्वौहा इत्यादि ।

चतुरनडुहोरामुदात्तः । ७ । १ । ९८ ॥

अनयोराम् स्यात् सर्वनामस्थाने परे स चोदात्तः ।

सावनडुहः । ७ । १ । ८२ ॥

अस्य नुम् स्यात् सौ परे । अनड्वान् ।

अम् सम्बुद्धौ । ७ । १ । ९९ ॥

चतुरनडुहोरम् स्यात् सम्बुद्धौ हे अनड्वन् । अनड्वाहौ २ । अनडुहः । अनडुहा ।

वसुस्रंसुध्वंस्वनडुहां दः । ८ । २ । ७२ ॥

सान्तस्य वस्वन्तस्य स्रंसादेश्च दः स्यात् पदान्ते । अनडुद्भ्यामित्यादि । सान्तेति किम् ? । विद्वान् । पदान्तेति किम् ? । स्रस्तम् । ध्वस्तम् ।

सहेः साड़ः सः । ८ । ३ । ५६ ॥

साड्रूपस्य सहेः सस्य मूर्धन्यादेशः । तुराषाट् । तुराषाड् । तुरासाहौ । तुरासाहः । तुराषाड्भ्यामित्यादि ।

दिव औत् । ७ । १ । ८४ ॥

दिविति प्रातिपदिकस्यौत् स्यात्सौ परे । सुद्यौः । सुदिवौ ।

दिव उत् । ६ । १ । १३१ ॥

दिवः अन्तादेशः उकारः स्यात् पदान्ते । सुद्युभ्याम् । इत्यादि । चत्वारः । चतुरः । चतुर्भिः । चतुर्भ्यः ।

षट्चतुर्भ्यश्च । ७ । १ । ५५

षट्संज्ञकेभ्यः चतुरश्च परस्यामो नुड़ागमः स्यात् ।

रषाभ्यान्नो णः समानपदे । ८ । ४ । १ ॥

अचो रहाभ्यां द्वे । ८ । ४ । ४६ ॥

अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः । चतुर्णाम् ।

रोः सुपि । ८ । ३ । १६ ॥

रोरेव विसर्गः सुपि । षत्वम् । षस्य द्वित्वे प्राप्ते ।

शरो ऽचि । ८ । ४ । ४६ ॥

अचि परे शरो न द्वे स्तः । चतुर्षु ।

मो नो धातोः । ८ । २ । ६४ ॥

धातोर्मस्य नः स्यात् पदान्ते । प्रशान् ।

किमः कः । ७ । २ । १०३ ॥

किमः कः स्यात् विभक्तौ । कः । कौ । के । इत्यादि । सर्ववत् ।

इदमो मः । ७ । २ । १०८ ॥

इदमो मस्य मः स्यात् सौ परे । त्यदाद्यत्वापवादः ।

इदोऽय् पुंसि । ७ । २ । १११ ॥

इदम इदोऽय् स्यात् सौ पुंसि । सोर्लोपः । अयम् । त्यदाद्यत्वे ।

अतो गुणे । ६ । १ । ६७ ॥

अपदान्तादतो गुणे पररूपमेकादेशः ।

दश्च । ७ । २ । १०६ ॥

इदमो दस्य मः स्यादिभक्तौ । इमौ । इमे । त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः ।

अन्नाप्यकः । ७ । २ । ११२ ॥

अककारस्य इदम इदोऽन् स्यात् आपि विभक्तौ । आबिति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः । अनेन ।

हलि लोपः । ७ । २ । ११३ ॥

अककारस्येदम इदो लोपः स्यात् आपि हलादौ । नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे ।

आद्यन्तवदेकस्मिन् । १ । १ । २१ ॥

एकस्मिन् क्रियमाणं कार्यमादाविव अन्त इव स्यात् । सुपि चेति दीर्घः । आभ्याम् ।

नेदमदसोरकोः । ७ । १ । ११ ॥

अककारयोरिदमदसोर्भिस ऐस् न स्यात् । एभिः । अस्मै । एभ्यः । अस्मात् । अस्य । अनयोः २ । एषाम् । अस्मिन् । एषु ।

द्वितीयाटौस्स्वेनः । २ । ४ । ३४ ॥

द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यात् अन्वादेशे । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुम्पुनरुपादानमन्वादेशः ।

यथा अनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति ।

अनयोः पवित्रं कुलम् । एनयोः प्रभूतं स्वमिति । एनम् । एनौ । एनान् । एनेन । एनयोः २ । राजा ।

न ङिसम्बुद्ध्योः । ८ । २ । ८ ॥

नस्य लोपो न स्यात् ङौ सम्बुद्धौ च । हे राजन् ।

ङावुत्तरपदे प्रतिषेधः ।

ब्रह्मनिष्ठः। राजानौ। राजानः। राज्ञः। राज्ञा।

नलोपः सुप्स्वरसंज्ञातुग्विधिषु क्ङिति ।८।२ ।२ ॥

सुब्विधौ स्वरविधौ संज्ञाविधौ क्ङिति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र। राजाश्च इत्यादावित्यसिद्धत्वादात्वमैत्वमैस्त्वञ्च न। राजभिः। राज्ञे राजभ्याम्। राजभ्यः। राज्ञः राज्ञाम्। राज्ञि राजनि। यज्वा। यज्वानौ। यज्वानः।

न संयोगाद्वमन्तात्। ६। ४। १३७॥

वकारमकारान्तसंयोगात् परस्य अनोऽकारस्य लोपो न स्यात्। यज्वनः। यज्वना। यज्वभ्याम्। ब्रह्मणः। ब्रह्मणा। ब्रह्मभ्यामित्यादि।

इन्हन्पूषार्य्यम्णां शौ। ६। ४। १२॥

एषां शावेवोपधाया दीर्घो नान्यत्र। इति निषेधे प्राप्ते।

सौ च। ६। ४। १३॥

इन्नादीनामुपधाया दीर्घः स्यात् असम्बुद्धौ सौ परे। वृत्रहा। हे वृत्रहन्।

एकाजुत्तरपदे णः। ८। ४। १२॥

एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात् परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्। वृत्रहणौ।

हो हन्तेर्ञ्णिन्नेषु। ७। ३। ५४॥

ञिति णिति प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वम् स्यात्। वृत्रघ्नः। इत्यादि। एवं शार्ङ्गिन् यशस्विन् अर्य्यमन् पूषन्।

मघवा बहुलम् । ६ । ४ । १२८ ॥

मघवन् शब्दस्य वा तृ इत्यन्तादेशः स्यात् । ऋ इत् ।

उगिदचां सर्वनामस्थानेऽधातोः । ७ । १ । ७० ॥

अधातोरुगितो नलोपिनोऽञ्चतेश्च नुम् स्यात् सर्वनामस्थाने । मघवान् । मघवन्तौ । मघवन्तः । हे मघवन् । मघवद्भ्याम् । तृत्वाभावे । मघवा । सुटि । राजवत् ।

श्वयुवमघोनामतद्धिते । ६ । ४ । १३३ ॥

अङन्तानां भानामेषामतद्धिते परे संप्रसारणम् स्यात् । मघोनः मघवभ्याम् । एवं श्वन् युवन् ।

न संप्रसारणे संप्रसारणम् । ६ । १ । ३७ ॥

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात् । यूनः । यूना । युवभ्याम् । इत्यादि । अर्वा हे अर्वन् ।

अर्वणस्त्रसावनञः । ६ । ४ । १२७ ॥

नञा रहितस्यार्वन्नन्तस्याङ्गस्य तृ इत्यन्तादेशो न तु सौ । अर्वन्तौ । अर्वन्तः । अर्वद्भ्यामित्यादि ।

पथिमथ्यृभुक्षामात् । ७ । १ । ८५ ॥

एषामाकारोऽन्तादेशः स्यात् सौ परे ।

इतोऽत्सर्वनामस्थाने । ७ । १ । ८६ ॥

पथ्यादेरिकारस्याकारः स्यात् सर्वनामस्थाने परे ।

थो न्थः । ७ । १ । ८७ ॥

पथिमथोस्थस्य न्थादेशः स्यात् सर्वनामस्थाने परे । पन्थाः । पन्थानौ । पन्थानः ।

भस्य टेर्लोपः । ७ । १ । ८८ ॥

भस्य पथ्यादेष्टिलोपः स्यात् । पथः पथा । पथिभ्याम् । एवं मथिन् ऋभुक्षिन् ।

षान्ताः षट् । १ । १ । २४ ॥

षान्ता नान्ता च संख्या षट्संज्ञा स्यात् । पञ्चन् शब्दो नित्यं बहुवचनान्तः । पञ्च । पञ्च । पञ्चभिः । पञ्चभ्यः २ । षट्चतुर्भ्यश्चेति नुट् ।

नोपधायाः । ६ । ४ । ७ ॥

नान्तस्योपधाया दीर्घः स्यात् नामि परे । पञ्चानाम् । पञ्चसु ।

अष्टन आ विभक्तौ । ७ । २ । ८४ ॥

अष्टनः आत्वं वा स्यात् हलादौ विभक्तौ ।

अष्टाभ्य औश् । ७ । १ । २१ ॥

क्लताकारादष्टनः परयोः जश्शसोरौश् स्यात् । अष्टभ्य इति वक्तव्ये क्लतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति । अष्टौ २ । अष्टाभ्यः २ । अष्टानाम् । अष्टासु । आत्वाभावे अष्ट पञ्चवत् ।

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च । ३ । २ । ५९ ॥

एभ्यः क्विन् स्यात् अञ्चेः सुप्युपपदे । युजि क्रुञ्चोः केवलयोः । क्रुञ्चेर्नलोपाभावश्च निपात्यते कनाविती ।

क्लदतिङ् । ३ । १ । ९३ ॥

सन्निहिते धात्वधिकारे तिङ्भिन्नः प्रत्ययः क्लत्संज्ञः स्यात् ।

वेरपृक्तस्य । ६ । १ । ६७ ॥

अपृक्तस्य वस्य लोपः स्यात् ।

क्विन्प्रत्ययस्य कुः । ८ । २ । ६२ ॥

क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः स्यात् पदान्ते । तस्यासिद्धत्वाच्चोः कुरिति कुत्वम् । ऋत्विक् । ऋत्विग् । ऋत्विजौ । ऋत्विग्भ्याम् ।

युजेरसमासे । ७ । ३ । ७१ ॥

युजेः सर्वनामस्थाने नुम् स्यादसमासे । सुलोपः । संयोगान्तलोपः । कुत्वेन नस्य ङः । युङ् । युञ्जौ । युञ्जः । युग्भ्याम् ।

चोः कुः । ८ । २ । ३० ॥

चवर्गस्य कवर्गः स्याज्झलि पदान्ते च । सुयुक् । सुयुजौ सुयुग्भ्याम् । खन् । खञ्जौ । खन्भ्याम् ।

व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां षः ।८।२।३६॥

व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्यात् झलि पदान्ते च । जश्त्व चर्त्वे । राट् । राड् । राजौ । राजः । राडभ्याम् । एवं विभ्राट् । देवेट् । विश्वसृट् ।

परौ व्रजेः षः पदान्ते ।

परावुपपदे व्रजेः क्विप् स्यात् दीर्घश्च पदान्ते षत्वमपि । परिव्राट् । परिव्राजौ ।

विश्वस्य वसुराटोः । ६ । ३ । १२८ ॥

विश्वशब्दस्य दीर्घोऽन्तादेशः स्यात् वसौ राट्शब्दे च परे । विश्वाराट् । विश्वाराड् । विश्वराजौ । विश्वाराड्भ्याम् ।

स्कोः संयोगाद्योरन्ते च। ८। २। २९॥

पदान्ते झलि परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः स्यात्। भृट्। सस्य श्चुत्वेन शः। झलाञ्जश् झशि इति शस्य जः। भृज्जौ। भृड्भ्याम्। त्यदाद्यत्वम्परूपत्वम्।

तदोः सः सावनन्त्ययोः। ७। २। १०६॥

त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात् सौ। स्यः। त्यौ। त्ये। सः। तौ। ते। यः यौ। ये। एषः। एतौ। एते।

ङे प्रथमयोरम्। ७। १। २८॥

युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः।

त्वाहौ सौ। ७। २। ९४॥

युष्मदस्मदोर्मपर्य्यन्तस्य त्वाहौ आदेशौ स्तः सौ परे।

शेषे लोपः। ७। २। ९०॥

आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्। त्वम्। अहम्।

युवावौ द्विवचने। ७। २। ८२॥

द्वयोरुक्तावनयोर्मपर्य्यन्तस्य युवावौ स्तो विभक्तौ।

प्रथमायाश्च द्विवचने भाषायाम्। ७। २। ८८॥

औड्यै तयोरात्वं लोके। युवाम्। आवाम्।

यूयवयौ जसि। ७। २। ९३॥

अनयोर्मपर्य्यन्तस्य। यूयम्। वयम्।

त्वमावेकवचने। ७। २। ९७॥

एकस्योक्तावनयोर्मपर्य्यन्तस्य त्वमौ स्तो विभक्तौ।

द्वितीयायाञ्च । ७ । २ । ८७ ॥

अनयोरात् स्यात् । त्वाम् । माम् ।

शसो न । ७ । १ । २८ ॥

आभ्यां शसो नः स्याद् योऽपवादः । आदेः परस्य । संयोगान्त-लोपः । युष्मान् । अस्मान् ।

यो ऽचि । ७ । २ । ८८ ॥

अनयोर्यकारादेशः स्यादनादेशे ऽजादौ परतः । त्वया । मया ।

युष्मदस्मदोरनादेशे । ७ । २ । ८९ ॥

अनयोरात् स्यादनादेशे हलादौ विभक्तौ । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः ।

तुभ्यमह्यौ ङयि । ७ । २ । ९५ ॥

अनयोर्मपर्य्यन्तस्य तुभ्यमह्यौ स्तः ङयि । अमादेशः शेषे लोपः । तुभ्यम् । मह्यम् ।

भ्यसोभ्यम् । ७ । १ । ३० ॥

भ्यसोभ्यम् अभ्यम् वा आदेशः स्यात् । युष्मभ्यम् । अस्मभ्यम् ।

एकवचनस्य च । ७ । १ । ३२ ॥

आभ्यां पञ्चम्येकवचनस्य अत् स्यात् । त्वत् । मत् ।

पञ्चम्या अत् । ७ । १ । ३१ ॥

आभ्यां पञ्चम्या भ्यसोऽत् स्यात् । युष्मत् । अस्मत् ।

तवममौ ङसि । ७ । २ । ९६ ॥

अनयोर्मपर्य्यन्तस्य तव ममौ स्तो ङसि

युष्मदस्मद्भ्यां ङसोऽश्। ७। १। २७॥

तव। मम। युवयोः। आवयोः।

साम आकम्। ७। १। ३३॥

आभ्यां परस्य साम आकम् स्यात्। युष्माकम्। अस्माकम्। त्वयि। मयि। युवयोः। आवयोः। युष्मासु। अस्मासु।

युष्मदस्मदोः षष्ठी चतुर्थीद्वितीयास्थयोर्वां नावौ। ८। १। २०॥

पदात् परयोरपादादौ स्थितयोः अनयोः षष्ठ्यादिविभक्तिस्थयोर्वां नावौ इत्यादेशौ स्तः।

बहुवचनस्य वस्नसौ। ८। १। २१॥

उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः।

ते मयावेकवचनस्य। ८। १। २२॥

उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः।

त्वामौ द्वितीयायाः। ८। १। २३॥

द्वितीयैकवचनान्तयोस्वा मा इत्यादेशौ स्तः।

श्रीशस्त्वाऽवतु मापीह दत्तात् ते मेऽपि शर्म्म सः।
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः॥
सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः।
सोऽव्याद्वो नः शिवं वो नो दद्यात् सेव्योऽत्र वः स नः॥

एकवाक्ये युष्मदस्मदादेशा वक्तव्याः। एकतिङ् वाक्यम् तेनेह न। ओदनं पच तव भविष्यति। इह तु स्यादेव। एते वां नावादय आदेशा अनन्वादेशे वा वक्तव्याः।

अन्वादेशे तु नित्यं स्युः। धाता ते भक्तोऽस्ति धाता तव भक्तोऽस्ति। तस्मै ते नम इत्येव। सुपात्। सुपाद्। सुपादौ।

पादः पत्। ६। ४। १३०॥

पाच्छब्दान्तं यदङ्गभन्तदवयवस्य पाच्छब्दस्य पदादेशः स्यात्। सुपदः। सुपदा। सुपाद्भ्याम्। अग्निमत्। अग्निमथौ। अग्निमथम्।

अनिदितां हल उपधायाः क्ङिति।६।४।२४॥

हलन्तानामनिदितामङ्गानामुपधाया नस्य लोपः स्यात् किति ङिति च। उगिदचामिति नुम्। संयोगान्तस्य लोपः। नुमो नस्य कुत्वेन ङः। प्राङ्। प्राञ्चौ। प्राञ्चः।

अचः। ६।.४। १३८॥

लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः स्यात्।

चौ। ६। ३। १३८॥

लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः स्यात्। प्राचः। प्राचा। प्राग्भ्याम्। प्रत्यङ्। प्रत्यञ्चौ। प्रत्यञ्चः। प्रत्यञ्चम्। प्रत्यञ्चौ। प्रतीचः। प्रतीचा। प्रत्यग्भ्याम्। उदङ्। उदञ्चौ। उदञ्चः।

उद ईत्। ६। ४। १३९॥

उच्छब्दात् परस्य नुमनकारस्याऽञ्चे र्भस्याकारस्य ईत् स्यात्। उदीचः। उदीचा। उदग्भ्याम्।

समः समिः। ६। ३। ९३॥

अप्रत्ययान्तेऽञ्चतौ परे। सम्यङ्। सम्यञ्चौ। सम्यञ्चः। समीचः। समीचा। सम्यग्भ्याम्।

सहस्य सध्रिः। ६। ३। ९५॥

अप्रत्ययान्तेऽञ्चतौ परे। सध्रीङ्।

तिरसस्तिर्य्यलोपे। ६। ३। ९४॥

अलुप्ताकारेऽञ्चतौ अप्रत्ययान्ते परे तिरसस्तिर्य्यादेशः स्यात्। तिर्य्यङ्। तिर्य्यञ्चौ। तिर्य्यञ्चः। तिर्य्यञ्चम्। तिर्य्यञ्चौ। तिरश्चः। तिरश्चा। तिर्य्यग्भ्याम्।

नाञ्चेः पूजायाम्। ६। ४। ३०॥

पूजार्थस्याऽञ्चतेरुपधाया नस्य लोपो न स्यात्। अलुप्तनकारत्वान्न नुम्। प्राङ्। प्राञ्चौ। नलोपाभावादकारलोपो न। प्राञ्चः। प्राञ्चा। प्राङ्भ्याम्। प्राङ्क्षु। प्राङ्त्सु। एवं पूजार्थे प्रत्यङ्ङादयः। क्रुङ्। क्रुञ्चौ। क्रुञ्चः। क्रुङ्भ्याम्। पयोमुक्। पयोमुग्। पयोमुचौ। पयोमुग्भ्याम्। उगित्वान्नुम्।

सान्तमहतः संयोगस्य। ६। ४। १०॥

सान्तसंयोगस्य महतश्च यो नकारस्तस्य उपधाया दीर्घः स्यात् असम्बुद्धौ सर्वनामस्थाने परे। महान्। महान्तौ। महान्तः। हे महन्। महतः। महता। महद्भ्याम्।

अत्वसन्तस्य चा ऽधातोः । ६ । ४ । १४ ॥

अत्वन्तस्योपधाया दीर्घः स्यात् धातुभिन्नासन्तस्य चासम्बुद्धौ सौ परे । धीमान् । धीमन्तौ । धीमन्तः । हे धीमन् । शसादौ महद्वत् । भादेर्ङवतुः । ङित्वसामर्थ्यादभस्यापि टेर्लोपः । भवान् । भवन्तौ । शत्वन्तस्य तु भवन् ।

उभे अभ्यस्तम् । ६ । १ । ५ ॥

षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः ।

नाऽभ्यस्ताच्छतुः । ७ । १ । ७८ ॥

अभ्यस्तात् परस्य शतुर्नुम् न स्यात् । ददत् । ददद् । ददती । ददतः ।

जक्षित्यादयः षट् । ६ । १ । ६ ॥

षड्धातवोऽत्ये जक्षितिश्च सप्तम एते अभ्यस्तसंज्ञाः स्युः । जक्षत् । जक्षती । जक्षतः । एवं जाग्रत् । दरिद्रत् । शासत् । चकासत् । गुप् । गुपौ । गुपः । गुब्भ्याम् ।

त्यदादिषु दृशेरनालोचने कञ्च । ३ । २ । ६० ॥

त्यदादिषूपपदेषु अज्ञानार्थदृशेः धातोः कञ् स्यात् । चात् क्विन् ।

आ सर्वनाम्नः । ६ । ३ । ९१ ॥

सर्वनाम्न आकारोऽन्तादेशः स्यात् दृग्-दृश्-वतुषु । तादृक् । तादृशौ । तादृशः । तादृग्भ्याम् । व्रश्चेति षः । जश्त्वचर्त्वे । विट् । विड् । विशौ । विशः । विड्भ्याम् ।

नशेर्वा । ८ । २ । ६३ ॥

नशेः कवर्गौ ऽन्तादेशौ वा स्यात् पदान्ते । नक् । नट् । नशौ । नशः । नग्भ्याम् नड्भ्याम् ।

स्पृशो ऽनुदके क्विन् । ३ । २ । ५८ ॥

अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात् । घृतस्पृक् । घृतस्पृशौ । घृतस्पृशः । दधृक् । दधृषौ । दधृग्भ्याम् । रत्नमुट् । रत्नमुषौ । रत्नमुड्भ्याम् । षट् । षड्भिः । षड्भ्यः २ । षण्णाम् । षट्सु । रुत्वम् प्रति षत्वस्यासिद्धत्वात्सजुषोरुरिति रुत्वम् ।

वीरुपधाया दीर्घ इकः । ८ । २ । ७६ ॥

रेफवान्तयोरुपधाया इको दीर्घः स्यात् पदान्ते । पिपठीः पिपठिषौ । पिपठीर्भ्याम् ।

नुम् विसर्जनीयशर्व्यवाये ऽपि । ८ । ३ । ५८ ॥

एतैः प्रत्येकं व्यवधानेऽपि इण् कुभ्याम्परस्य सस्य मूर्धन्यादेशः स्यात् । ष्टुत्वेन पूर्वस्य षत्वम् । पिपठीष्षु । पिपठीःषु । चिकीः । चिकीर्षौ । चिकीर्भ्याम् । चिकीर्षु । विद्वान् । विद्वांसौ । हे विद्वन् ।

वसोः संप्रसारणम् । ६ । ४ । १३१ ॥

वस्वन्तस्य भस्य सम्प्रसारणं स्यात् । विदुषः । वसुस्रंसिति दत्वम् । विदद्भ्याम् ।

पुंसोऽसुङ् । ७ । १ । ८६ ॥

सर्वनामस्थाने विवक्षितेऽसुङ् स्यात् । हे पुमन् । पुमान् । पुमांसौ । पुंसः । पुंसा । पुम्भ्याम् । पुंसु । ऋदुशनेत्यनङ । उशना । उशनसौ ।

अस्य सम्बुद्धौ वा ऽनङ् नलोपश्च वा वाच्यः । हे उक्षन् । हे उक्षन् । हे उक्षनः । हे उक्षनसौ । उक्षनोभ्याम् । उक्षनस्सु । अनेहा । अनेहसौ । हे अनेहः । वेधाः । वेधसौ । हे वेधः । वेधोभ्याम् ।

अदस औ सुलोपश्च । ७ । २ । १०७ ॥

अदस औत् स्यात् सौ परे सुलोपश्च । तदोरिति सः । असौ । त्यदाद्यत्वम् । पररूपत्वम् । द्वङिः ।

अदसोऽसेर्दादु दो मः । ८ । २ । ८० ॥

अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च । आन्तरतम्यात् ऋवर्णस्य उः दीर्घस्य ऊः । अमू । जसः शी । गुणः ।

एत ईद्बहुवचने । ८ । २ । ८१ ॥

अदसो दात् परस्यैत ईत् स्यात् दस्य च मो बह्वर्थात्तौ । अमी पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे । अमुम् । अमू । अमून् । मुत्वे कृते घिसंज्ञायां नाभावः ।

न मुने । ८ । २ । ३ ॥

नाभावे कर्त्तव्ये कृते च मुभावो नासिद्धः स्यात् । अमुना । अमूभ्याम् । अमीभिः । अमुष्मै । अमीभ्यः । अमुष्मात् । अमुष्य । अमुयोः । अमीषाम् । अमुष्मिन् । अमीषु ।

इति हलन्ताः पुंलिङ्गाः ।

नहो धः। ८। २। ३४॥

नहो हस्य धः स्यात् झलि पदान्ते च।

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ।६।३।११६॥

क्विबन्तेषु परेषु पूर्वपदस्य दीर्घः स्यात्। उपानत् उपानहौ। उपानत्सु। क्विन्नन्तत्वात् कुत्वेन हस्य धः। उष्णिक्। उष्णिहौ। उष्णिग्भ्याम्। द्यौः। दिवौ। दिवः। द्युभ्याम्। गीः। गिरौ। गिरः। एवं पूः। चतस्रः। चतसृणाम्। किमः कादेशे टाप्। का। के। काः। सर्वावत्।

यः सौ। ७। २। ११०॥

इदमो दस्य यः स्यात् सौ। इयम्। त्यदाद्यत्वम्। पररूपत्वम्। टाप्। दश्चेति मः। इमे। इमाः। इमाम्। अनया। हलि लोपः। आभ्याम्। आभिः। अस्यै। अस्याः २। अनयोः। आसाम्। अस्याम्। आसु। स्रक् स्रग्। स्रजौ। स्रजः। स्रग्भ्याम्। त्यदाद्यत्वम्। टाप्। स्रा। त्वे। त्वाः। एवं तद् एतद्। वाक्। वाचौ। वाग्भ्याम्। वाक्षु। अप्शब्दो नित्यं बहुवचनान्तः। अप्तृन्निति दीर्घः। आपः।

अपो भि। ७। ४। ४८॥

अपस्तकारः स्यात् भादौ प्रत्यये परे। अद्भिः। अद्भ्यः। अपाम्। अप्सु। दिग्। दिक्। दिग्भ्यः। दिग्भ्याम्। त्यदादिष्विति दृशेः क्विन्विधानादन्यत्रापि कुत्वम्। दृग्। दृशौ। दृग्भ्याम्। त्विट्। त्विषौ। त्विड्भ्याम्। सस्जुसोरिति रुत्वम्। सजूः।

सजुषौ । सजूर्भ्याम् । आशीः । आशिषौ । आशीर्भ्याम् । असौ । उत्वमत्वे । अमू । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमुष्यै । अमूभ्यः । अमुष्याः २ । अमुयोः । अमूषां । अमुष्याम् । अमूषु ।

इति हलन्ताः स्त्रीलिङ्गाः ।

हलन्तनपुंसकलिङ्गाः ।

स्वमोर्लुक् । दत्वम् । खनडुत् । खनडुही । चतुरनडुहोरित्याम् । खनडुांहि । पुनस्तद्वत् । शेषं पुंवत् । वाः । वारी । वारि । वारा । वार्भ्याम् । चत्वारि । किम् । के । कानि इदम् । इमे । इमानि । अन्वादेशे नपुंसके एनदक्तव्यः । एनत् । एने । एनानि । एनेन । एनयोः । ब्रह्म । ब्रह्मणी । ब्रह्माणि । विभाषा ङिश्योः अङ्गी । अहनी । अहानि ।

अहन् । ८ । २ । ६८ ॥

अहन्नित्यस्य रुः स्यात् पदान्ते । अहोभ्याम् दण्डि । दण्डिनी । दण्डीनि । दण्डिना । दण्डिभ्याम् । सुपथि । टिलोपः । सुपथी । सुपथ्यानि । ऊर्क् । ऊर्जी । ऊनर्जि । नरजानां संयोगः । तत् । ते । तानि । यत् । ये । यानि । एतत् । एते । एतानि । गवाक् । गोची । गवाञ्चि । पुनस्तद्वत् । गोचा । गवाग्भ्याम् । शकृत् । शकृती । शकृन्ति । ददत् ।

वा नपुंसकस्य । ७ । १ । ७६ ॥

अभ्यस्तात् परः यः शता तदन्तस्य क्लीवस्य नुम् वा स्यात् सर्वनामस्थाने। ददन्ति। ददति। तुदत्।

आच्छीनद्योर्नुम्। ७। १। ८०॥

अवर्णान्तात् अङ्गात् परो यः शतुरवयवस्तदन्तस्य नुम् वा स्यात् शीनद्योः परतः। तुदन्ती। तुदती। तुदन्ति। भात्। भान्ती। भाती। भान्ति। पचत्।

शप्श्यनोर्नित्यम्। ७। १। ८१॥

शप्श्यनोरात् परो यः शतुरवयवस्तदन्तस्य नित्यं नुम् स्यात् शीनद्योः परतः। पचन्ती। पचन्ति। दीव्यत्। दीव्यन्ती। दीव्यन्ति। धनुः। धनुषी। सान्तेति दीर्घः। नुम् विसर्जनीयेति षः। धनूंषि। धनुषा। धनुर्भ्याम्। एवं चत्वारिंशदादयः। पयः। पयसी। पयांसि। पयसा। पयोभ्याम्। सुपुम्। सुपुंसी। सुपुमांसि। अदः। विभक्तिकार्य्यम्। उत्वमत्वे। अमू। अमूनि। शेषं पुंवत्।

इति हलन्तनपुंसकलिङ्गाः।

अव्ययानि।

स्वरादिनिपातमव्ययम्। १। १। ३७॥

स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः।

स्वर्, अन्तर्, प्रातर्, पुनर्, सनुतर्, उच्चैस्, नीचैस्, शनैस्, ऋधक्, ऋते, युगपत्, आरात्, पृथक्, ह्यस्, श्वस्, दिवा, रात्रौ सायम्, चिरम्, मनाक्, ईषत्, जोषम्, तूष्णीम्, बहिस्, अवस्,

समया, निकषा, स्वयम्, वृथा, नक्तम्, नञ्, हेतौ, इद्धा, अद्धा, सामि, वत्, ब्राह्मणवत्, क्षत्रियवत्, सना, सनत्, सनात्, उपधा, तिरस्, अन्तरा, अन्तरेण, ज्योक्, कम्, शम्, सहसा, विना, नाना, स्वस्ति, स्वधा, अलम्, वषट्, वौषट्, श्रौषट्, अन्यत्, अस्ति, उपांशु, क्षमा, विहायसा, दोषा, मृषा, मिथ्या, मुधा, पुरा, मिथो, मिथस्, प्रायस्, मुहुस्, प्रवाहुकम्, प्रवाहिका, आर्य्यहलम्, अभीक्ष्णम्, साकम्, सार्द्धम्, नमस्, हिरुक्, धिक्, अथ, अम्, आम्, प्रताम्, प्रशाम्, :प्रतान्, मा, माङ्, आकृतिगणोऽयम्। च, वा, ह, अह, एव, एवम् नूनम्, शश्वत्, युगपत्, भूयस्, कूपत्, सूपत्, कुवित्, नेत्, चेत्, चण्, कच्चित्, यत्र, तत्र, नह, हन्त, माकिम्, माकीम्, नकिम्, नकीम्, नकिर्, माङ्, नञ्, यावत्, तावत्, त्वै, न्वै, ह्वै, रै, श्रौषट्, वौषट्, स्वाहा, स्वधा, वषट्, ओम्, तुम्, तथाहि, खलु, किल, अथ, सुष्ठु, स्म, आदह। उपसर्गसुप्स्वरविभक्तिप्रतिरूपकाश्च। अवदत्तम्। अहंयुः। अस्तिक्षीरा। अ, आ, इ, ई, उ, ऊ, ए, ऐ, ओ, औ, पशु, शुकम्, यथा। कथाच, पाट्, प्याट्, अङ्ग, है, हे, भोः, अये, द्य, विषु, एकपदे, युत्, आतः। चादिरप्याकृतिगणः तसिलादयः प्राक् पाशपः। शस्प्रभृतयः प्राक् समासान्तेभ्यः अम्। आम्। क्त्वोऽर्थाः। तसिवती। नानञौ। एतदन्तमव्ययम्। अत इत्यादि।

क्त्वामेजन्तः। १। १। ३९॥

क्त्वो मान्त एजन्तश्च तदन्तमव्ययम्। स्मारम् स्मारम्। जीवसे। पिबध्यै।

त्वातोऽसुन् कसुनः। १। १। ४०॥

एतदन्तमव्ययम्। क्त्वा। उदेतो। विस्रपः।

अव्ययीभावश्च। १। १। ४१॥

अधिहरि।

अव्ययादाप्सुपः। २। ४। ८२॥

अव्ययादापः सुपश्च लुक् स्यात्। तत्र शालायाम्। अथ सट्शं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।
वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपञ्चैव हलन्तानां यथा वाचा निशा दिशा।
अवगाहः। वगाहः। अपिधानम्। पिधानम्॥

इत्यव्ययानि।

भ्वादयः।

लट्। लिट्। लुट्। लृट्। लेट्। लोट्। लङ्। लिङ्। लुङ्। लृङ्। एषु पञ्चमो लकारः छन्दोमात्र गोचरः॥

लः कर्मणि च भावे चाकर्मकेभ्यः। ३। ४। ६९॥

लकाराः सकर्मकेभ्यः कर्मणि कर्त्तरि च स्युरकर्मकेभ्यो भावे कर्त्तरि च॥

वर्त्तमाने लट्। ३। २। १२३॥

वर्त्तमानक्रियाहत्तेर्धातोर्लट् स्यात्। अटावितौ। उच्चारण-

सामर्थ्यात्तस्य नेत्वम्। भू सत्तायाम्। कर्तृविवक्षायां भू ल इति स्थिते।

तिप् तस् झि सिप् थस् थ मिप् वस् मस्।
तातां झ थास् आथां ध्वम् इड् वहि महिङ्।
३। ४। ७८॥

एतेऽष्टादश लादेशाः स्युः।

लः परस्मैपदम्। १। ४। ९९॥

लादेशाः परस्मैपदसंज्ञाः स्युः॥

तङानावात्मनेपदम्। १। ४। १००॥

तङ् प्रत्याहारः शानच् कानची चैतत्संज्ञाः स्युः। पूर्वसंज्ञाऽपवादः।

अनुदात्तङित आत्मनेपदम्। १। ३। १२॥

अनुदात्तेतो ङितश्च धातोरात्मनेपदं स्यात्।

स्वरितञितः कर्त्रभिप्राये क्रियाफले।१।३।७२॥

स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले।

शेषात् कर्त्तरि परस्मैपदम्। १। ३। ७८॥

आत्मनेपदनिमित्तहीनात् धातोः कर्त्तरि परस्मैपदं स्याद्।

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः।
१। ४। १०१॥

तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत् संज्ञाः स्युः।

तान्येकवचनद्विवचनबहुवचनान्येकशः।

१।४।१०२॥

लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः।

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः।१।४।१०५॥

तिङ् वाच्यकारकवाचिनि युष्मदि अप्रयुज्यमाने प्रयुज्यमाने च मध्यमः स्यात्।

अस्मद्युत्तमः।१।४।१०७॥

तथाभूतेऽस्मद्युत्तमः स्यात्।

शेषे प्रथमः।१।४।१०८॥

मध्यमोत्तमयोरविषये प्रथमः स्यात्। भू तिप् इति स्थिते।

तिङ् शित् सार्वधातुकम्।३।४।११३॥

तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः।

कर्त्तरि शप्।३।१।६८॥

कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात्।

सार्वधातुकार्द्धधातुकयोः।७।३।८४॥

अनयोः परयोरिगन्ताङ्गस्य गुणः स्यात्। अवादेशः। भवति। भवतः।

भोऽन्तः।७।१।३॥

प्रत्ययावयवस्य झस्यान्तादेशः स्यात् । अतो गुणे । भवन्ति । भवसि । भवथः । भवथ ।

अतो दीर्घो यञि । ७ । ३ । १०१ ॥

अतोऽङ्गस्य दीर्घः स्यात् यञादौ सार्वधातुके परे । भवामि । भवावः । भवामः । स भवति । तौ भवतः । ते भवन्ति । त्वं भवसि । युवां भवथः । यूयं भवथ । अहं भवामि । आवां भवावः । वयं भवामः ।

परोक्षे लिट् । ३ । २ । ११५ ॥

भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् । तस्य तिबादयः ।

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः । ३ । ४ । ८२ ॥

लिटस्तिबादीनां नवानां णलादयः नव स्युः । भू णल् इति स्थिते ।

भुवो वुग् लुङ्लिटोः । ६ । ४ । ८८ ॥

भुवो वुगागमः स्यात् लुङ्लिटोरपि । नित्यत्वात् वुग् गुणवृद्धी बाधते ।

लिटि धातोरनभ्यासस्य । ६ । १ । ८ ॥

लिटि परे अनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः आदिभूताद्यचः परस्य तु द्वितीयस्य । भूव् भूव अ इति स्थिते

पूर्वोऽभ्यासः । ६ । १ । ४ ॥

अत्र ये द्वे विहिते तयोः पूर्वः अभ्याससंज्ञः स्यात् ।

हलादिः शेषः । ७ । ४ । ६० ॥

अभ्यासस्यादिर्हल् शिष्यते अन्ये हलो लुप्यन्ते । इति वलोपः ।

झस्तः । ७ । ४ । ५६ ॥

अभ्यासस्याचः झस्तः स्यात् ।

भवतेरः । ७ । ४ । ७३ ॥

भवतेरभ्यासस्योकारस्य अः स्याल्लिटि ।

अभ्यासे चर् च । ८ । ४ । ५४ ॥

अभ्यासे झलां चरः खुर्जशश्च । झशां जशः खयां चर इति विवेकः । बभूवः । बभूवतुः । बभूवुः ।

लिट् च । ३ । ४ । ११५ ॥

लिङादेशस्तिङार्द्धधातुकसंज्ञ एव स्यात् नतु सार्वधातुकसंज्ञः तेन शबादयो न ।

आर्द्धधातुकस्येड्वलादेः । ७ । २ । ३५ ॥

वलादेरार्द्धधातुकस्य इडागमः स्यात् । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ।

अनद्यतने लुट् । ३ । ३ । १५ ॥

भविष्त्यनद्यतनेऽर्थे धातोर्लुट् स्यात् ।

स्यतासी लृलुटोः । ३ । १ । ३३ ॥

धातोः स्यतासी एतौ स्तो लृलुटोः परतः । शबाद्यपवादः । लृ इति लड् लटोर्ग्रहणम् ।

आर्द्धधातुकं शेषः। २। ४। ११४॥

तिङ् शित्सार्वधातुकोऽन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात्। इट्॥

लुटः प्रथमस्य डारौरसः। २। ४। ८५॥

डारौरस एते क्रमात् स्युः डित्वसामर्थ्यादभस्यापि टेर्लोपः। भविता।

तासस्योर्लोपः। ७। ४। ५०॥

तासेरस्तेश्च सलोपः स्यात् सादौ प्रत्यये परे॥

रि च। ७। ४। ५१॥

रादौ प्रत्यये तथा। भवितारौ। भवितारः। भवितासि। भवितास्थः। भवितास्थ। भवितास्मि। भवितास्वः। भवितास्मः।

लृट् शेषे च। ३। ३। १३॥

भविष्यदर्थाद्धातोर्लृट् स्यात् क्रियार्थायां क्रियायां सत्यामसत्यां च। स्य इट्। भविष्यति। भविष्यतः। भविष्यन्ति। भविष्यसि। भविष्यथः। भविष्यथ। भविष्यामि। भविष्यावः। भविष्यामः।

लोट् च। ३। ३। १६२॥

विध्याद्यर्थेषु धातोर्लोट् स्यात्।

आशिषि लिङ्लोटौ। ३। ३। १७३॥

एरुः। ३। ४। ८६॥

लोट इकारस्य उः स्यात् । भवतु ।

तुह्योस्तातङाशिष्यन्यतरस्याम् । ७ । १ । ३५ ॥

आशिषि तुह्योस्तातङ् वा स्यात् । परत्वात्सर्वादेशः । भवतात् ।

लोटो लङ्वत् । ३ । ४ । ८५ ॥

लोटो लङ इव कार्यं स्यात् । तेन तामादयः सलोपश्च ।

तस्थस्थमिपान्तान्तान्नाम: । ३ । ४ । १०१ ॥

ङितश्चतुर्णामेषां तामादयः क्रमात् स्युः । भवताम् । भवन्तु ।

सेर्ह्यपिच्च । ३ । ४ । ८७ ॥

लोटः सेर्हिः स्यात् सोऽपिच्च ।

अतो हेः । ६ । ४ । १०५ ॥

अतः परस्य हेः लुक् स्यात् । भव भवतात् । भवतम् भवत ।

मेर्निः । ३ । ४ । ८९ ॥

लोटः मेः निः स्यात् ।

आडुत्तमस्य पिच्च । ३ । ४ । ९२ ॥

लोडुत्तमस्याडागमः स्यात् सपिच्च । ह्निधोरुत्वं न इकारोच्चारणसामर्थ्यात् । भवानि ।

ते प्राग्धातोः । १ । ४ । ८० ॥

ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्याः ।

आनि लोट् । ८ । ४ । १६ ॥

उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीति नस्य णः स्यात् । प्रभवाणि ।

दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः । दुःस्थितिः । दुर्भवानि ।

अन्तःशब्दस्याङ् किविधिणत्वेषूपसर्गत्वं वाच्यम् । अन्तर्भवाणि ।

नित्यं ङितः । ३ । ४ । ९९ ॥

सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः स्यात् । अलोऽन्त्यस्येति सलोपः । भवाव । भवाम ।

अनद्यतने लङ् । ३ । २ । १११ ॥

अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात् ।

लङ् लुङ् लृङ् क्ष्वडुदात्तः । ६ । ४ । ७१ ॥

एषु परेषु अङ्गस्य अड़ागमः स्यात् । सचोदात्तः ।

दृतश्च । ३ । ४ । १०० ॥

ङितो लस्य परस्मैपदमिकारान्तं यत्तदन्तस्य लोपः स्यात् । अभवत् । अभवताम् । अभवन् । अभवः । अभवतम् । अभवत । अभवम् । अभवाव । अभवाम ।

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् । ३ । ३ । १६१ ॥

एष्वर्थेषु द्योत्येषु वाच्येषु वा धातोर्लिङ् स्यात् ।

यासुट् परस्मैपदेषूदात्तो ङिच्च ।३।४।१०३ ॥

लिङः परस्मैपदानां यासुडागमः स्यात् स चोदात्तः ङिच्च ।

लिङः सलोपोऽनन्त्यस्य । ७ । २ । ७९ ॥

सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः स्यात् । इति प्राप्ते ।

अतो येयः। ७। २। ८०॥

अतः परस्य सार्वधातुकावयवस्य यास् इत्यस्य इय् स्यात्। गुणः।

लोपोव्योर्वलि। ६। १। ६६॥

भवेत्। भवेताम्।

झेर्जुस्। ३। ४। १०८॥

लिङः झेर्जुस् स्यात्। ज इत्। भवेयुः। भवेः। भवेतम्। भवेत। भवेयम्। भवेव। भवेम।

लिङाशिषि। ३। ४। ११६॥

आशिषि लिङस्तिङाद्यधातुकसंज्ञः स्यात्।

किदाशिषि। ३। ४। १०४॥

आशिषि लिङो यासुट् कित् स्यात्। स्कोः संयोगाद्योरिति सलोपः।

क्ङिति च। १। १। ५॥

गिक्ङिन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः। भूयात्। भूयास्ताम्। भूयासुः। भूयाः। भूयास्तम्। भूयास्त। भूयासम्। भूयास्व। भूयास्म।

लुङ्। ३। २। ११०॥

भूतार्थे धातोर्लुङ् स्यात्।

माङि लुङ्। ३। ३। १७५॥

सर्वलकारापवादः।

स्मोत्तरे लङ् च। ३। ३। १७६॥

स्मोत्तरे माङि लङ् स्यात् चाङ्गुङ् च।

च्लि लुङि। ३। १। ४३॥

शबाद्यपवादः।

च्लेः सिच्। ३। १। ४४॥

इचावितौ।

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु।२।४।७७॥

एभ्यः सिचो लुक् स्यात्। गापाविड्डेणादेश्च पिबती गृह्णेते।

भूसुवोस्तिङि। ७। ३। ८८॥

भूसू एतयोः सार्वधातुके तिङि परे गुणो न स्यात्। अभूत्। अभूताम्। अभूवन्। अभूः। अभूतम्। अभूत। अभूवम्। अभूव। अभूम।

न माङ्योगे। ६। ४। ७४॥

अडाटौ न स्तः। मा भवान् भूत्। मास्म भवत्। मास्म-भूत्।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ। ३। ३। १३९॥

हेतु हेतुमद्भावादिलिङ्निमित्तं तत्र भविष्यत्यर्थे लङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम्। अभविष्यत्। अभविष्यताम्। अभविष्यन्। अभविष्यः। अभविष्यतम्। अभविष्यत। अभविष्यम्। अभविष्याव। अभविष्याम। सुवृष्टिश्चेदभविष्यत्

तदा सुभिक्षमभविष्यत्। इत्यादि ज्ञेयम्। अत सातत्यगमने। २। अतति।

अत आदेः। ६। ४। ७०॥

अभ्यासस्यादेरतो दीर्घः स्यात्। आत। आततुः। आतुः। आतिथ। आतथुः। आत। आत। आतिव। आतिम। अतिता। अतिष्यति। अततु।

आडजादीनाम्। ६। ४। ७२॥

अजादेरङ्गस्याड् लङ् लुङ् लृङ्षु। आतत्। अतेत्। अत्यात् अत्यास्ताम्। लुङि सिचि इड़ागमे कृते।

अस्तिसिचोऽपृक्ते। ७। ३। ९६॥

विद्यमानात् सिचोऽस्तेश्च परस्यापृक्तस्य हल ईड़ागमः स्यात्।

इट ईटि। ८। २। २८॥

इटः परस्य सस्य लोपः स्यादीटि परे। सिज्लोप एकादेशे सिद्धो वाच्यः। आतीत्। आतिष्टाम्।

सिजभ्यस्तविदिभ्यश्च। ३। ४। १०९॥

सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्सम्बन्धिनो झेर्जुस् स्यात्। आतिषुः। आतीः। आतिष्टम्। अतिष्ट। आतिषम्। आतिष्व। आतिष्म। आतिष्यत्। षिधु गत्याम्। ३।

ह्रस्वं लघु। १। ४। १०॥

संयोगे गुरु। १। ४। ११॥

संयोगे परे ह्रस्वं गुरु।

दीर्घञ्च। १। ४। १२॥

गुरु स्यात्।

पुगन्तस्य लघूपधस्य च । ७ । ३ । ८६ ॥

पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात् सार्वधातुकार्द्धधातुकयोः । धात्वादेरिति सः । सेधति । षत्वम् । सिषेध ।

असंयोगाल्लिट् कित् । १ । २ । ५ ॥

असंयोगात् परोऽपिल्लिट् कित् स्यात् । सिषिधतुः । सिषिधुः । सिषेधिथ । सिषिधथुः । सिषिध । सिषेध । सिषिधिव । सिषिधिम । सेधिता । सेधिष्यति । सेधतु । असेधत् । सेधेत् । सिध्यात् । असेधीत् । असेधिष्यत् । एवं चितौ संज्ञाने । ४ । शुचशोके । ५ । गदव्यक्तायां वाचि । ६ । गदति ।

नेर्गदनदपतपदघुमास्यतिहन्तियातिवाति-द्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च । ८ । ४ । १७ ॥

उपसर्गस्थान्निमित्तात् परस्य नेर्णः स्यात् गदादिषु परेषु । प्रणिगदति ।

कुहोश्चुः । ७ । ४ । ६२ ॥

अभ्यासकवर्गहकारयोश्चवर्गादेशः स्यात् ।

अत उपधायाः । ७ । २ । ११६ ॥

उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे । जगाद । जगदतुः । जगदुः । जगदिथ । जगदथुः । जगद ।

णलुत्तमो वा । ७ । १ । ९१ ॥

उत्तमो णल् वा णित् स्यात् । जगाद । जगद । जगदिव । जगदिम । गदिता । गदिष्यति । गदतु । अगदत् । गदेत् । गद्यात् ।

अतो हलादेर्लघोः । ७ । २ । ७ ॥

हलादेर्लघोरकारस्य वृद्धादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात्। अगादीत्। अगदीत्। अगदिष्यत्। णद अव्यक्ते शब्दे।

णो नः । ६ । १ । ६५ ॥

धातोरादेर्णस्य नः स्यात्। णोपदेशास्त्वनर्दनाटिनाथ्वान्द्रनक्वनृनृतः।

उपसर्गादसमासेऽपि णोपदेशस्य ।८।४।१४ ॥

उपसर्गस्थान्निमित्तात् परस्य णोपदेशस्य धातोर्नस्य णः। प्रणदति। प्रणिनदति। नदति। ननाद।

अत एकहल्मध्येऽनादेशादेर्लिटि । ६।४।१२० ॥

लिङ्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्थासंयुक्तहल्मध्यस्थस्यात एत्वमभ्यासलोपश्च किति लिटि।

थलि च सेटि । ६ । ४ । १२१ ॥

प्रागुक्तं स्यात्। नेदिथ। नेदथुः। नेद। ननाद। ननद। नेदिव। नेदिम। नदिता। नदिष्यति। नदतु। अनदत्। नदेत्। नद्यात्। अनादीत्। अनदीत्। अनदिष्यत्। टुनदि समृद्धौ ॥ ८ ॥

आदिर्ञिटुडवः । १ । ३ । ५ ॥

उपदेशे धातोराद्या एते इतः स्युः।

डुदितो नुम् धातोः । ७ । १ । ५८ ॥

नन्दति। ननन्द। नन्दिता। नन्दिष्यति। नन्दतु। अनन्दत्। नन्देत्। नन्द्यात्। अनन्दीत्। अनन्दिष्यत्। अर्च पूजायाम्। ९। अर्चति।

तस्मान्नुड् द्विहलः। ७। ४। ७१॥

द्विहलोधातोर्दीर्घीभूतात् अकारात् परस्य नुट् स्यात्। आनर्च्छ। आनर्च्छतुः। अर्चिता। अर्चिष्यति। अर्चतु। आर्चत्। अर्चेत्। अर्च्यात्। आर्चीत्। आर्चिष्यत्। व्रज गतौ। १०। व्रजति। व्रव्राज। व्रजिता। व्रजिष्यति। व्रजतु। अव्रजत्। व्रजेत्। व्रज्यात्।

वदव्रजहलन्तस्याचः। ७। २। ३॥

एषामचो वृद्धिः सिचि परस्मैपदेषु। अव्राजीत्। अव्रजिष्यत्। कटे वर्षाचरण्ययोः। ११। कटति। चकाट। कटिता। कटिष्यति। कटतु। अकटत्। कटेत्। कट्यात्।

ह्मन्तक्षणश्वसजागृणिश्व्येदिताम्। ७।२।५॥

हमयान्तस्य क्षणादेर्णान्तस्य श्वयतेरेदितश्च वृद्धिः न स्यात् ङ्डादौ सिचि। अकटीत्। अकटिष्यत्। गुपू रक्षणे।

गुपूधूपविच्छिपणिपनिभ्य आयः। ३।१।२८॥

एभ्यः आयप्रत्ययः स्यात् स्वार्थे।

सनाद्यन्ता धातवः। ३। १। ३२॥

सनादयः कर्मेर्ण्यडन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञकाः स्युः। धातुत्वाल्लडादयः। गोपायति।

आयादय आर्द्धधातुके वा। ३। १। ३१॥

आर्द्धधातुकविवक्षायामायादयो वा स्युः। कास्यनेकाच आम् वक्तव्यः।

लिटि आस् कासोराम् विधानान्नस्य नेत्वम्।

अतो लोपः। ६। ४। ४८॥

आर्द्धधातुकोपदेशे यददन्तं तस्यातो लोपः स्यात् आर्द्धधातुके परे।

आमः। २। ४। ८१॥

आमः परस्य लुक् स्यात्।

क्ष्वाह्वानुप्रयुज्यते लिटि। ३। १। ४०॥

आमन्ताल्लिट् परा: क्ष्वस्तयोऽनुप्रयुज्यन्ते। तेषान्द्वित्वादि।

उरत्। ७। ४। ६६॥

अभ्यासऋवर्णस्य अत् स्यात् प्रत्यये परे। गोपायाञ्चकार। द्वित्वा ! परत्वाद्यण प्राप्ते।

द्विर्वचनेऽपि। १। १। ५९॥

द्वित्वनिमित्तेऽचि परे अच आदेशो न स्यात् द्वित्वे कर्त्तव्ये। गोपायाञ्चक्रतुः।

एकाच उपदेशेऽनुदात्तात्। ७। २। १०॥

उपदेशे यो धातुरेकाच् अनुदात्तश्च ततः परस्य आर्द्धधातुकस्येड् न स्यात्। जहदन्तैर्यौतिरुच्छ्युशीङ्नुनुत्तु ष्विड़ीङ् श्विभिः। व्रड्व्रज्भ्याञ्च विनैकाचोऽजन्तेषु निहताः स्मृताः। कान्तेषु शक्येकः। चान्तेषु पच् मुच् रिच् वच् विच् सिचः षट्। छान्तेषु प्रक्षेकः। जान्तेषु त्यज् निज् भज् भञ्ज् भुज् भ्रस्ज् मस्ज् यज् युज् रुज् रञ्ज् विजिर् स्वञ्ज् सञ्ज् सृजः पञ्चदश। दान्तेषु अद् क्षुद् खिद् छिद् नुद् तुद् पद्य भिद् विद्य विनद् विन्द् शद् सद् स्विद्य स्कन्दि स्कन्दी षोड़श॥ धान्तेषु क्रुध् क्षुध् बुध्य बन्ध युध् रुध् राध् व्यध् शुध् साध् सिध्य एकादश। नान्तेषु मन्यहनौ द्वौ। पान्तेषु आप् क्षिप् क्षुप् तप् तिप् तृप्य दृप्य लिप् लुप् वप् शप्

स्वप् स्पर्शयोदश। भान्तेषु यभ् रभ् लभस्त्रयः। मान्तेषु गम् नम् यम् रमश्चत्वारः। शान्तेषु। क्रुश् दंश् दिश् दृश् मृश् रिश् रुश् लिश् विश् स्पृशो दश। षान्तेषु कृष् त्विष् तुष् द्विष् दुष् पुष्य पिष् विष् शिष् शुष् श्लिष् एकादश। सान्तेषु। घस् वसतौ द्वौ। हान्तेषु दह् दिह् दुह् नह् मिह् रुह् लिह् वहोऽष्टौ। अनुदात्ता हलन्तेषु धातवस्त्र्यधिकं शतम्। गोपायाञ्चकर्थ। गोपायाञ्चक्रथुः। गोपायाञ्चक्रे। गोपायाञ्चकार। गोपायाञ्चक्रव। गोपायाञ्चक्रम। गोपायांबभूव। गोपायामास। जुगोप। जुगुपतुः। जुगुपुः।

स्वरतिसूतिसूयतिधूञूदितो वा। ७।२।४४॥

स्वरत्यादेरूदितश्च परस्य बलादेरार्धधातुकस्येड् वा स्यात्। जुगोपिथ। जुगोप्थ। गोपायिता। गोपिता। गोप्ता। गोपायिष्यति। गोपिष्यति। गोप्स्यति। गोपायतु। अगोपायत्। गोपायेत्।

नेटि। ७। २। ४॥

इड़ादौ सिचि हलन्तस्य वृद्धिर्न स्यात्। अगोपायीत्। अगोपीत्। अगोप्सीत्।

झलो झलि। ८। २। २६॥

झलः परस्य सस्य लोपः स्यात् झलि। अगोप्ताम्। अगोप्तुः। अगोप्सीः। अगोप्तम्। अगोप्त। अगोप्सम्। अगोप्स्व। अगोप्स्म। अगोपायिष्यत्। अगोपिष्यत्। अगोप्स्यत्। चि क्षये। १२। क्षयति। चिक्षाय। चिक्षियतुः। चिक्षियुः। एकाच इति निषेधे प्राप्ते।

क्नस्नुभ्रुस्तुद्रुस्रुश्रुवो लिटि। ७। २। १३॥

क्रादिभ्यः एव लिटि इट् न स्यादन्यस्मादनिटोऽपि स्यात्।

अचस्तास्वत्थल्यनिटो नित्यम्। ७। २। ६१॥

उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततस्थल इण् न।

उपदेशेऽत्वतः। ७। २। ६२॥

उपदेशेऽकारवान् यस्तासौ नित्यानिट् ततः परस्य थल इड् न स्यात्।

ऋतो भारद्वाजस्य। ७। २। ६३॥

तासौ नित्यानिटः ऋदन्तस्यैव थलो नेट् भारद्वाजस्य मतेन। तेन अन्यस्य स्यादेव। अयमत्र संग्रहः।

अजन्तोऽकारवान् वा यस्तास्यनिट् थलि वेड्यम्।

ऋदन्त ईट्टङ् नित्यानिट् क्रादन्यो लिटि सेड् भवेत्।

चिक्षयिथ। चिक्षेथ। चिक्षियथुः। चिक्षिय। चिक्षाय। चिक्षय। चिक्षियिव। चिक्षियिम। क्षेता। क्षेष्यति। क्षयतु। अक्षयत्। क्षयेत्।

अकृत्सार्वधातुकयोर्दीर्घः। ७। ४। २५॥

अजन्ताङ्गस्य दीर्घः स्यात् यादौ प्रत्यये परे न तु कृत्सार्वधातुकयोः। क्षीयात्।

सिचि वृद्धिः परस्मैपदेषु। ७। २। १॥

इगन्ताङ्गस्य वृद्धिः स्यात् परस्मैपदे सिचि। अक्षैषीत्। अक्षेष्यत्। तप सन्तापे। १४। तपति। ततापः तेपतुः। तेपुः। तेपिथ। ततप्थ। तप्ता। तप्स्यति। तपतु। अतपत्।

तपेत्। तप्यात्। अतापीत्। अतापताम्। अतप्सत्। क्रमु पादविक्षेपे। १५।

वा भ्राशम्भ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः

। ३। १। ७०॥

एभ्यः श्यन्वा स्यात् कर्त्तर्यें सार्वधातुके परे। पक्षे शप्।

क्रमः परस्मैपदेषु। ७। ३। ७६॥

क्रमो दीर्घः स्यात् परस्मैपदे ञिति। क्राम्यति। क्रामति। चक्राम। क्रमिता। क्रमिष्यति। क्राम्यतु। क्रामतु। अक्राम्यत्। अक्रामत्। क्राम्येत्। क्रामेत्। क्रम्यात्। अक्रमीत्। अक्रमिष्यत्। पा पाने। १६।

पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदाम्पिब-

जिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः।

७। ३। ७८॥

पादीनाम्पिबादयः स्युरित्यं ञ्णकशादौ प्रत्यये परे। पिबादेशोऽदन्तस्तेन न गुणः। पिबति।

आत औ णलः। ७। १। ३४॥

पपौ।

आतो लोप इटि च। ६। ४। ६४॥

अजाद्योरार्द्धधातुकयोः क्ङिदिटोः परयोरातो लोपः स्यात्।

पपतुः। पपुः। पपिथ। पपाथ। पपथुः। पप। पपौ। पपिव। पपिम। पाता। पास्यति। पिबतु। अपिबत्। पिबेत्।

एर्लिङि। ६। ४। ६७॥

घुसंज्ञकानां माख्यादीनाञ्च एत्वं स्यादार्द्धधातुके किति लिङि। पेयात्। गातिस्थेति सिचो लुक्। अपात्। अपाताम्।

आतः। ३। ४। ११०॥

सिज्लुकि आदन्तादेव झेर्जुस् स्यात्।

उस्यपदान्तात्। ६। १। ९६॥

अपदान्तादकारादुसि पररूपमेकादेशः स्यात्। अपुः। अपास्यत्। ग्लै हर्षक्षये। १७। ग्लायति।

आदे च उपदेशेऽशिति। ६। १। ४५

उपदेशे एजन्तस्य धातोरात्वन्तु शिति। जग्लौ। ग्लाता। ग्लास्यति। ग्लायतु। अग्लायत्। ग्लायेत्।

वान्यस्य संयोगादेः। ६। ४। ६८॥

घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा स्यात् आर्द्धधातुके किति लिङि। ग्लेयात्। ग्लायात्।

यमरमनमातां सक् च। ७। २। ७३॥

एषां सक् स्यादेभ्यः सिच इट् स्यात् परस्मैपदेषु। अग्लासीत्। अग्लास्यत्। ह्वृ कौटिल्ये। १८। ह्वरति।

ऋतश्च संयोगादेर्गुणः। ७। ४। १०॥

ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्यात् लिटि। उपधाया ह्रस्वः। जह्वार। जह्वरतुः। जह्वरुः। जह्वर्थ। जह्वरथुः। जह्वर। जह्वार। जह्वर। जह्वरिव। जह्वरिम। ह्वर्त्ता।

ऋदृनोः स्ये। ७। २। १०॥

ऋतो हन्तेश्च स्यस्य इट् स्यात्। हरिष्यति। हरतु। अहरत्। हरेत्।

गुणोऽर्तिसंयोगाद्योः। ७। ४। २९॥

अर्त्तेः संयोगादेर्ऋदन्तस्य च गुणः स्यात् यकि यादावार्द्धातुके लिङि च। हर्य्यात्। अहार्षीत् अहरिष्यत्। सु श्रवणे। १८।

श्रुवः शृ च। ३। १। ७४॥

श्रुवःशृ इत्यादेशः स्यात् श्नु प्रत्ययश्च। शृणोति।

सार्वधातुकमपित्। १। २। ४॥

अपित् सार्वधातुकं ङिद्वत् स्यात् शृणुतः।

हुश्नुवोः सार्वधातुके। ६। ४। ८७॥

हुश्नुवोरनेकाचोऽसंयोगपूर्वस्योवर्णस्य यण् स्यादचि सार्वधातुके। शृण्वन्ति। शृणोषि। शृणुथः। शृणुथ। शृणोमि।

लोपश्चास्यान्यतरस्यां म्वोः। ६। ४। १०७॥

असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा स्यात् मवयो परयोः। शृण्वः। शृणुवः। शृण्मः। शृणुमः। शुश्राव। शुश्रुवतुः। शुश्रुवुः। शुश्रोथ। शुश्रुवथुः। शुश्रुव। शुश्राव। शुश्रुव। शुश्रुम। श्रोता। श्रोष्यति। शृणोतु। शृणुताम्। शृण्वन्तु।

उतश्च प्रत्ययादसंयोगपूर्वात्। ६। ४। १०६॥

असंयोगपूर्वात् प्रत्ययोतो हेर्लुक् स्यात्। शृणु। शृणुतात् शृणुतम्। शृणुत। गुणावादेशौ। शृणवानि। शृणवाव। शृणवाम।

अशृणोत्। अशृणुताम्। अशृण्वन्। अशृणोः। अशृणुतम्। अशृणुत। अशृणवम्। अशृण्व। अशृणुव। अशृणम। अशृणुम। शृणुयात्। शृणुयाताम्। शृणुयुः। शृणुयाः। शृणुयातम्। शृणुयात। शृणुयाम्। शृणुयाव। शृणुयाम। श्रूयात्। अश्रौषीत्। अश्रोष्यत्। गल्ऌ गतौ। २०।

इषुगमियमाञ्छ। ७। ३। ७७॥

एषाञ्छः शिति। गच्छति। जगाम।

गमहनजनखनघसां लोपः क्ङित्यनङि। ६। ४। ९८॥

एषामुपधाया लोपोऽजादौ क्ङिति नत्वङि। जग्मतुः। जग्मुः। जगमिथ। जगन्थ। जगमथुः। जग्म। जगाम। जगम। जग्मिव। जग्मिम। गन्ता।

गमेरिट् परस्मैपदेषु। ७। २। ५८॥

गमेः सादेरार्धधातुकस्येट् स्यात् परस्मैपदेषु। गमिष्यति। गच्छतु। अगच्छत्। गच्छेत्। गम्यात्।

पुषादिद्युतादिर्लृदितः परस्मैपदेषु। ३।१।५५॥

श्यन्विकरण पुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ् स्यात् परस्मैपदेषु। अगमत्। अगमिष्यत्।

इति परस्मैपदप्रक्रिया।

एधत्ऊ। १॥

टित आत्मनेपदानां टेरे। ३। ४। ७९॥

टितो लस्यात्मनेपदानां टेरेत्वम्। एधते।

आतो ङितः । ७ । २ । ८१ ॥

अतः परस्य ङितामाकारस्य इय् स्यात् । एधेते । एधन्ते ।

थासःसे । ३ । ४ । ८० ॥

टितो लस्य थासः से स्यात् । एधसे । एधेथे । एधध्वे । अतो गुणे । एधे । एधावहे । एधामहे ।

इजादेश्च गुरुमतोऽनृच्छः । ३ । १ । ३६ ॥

इजादिर्योधातुर्गुरुमान्नृच्छत्यन्यस्तत आम् स्यात्लिटि ।

आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य । १ । ३ । ६३ ॥

आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः ।
आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात् कृञोऽप्यात्मनेपदं स्यात् ।

लिटस्त झयोरेशिरेच् । ३ । ४ । ८१ ॥

लिडादेशयोस्तझयोरेश् इरेचौ स्तः । एधाञ्चक्रे एधाञ्चक्राते । एधाञ्चक्रिरे । एधाञ्चकृषे । एधाञ्चक्राथे ।

दृणः षीध्वं लुङ् लिटां धोऽङ्गात् ।८।२।७८ ॥

दृणन्तादङ्गात् परेषां षीध्वं लुङ् लिटान्यस्य ढः । एधाञ्चकृढ्वे । एधांचक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे । एधाम्बभूव । एधामास । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे ।

धि च । ८ । २ । २५ ॥

धादौ प्रत्यये सस्य लोपः स्यात् । एधिताध्वे ।

ह एति । ७ । ४ । २५ ॥

तासस्योः सस्य हः स्यात् एति परे । एधिताहे । एधितास्वहे । एधितास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधि-

थसे। एधिषेथे। एधिषध्वे। एधिषे। एधिषावहे। एधिषामहे।

आमेतः। ३। ४। ९०॥

लोट एत आम् स्यात्। एधताम्। एधेताम्। एधन्ताम्।

सवभ्यां वामौ। ३। ४। ९१॥

सवाभ्याम्परस्य लोड़ेतः क्रमाद्वामौ स्तः। एधस्व। ऐधेथाम्। एधध्वम्।

एत ऐ। ३। ४। ९३॥

लोडुत्तमस्य एत ऐ स्यात्। आमोऽपवादः। एधै। एधावहै। एधामहै। आटश्च। ऐधत। ऐधेताम्। ऐधन्त। ऐधथाः। ऐधेथाम्। ऐधध्वम्। ऐधे। ऐधावहि। ऐधामहि।

लिङः सीयुट्। ३। ४। १०२॥

लिङात्मनेपदस्य सीयुडागमः स्यात्। सलोपः। एधेत। एधेयाताम्।

झस्य रन्। ३। ४। १०५॥

लिङः झस्य रन् स्यात्। एधेरन्। एधेथाः। एधेयाथाम्। एधेध्वम्।

इटोऽत्। ३। ४। १०६॥

लिङादेशस्य इटोऽत् स्यात्। एधेय। एधेवहि। एधेमहि।

सुट्तिथोः। ३। ४। १०७॥

लिङस्तकारथकारयोः सुट् स्यात्। यलोपः। आर्धधातुकत्वात् सलोपो न। एधिषीष्ट। एधिषीयास्ताम्। एधि-

षीरन् । एधिषीष्टाः । एधिषीयास्ताम् । एधिषीध्वम् । एधिषीय एधिषीवहि । एधिषीमहि । ऐधिष्ट । ऐधिषाताम् ।

आत्मनेपदेष्वनतः । ७ । १ । ५ ॥

अनकारात् परस्यात्मनेपदेषु झस्य अत् स्यात् । ऐधिषत । ऐधिष्ठाः । ऐधिषाथाम् । ऐधिढ्वम् । ऐधिषि । ऐधिष्वहि । ऐधिष्महि । ऐधिष्यत । ऐधिष्येताम् । ऐधिष्यन्त । ऐधिष्यथाः । ऐधिष्येथाम् । ऐधिष्यध्वम् । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि । कमु कान्तौ ॥ २ ॥

कमेर्णिङ् । ३ । १ । ३० ॥

स्वार्थे । ङित्त्वात्तङ् । कामयते ।

अयामन्ताल्वाय्येत्न्विष्णुषु । ६ । ४ । ५५ ॥

आम् अन्त आलु आय्य इत्नु इष्णु एषु णेः अयादेशः स्यात् । कामयाञ्चक्रे । आयादय इति णिङ् वा । चकमे । चकमाते । चकमिरे । चकमिषे । चकमाथे । चममिध्वे । चकमे । चकमिवहे । चकमिमहे । कामयिता । कामयितासे । कमिता । कामयिष्यते । कमिष्यते । कामयताम् । अकामयत । कामयेत । कामयिषीष्ट । कमिषीष्ट ।

णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ् । ३ । १ । ४८ ॥

ण्यन्तात् श्यादिभ्यश्च च्लेश्चङ् कर्तर्यर्थे लुङि परे । कामि अत इति स्थिते ।

णेरनिटि । ६ । ४ । ५१ ॥

अनिड़ादावार्द्धधातुके परे णेर्लोपः स्यात् ।

णौ चङ्युपधाया ह्रस्वः । ७ । ४ । १ ॥

चङ् परे णौ यदङ्गस्योपधाया ह्रस्वः स्यात् ।

चङि। ६। १। ११॥

अनभ्यासधात्ववयवस्यैकाचः प्रथमस्य हे स्तोऽजादेस्तु द्वितीयस्य।

सन्वल्लघुनि चङ्परेऽनग्लोपे। ७। ४। ९३॥

चङ् परे णौ यदङ्गन्तस्य योऽभ्यासो लघुपरस्तस्य सनीव कार्य्यं स्यात् णावग्लोपेऽसति।

सन्यतः। ७। ४। ७९॥

अभ्यासस्यात इत् स्यात् सनि।

दीर्घो लघोः। ७। ४। ९४॥

लघोरभ्यासस्य दीर्घः सन्वङ्लावविषये। अचीकमत। णिङ्-भावपक्षे।

कमेश्च लेश्वङ् वाच्यः। णेरभावात् न दीर्घसन्वङ्लावौ। अचकमत। अकामयिष्यत। अकमिष्यत। अय गतौ। १। अयते।

उपसर्गस्यायतौ। ८। २। १९॥

अयतावुपसर्गस्य रेफस्य लत्वम् स्यात्। प्लायते। पलायते।

दयायासश्च। ३। १। ३७॥

दय अय आस् एभ्य आम् स्यात् लिटि। अयाञ्चक्रे। अयिता। अयिष्यते। अयताम्। आयत। अयेत। अयिषीष्ट।

विभाषेटः। ८। ३। ७९॥

इणः परो य इट् ततः परेषां षीध्वं लुङ् लिटां धस्य वा ढः। अयिषीध्वम्। अयिषीढ्वम्। आयिष्ट। आयिध्वम्। आयिढ्वम्। आयिष्यत। द्युत दीप्तौ। ४। द्योतते

द्युतिस्वाप्योः संप्रसारणम् । ७ । ४ । ६७ ॥

अनयोरभ्यासस्य संप्रसारणं स्यात् । दिद्युते ।

द्युद्भ्यो लुङि । १ । ३ । ९१ ॥

द्युतादिभ्यः परस्मैपदं वा लुङि । पुषादीत्यङ् । अद्युतत् । अद्योतिष्ट । अद्योतिष्यत । एवं श्विता वर्णे ॥ ५ ॥ ञिमिदा स्नेहने ॥ ६ ॥ ञिष्विदा स्नेहनमोचनयोः ॥ ७ ॥ मोहनयोरित्येके । ञिक्ष्विदा चेत्येके । रुच दीप्तावभिप्रीतौ च ॥ ८ ॥ घुट परिवर्त्तने ॥ ९ ॥ शुभ दीप्तौ ॥ १० ॥ क्षुभ सञ्चलने ॥ ११ ॥ णभ तुभ हिंसायाम् ॥ १२ ॥ १३ ॥ स्रंसु भ्रंसु ध्वंसु अवस्रंसने ॥ १४ ॥ १५ ॥ १६ ॥ ध्वंसु गतौ ॥ १७ ॥ स्रंभु विश्वासे ॥ १८ ॥ वृतु वर्त्तने ॥ १९ ॥ वर्त्तते । ववृते । वर्त्तिता ।

वृद्भ्यः स्यसनोः । १ । ३ । ९२ ॥

वृतादिभ्यः पञ्चभ्यो वा परस्मैपदं स्यात् स्ये सनि च ।

न वृद्भ्यश्चतुर्भ्यः । ७ । २ । ५९ ॥

वृतु वृधु शृधुस्यन्द्भ्यः सादेरार्धधातुकस्येण् न स्यात् तङानयोरभावे । वर्त्स्यति । वर्त्तिष्यते । वर्त्तताम् । अवर्त्तत । वर्त्तेत । वर्त्तिषीष्ट । अवर्त्तिष्ट । अवर्त्स्यत् । अवर्त्तिष्यत । ददृ दाने ॥ २० ॥ ददते ।

न शसददवादिगुणानाम् । ६ । ४ । १२६ ॥

शसेर्ददेर्दवकारादीनां गुणशब्देन विहितो योऽकारस्तस्य एत्वाभ्यासलोपौ न । दृदते । ददृदाते । ददृदिरे । ददृता । ददृष्यते । ददृताम् । अददृत । ददृत । ददृषीष्ट । अददृष्ट । अददृष्यत् । त्रपूष् लज्जायाम् ॥ १२ ॥ त्रपते ।

तृफलभजत्रपश्च। ६। ४। १२२॥

एषामत एत्वमभ्यासलोपश्च किति लिटि थलि च। त्रेपे। त्रपिता। त्रप्ता। त्रपिष्यते। त्रप्स्यते। त्रपताम्। अत्रपत। त्रपेत। त्रपिषीष्ट। त्रप्सीष्ट। अत्रपिष्ट। अत्रप्त। अत्रपिष्यत। अत्रप्स्यत।

इत्यात्मनेपदप्रक्रिया।

श्रिञ् सेवायाम्॥१॥ श्रयति। श्रयते। शिश्राय। शिश्रिये। श्रयिता। श्रयिष्यति। श्रयिष्यते। श्रयतु। श्रयताम्। अश्रयत्। अश्रयत। श्रयेत्। श्रयेत। श्रीयात्। श्रयिषीष्ट। चङ्। अशिश्रियत्। अशिश्रियत। अश्रयिषत्। अश्रयिषत। भृञ्भरणे॥२॥ भरति। भरते। बभार। बभ्रतुः। बभ्रुः। बभर्थ। बभृव। बभृम। बभ्रे। बभृषे। भर्त्तासि। भर्त्तासे। भरिष्यति। भरिष्यते। भरतु। भरताम्। अभरत्। अभरत। भरेत् भरेत।

रिङ् शयग्लिङ्क्षु। ७। ४। २८॥

शे यकि यादावार्द्धधातुके लिङि च ऋतो रिङ् आदेशः स्यात्। रीङि प्राप्ते रिङ् विधानसामर्थ्याद् दीर्घो न। भ्रियात्।

उ श्च। १। २। १२॥

ऋवर्णान्तात्परो झलादौ लिङ् सिचौ कितौ स्तस्ताङि। भृषीष्ट। भृषीयास्ताम्। अभार्षीत्।

क्ङिति च। १। २। ६॥

सिचो लोपः स्यात् झलि। अभृत। अभरिष्यत्। अभरिष्यत। हृञ् हरणे॥३॥ हरति। हरते। जहार। जह्रे। जह्रतुः। जह्रिव। जह्रिम। जह्रिवे। हर्त्ता। हरिष्यति। हरिष्यते।

हरतु। हरताम्। अहरत्। अहरत। हरेत्। हरेत। क्रियात्। हृषीष्ट। हृषीयास्ताम्। अहार्षीत्। अहृत। अहरिष्यत्। अहरिष्यत। धृञ्। धारणे॥४॥ धरति। धरते। णीञ् प्रापणे॥५॥ नयति। नयते। डुपचष् पाके॥६॥ पचति। पचते। पपाच। पेचिथ। पपक्थ। पेचे। पक्ता। भज सेवायाम्॥७॥ भजति। भजते। बभाज। भेजे। भक्ता। भक्ष्यति। भक्ष्यते। अभाक्षीत्। अभक्त। अभक्षाताम्। यज देवपूजासङ्गतिकरणदानेषु॥८॥ यजति। यजते।

लिड्यभ्यासस्योभयेषाम्। ६। १। १७॥

वचादीनां ग्रह्यादीनां चाभ्यास्य सम्प्रसारणं स्यात् लिटि। इयाज।

वचिस्वपियजादीनां किति। ६। १। १५॥

वचिस्वप्योर्यजादीनाञ्च सम्प्रसारणं स्यात् किति। ईजतुः। ईजुः। इयजिथ। इयष्ठ। ईजे। यष्टा।

षढ़ोः कः सि। ८। २। ४१॥

षस्य ढस्य च क स्यात् सकारे परे। यक्ष्यति। यक्ष्यते। इज्यात्। यक्षीष्ट। अयाक्षीत्। अयष्ट। वह प्रापणे॥८॥ वहति। वहते। उवाह। ऊहतुः। ऊहुः। उवहिथ।

झषस्तथोर्धोऽधः। ८। २। ४०॥

झषः परयोस्तथोर्धः स्याद्वा दधातेः।

ढो ढे लोपः। ८। ३। १३॥

सहिवहोरोदवर्णस्य। ६। ३। ११२॥

अनयोरवर्णस्य ओत् स्यात् ढलोपे सति। उवोढ। ऊढे।

वोढा । वक्ष्यति । अवाक्षीत् । अवोढाम् । अवाक्षुः । अवाक्षीः । अवोढम् । अवोढ । अवाक्षम् । अवाक्ष्व । अवाक्ष्म । अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवक्षाथाम् । अवोढ्वम् । अवक्षि । अवक्ष्वहि । अवक्ष्महि ।

इति भ्वादयः ।

अदादयः ।

अद भक्षणे ॥ १ ॥

अदिप्रभृतिभ्यः शपः । २ । ४ । ७२ ॥

लुक् स्यात् । अत्ति । अत्तः । अदन्ति । अत्सि । अत्थः । अत्थ । अद्मि । अद्वः । अद्मः ।

लिङ्यन्यतरस्याम् । २ । ४ । ४० ॥

अदो घस् ल्ट वा स्यात् लिटि । जघास । उपधालोपः । घस्य चर्त्वम् ।

शासिवसिघसीनाञ्च । ८ । ३ । ६० ॥

इण्कुभ्यां परस्य एषां सस्य षः स्यात् । जक्षतुः । जक्षुः । जघसिथ । जक्षथुः । जक्ष । जघास । जक्षिव । जक्षिम । आद । आदतुः । आदुः ।

इडत्यर्त्तिव्ययतीनाम् । ७ । २ । ६६ ॥

अद् ऋ व्येञ् एभ्यस्थलो नित्यमिट् स्यात् । आदिथ । अत्ता । अत्स्यति । अत्तु । अत्तात् । अत्ताम् । अदन्तु ।

हुझल्भ्यो हेर्धिः । ६ । ४ । १०१ ॥

होर्झलन्तेभ्यश्च हेर्धिः स्यात् । अद्धि । अत्तात् । अत्तम् । अत्त । अदानि । अदाव । अदाम ।

अदः सर्वेषाम्। ७। ३। १००॥

अदः परस्य अपृक्तसार्वधातुकस्य अट् स्यात् सर्वमतेन। आदत्। आत्ताम्। आदन्। आदः। आत्तम्। आत्त। आदम्। आद्व। आद्म। अद्यात्। अद्याताम्। अद्युः। अद्यात्। अद्यास्ताम्। अद्यासुः।

लुङ्सनोर्घस्लृ। २। ४। ३७॥

अदः घस् ल स्यात् लुङि सनि च। ल्दित्वात् अङ्। अघसत्। आत्स्यत्। हन हिंसागत्योः॥ २॥ हन्ति।

अनुदात्तोपदेश वनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति। ६। ४। ३७॥

अनुनासिकान्तानामेषां वनतेश्च लोपः स्यात् झलादौ किति ङिति घरे। यमि रमि नमि गमि हनि मन्यतयोऽनुदात्तोपदेशाः। तनु क्षण क्षिण ऋण ट्वण घृण वनु मनु तनोत्यादयः। हतः। घ्नन्ति। हंसि। हथः। हथ। हन्मि। हन्वः। हन्मः। जघान। जघ्नतुः। जघ्नुः।

अभ्यासाच्च। ७। ३। ५५॥

अभ्यासात् परस्य हन्तेर्हस्य कुत्वम् स्यात्। जघनिथ जघन्थ। जघ्नथुः। जघ्न। जघान। जघन। जघ्निव। जघ्निम। हन्ता। हनिष्यति। हन्तु। हतात्। हताम्। घ्नन्तु।

हन्तेर्जः। ६। ४। ३६॥

झी परे।

असिद्धवदत्राभात्। ६। ४। २२॥

इत ऊर्ध्वम् आपादसमाप्तेराधीयम्। समानाश्रये तस्मिन्

कर्त्तव्ये तदसिद्धम् स्यात्। इति जस्यासिद्धत्वान्न हेर्लुक्। जहि। हतात्। हतम्। हत। हनानि। हनाव। हनाम। अहन्। अहताम्। अघ्नन्। अहन्। अहतम्। अहत। अहनम्। अहन्व। अहन्म। हन्यात्।

आर्धधातुके। २। ४। ३५॥

इत्यधिकृत्य।

हनो वध लिङि। २। ४। ४२॥

लुङि च। २। ४। ४३॥

वधादेशोऽदन्तः। आर्धधातुक इति विषयसप्तमी। तेन आर्धधातुके उपदेशे अकारान्तत्वादतो लोपः। वध्यात्। वध्यास्ताम्। अवधीत्। अहनिष्यत्।

यु मिश्रणामिश्रणयोः॥ ३॥

उतो वृद्धिर्लुकि हलि। ७। ३। ८९॥

लुग्विषये उतो वृद्धिः स्यात् पिति हलादौ सार्वधातुके नत्वभ्यस्तस्य। यौति। युतः। युवन्ति। यौषि। युथः। युथ। यौमि। युवः। युमः। युयाव। यविता। यविष्यति। यौतु। युतात्। अयौत्। अयुताम्। अयुवन्। युयात्। इह उतो वृद्धिर्न भाष्ये "पिच्च ङिन्न ङिच्च पिन्नेति" व्याख्यानात्। युयाताम्। युयुः। यूयात्। यूयास्ताम्। यूयासुः। अयावीत्। अयविष्यत्। या प्रापणे॥ ४॥ याति। यातः। यान्ति। ययौ। याता। यास्यति। यातु। अयात्। अयाताम्।

लङः शाकटायनस्यैव। ३। ४। १११॥

आदन्तात् परस्य लङो झेर्जुस् वा स्यात्। अयुः। अयान्। यात्। यायाताम्। यायुः। यायात्। यायास्ताम्। यायासुः।

अयासीत् । अयास्यत् । एवं वा गतिगन्धनयोः ॥ ५ ॥ भा दीप्तौ ॥ ६ ॥ णा शौचे ॥ ७ ॥ आ पाके ॥ ८ ॥ द्रा कुत्सायां गतौ ॥ ९ ॥ प्सा भक्षणे ॥ १० ॥ रा दाने ॥ ११ ॥ ला आदाने ॥१२॥ दा प्लवने ॥ १३ ॥ ख्या प्रकथने ॥ १४ ॥ अयं सार्वधातुके एव प्रयोक्तव्यः । विद ज्ञाने ॥ १५ ॥

विदो लटो वा । ३ । ४ । ८३ ॥

वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे । वेत्ति । वित्तः । विदन्ति ।

उषविदजागृभ्योऽन्यतरस्याम् । ३ । १ । ३८ ॥

एभ्यो लिङ्याम् वा स्यात् । विदेरदन्तत्वप्रतिज्ञानादामि न गुणः । विदाञ्चकार । विवेद । वेदिता । वेदिष्यति ।

विदाङ्कुर्वन्त्वित्यन्यतरस्याम् । ३ । १ । ४१ ॥

वेत्तेर्लोट्याम् । गुणाभावो लोटो लुग् लोड्न्तकरोत्यनुप्रयोगश्च वा निपात्यते । पुरुषवचने न विवक्षिते । विदाङ्करोतु ।

तनादिकृञ्भ्यः उः । ३ । १ । ७९ ॥

तनादेः कृञश्च उप्रत्ययः स्यात् । श्नोऽपवादः ।

अत उत् सार्वधातुके । ६ । ४ । ११० ॥

उप्रत्ययान्तस्य कृञोऽत उत् स्यात् सार्वधातुके क्ङिति । विदाङ्करुतात् । विदाङ्करुताम् । विदाङ्कुर्वन्तु । विदाङ्करुः । विदाङ्करवाणि । अवेत् अवित्ताम् । अविदुः ।

दश्च । ८ । २ । ७५ ॥

धातोर्दस्य पदान्तस्य सिपि रुर्वा स्यात् । अवेः । अवेत् ।

विद्यात्। विद्यास्ताम्। अवेदीत्। अवेदिष्यत्। अस भुवि ॥१६॥ अस्ति।

असोरल्लोपः। ६। ४। १११॥

अस्यास्तेश्चातो लोपः सार्वधातुके क्ङिति। स्तः। सन्ति। असि। स्थः। स्थ। अस्मि। स्वः। स्मः।

उपसर्गप्रादुर्भ्यामस्तिर्य्यच् परः। ८। ३। ८७॥

उपसर्गेभ्यः प्रादुसश्च परस्य अस्तेः सस्य षः स्यात् यकारेऽचि च परे। निष्यात्। प्रनिषन्ति। प्रादुःषन्ति। यच् परः किम्। अभिस्तः।

अस्तेर्भूः। २। ४। ५२॥

आईधातुके। बभूव। भविता। भविष्यति। अस्तु। स्तात्। स्ताम्। सन्तु।

घ्वसोरेडावभ्यासलोपश्च। ६। ४। ११९॥

घोरस्तेश्च एत्वं स्यात् हौ परे अभ्यासलोपश्च। एधि। स्तात्। स्तम्। स्त। असानि। असाव। असाम। आसीत्। आस्ताम्। आसन्। स्यात्। स्याताम्। स्युः। भूयात्। अभूत्। अभविष्यत्। इण् गतौ ॥ १७॥ एति। इतः।

इणो यण्। ६। ४। ८१॥

अजादौ प्रत्यये परे। यन्ति।

अभ्यासस्यासवर्णे। ६। ४। ७८॥

अभ्यासस्य इउवर्णयोरियङुवङौ स्तोऽसवर्णेऽचि। इयाय।

दीर्घ इणः किति। ७। ४। ६९॥

इणोऽभ्यासस्य दीर्घः स्यात् किति लिटि। ईयतुः। ईयुः।

इयथिथ। इयेथ। एता। एष्यति। एतु। ऐत्। ऐताम्। आयन्। इयात्। ईयात्।

एतेर्लिङि। ७। ४। २४॥

उपसर्गात्परस्य इणोऽणो ङ्खः स्यात् आर्धधातुके किति लिङि। निरियात्। उभयत आश्रयणं नान्तादिवत्। अभीयात्। अणः किम्?। समियात्।

इणो गा लुङि। २। ४। ४५॥

गातिस्थेति सिचो लुक्। अगात्। ऐष्यत्। शीङ् स्वप्ने। १८।

शीङ सार्वधातुके गुणः। ७। ४। २१॥

शेते। शयाते।

शीङो रुट्। ७। १। ६॥

शीङो झादेशस्यातो रुट् स्यात्। शेरते। शेषे। शयाथे। शेध्वे। शये। शेवहे। शेमहे। शिश्ये। शिश्याते। शिश्यिरे। शयिता। शयिष्यते। शेताम्। शयाताम्। शेरताम्। अशेत। अशयाताम्। अशेरत। शयीत। शयीयाताम्। शयीरन्। शयिषीष्ट। अशयिष्ट। अशयिष्यत। इङ् अध्ययने। १९। इङ्कावध्युपसर्गतो न व्यभिचरतः। अधीते। अधीयाते। अधीयते।

गाङ् लिटि। २। ४। ४९॥

इङः गाङ् स्यात् लिटि। अधिजगे। अध्येता। अध्येष्यते। अधीताम्। अधीयाताम्। अधीयताम्। अधीष्व। अधीयाथाम्। अधीध्वम्। अध्ययै। अध्ययावहै। अध्ययामहै। अध्यैत। अध्यैयाताम्। अध्यैयत। अध्यैथाः। अध्यैयाथाम्। अध्यैध्वम्।

अध्यैयि। अध्यैवहि। अध्यैमहि। अधीयीत। अधीयीयाताम्। अधीयीरन्। अध्यैषीष्ट।

विभाषा लुङ् लृङोः। २। ४। ५०॥

इङो गाङ् वा स्यात्।

गाङ्कुटादिभ्योऽञ्णित्ङित्। १। २। १॥

गाङादेशात् कुटादिभ्यश्चाङ्णितः प्रत्यया ङितः स्युः।

घुमास्थागापाजहातिसां हलि। ६। ४।६६॥

एषामात ईत् स्यात् हलादौ क्ङित्यार्द्धधातुके। अध्यगीष्ट, अध्यैष्ट, अध्यगीषत, अध्यैषत, दुह प्रपूरणे। २०। दोग्धि, दुग्धः, दुहन्ति, धोक्षि, दुग्धे, दुहाते, दुहते, धुक्षे, दुहाथे, दुग्ध्वे, दुहे, दुह्वहे, दुह्महे, दुदोह, दुदुहे, दोग्धा, धोक्ष्यति, धोक्ष्यते, दोग्धु, दुग्धात्, दुग्धाम्, दुहन्तु, दुग्धि, दुग्धात्, दुग्धम्, दुग्ध, दोहानि, दुग्धाम्, दुहाताम्, दुहताम्, धुक्ष्व, दुहाथाम्, धुग्ध्वम्, दोहै, दोहावहै, दोहामहै, अधोक्, अदुग्धाम्, अदुहन्, अदोहम्, अदुग्ध, अदुहाताम्, अदुहत, अधुग्ध्वम्, दुह्यात्, दुहीत।

लिङ् सिचावात्मनेपदेषु। १। २। ११॥

इक् समीपाद्यलः परौ झलादौ लिङ्सिचौ कितौ स्तस्तङि। धुक्षीष्ट।

शल इगुपधादनिटः क्सः। ३। १। ४५॥

इगुपधो यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः। अधुक्षत्।

लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये

। ७ । ३ । ७३ ॥

एषां क्सस्य लुग्वा दन्त्ये तङि । अदुग्ध । अधुक्षत ।

क्सस्याचि । ७ । ३ । ७२ ॥

अजादौ तङि क्सस्य लोपः । अधुक्षाताम्, अधुक्षन्त, अदुग्धाः, अधुक्षथा, अधुक्षाथाम्, अधुग्ध्वम्, अधुक्षध्वम्, अधुक्षि, अधुक्षावहि, अधुक्षामहि, अधोक्ष्यत, एवं दिह उपचये । २१ ॥ लिह आस्वादने ॥ २२ ॥ लेढ़ि, लीढ़ः, लिहन्ति, लेक्षि, लीढे, लिहाते, लिहते, लिक्षे, लिहाथे, लीढ्वे, लिलेह, लिलिहे, लेढासि, लेढासे, लेक्ष्यति, लेक्ष्यते, लेढु, लीढ़ात्, लीढ़ाम्, लिहन्तु, लीढ़ि, लेहानि, लीढ़ाम्, अलेट्, अलेड्, अलिक्षत्, अलिक्षत । अलीढ़ । अलेक्ष्यत्, अलेक्ष्यत । ब्रूञ् व्यक्तायां वाचि ॥ २३ ॥

ब्रुवः पञ्चानामादित आहो ब्रुवः ।३।४।८४ ॥

ब्रुवो लटस्तिबादीनाम्पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्चाहादेशः । आह । आहतुः । आहुः ।

आहस्थः । ८ । २ । ३५ ॥

झलि, चर्त्वम्, आत्थ, आहथुः ।

ब्रुव ईट् । ७ । ३ । ९३ ॥

ब्रूवो हलादेः पित ईट् । ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रूते । ब्रुवाते । ब्रुवते ।

ब्रुवो वचि । २ । ४ । ५३ ॥

आर्द्धधातुके । उवाच । ऊचतुः । ऊचुः । उवचिथ । उव

क्थ। ऊचे। वक्ता। वक्ष्यति। वक्ष्यते। ब्रवीतु। ब्रूतात्। ब्रूताम्। ब्रुवन्तु। ब्रूहि। ब्रवाणि। ब्रूताम्। ब्रवै। अब्रवीत्। अब्रूत। ब्रूयात्। ब्रुवीत। उच्यात्। वच्चीष्ट।

अस्यतिवक्तिख्यातिभ्योऽङ्। ३। १। ५२॥

एभ्यः च्लेः अङ्।

वच उम्। ७। ४। २०॥

अङि परे। अवोचत्। अवोचत। अवक्ष्यत् अवक्ष्यत। चर्करीतञ्च।

चर्करीतमिति यङ्लुगन्तं तददादौ बोध्यम्। ऊर्णुञ् आच्छादने॥ २४॥

उर्णोतेर्विभाषा। ७। ३। ९०॥

इद्भिर्हलादौ पिति सार्वधातुके। ऊर्णौति। ऊर्णोति। ऊर्णुतः। ऊर्णुवन्ति। ऊर्णुते। ऊर्णुवाते। ऊर्णुवते। ऊर्णोतेरान्नेति वाच्यम्।

नन्द्राः संयोगादयः। ६। १। ३॥

अचः पराः संयोगादयो न द रा इर्न भवन्ति। नु शब्दस्य द्वित्वम्। ऊर्णुनाव। ऊर्णुनुवतुः। ऊर्णुनुवुः।

विभाषोर्णोः। १। २। ३॥

इड़ादिप्रत्ययो वा ङित् स्यात्। ऊर्णुनुविथ। ऊर्णुनविथ। ऊर्णुविता। ऊर्णविता। ऊर्णुविष्यति। ऊर्णविष्यति। ऊर्णौतु। ऊर्णोतु। ऊर्णवानि। ऊर्णवै।

गुणोऽपृक्ते। ७। ३। ९१॥

ऊर्णोतेर्गुणोऽपृक्तहलादौ पिति सार्वधातुके। और्णोत्।

ओर्णोः । ऊर्णुयात् । ऊर्णुयाः । ऊर्णुवीत । ऊर्णूयात् । ऊर्णुविषीष्ट । ऊर्णविषीष्ट ।

ऊर्णोतेर्विभाषा । ७ । २ । ६ ॥

इड़ादौ परस्मैपदे सिचि वृद्धिः । पक्षे गुणः । और्णावीत् । और्णवीत् । और्णुवीत् । और्णाविष्टाम् । और्णविष्टाम् । और्णुविष्टाम् । और्णुविष्ट । और्णविष्ट । और्णुविषत । और्णविषत ।

इत्यदादयः ।

अथ जुहोत्यादयः ।

हु दानादनयोः ॥ १ ॥

जुहोत्यादिभ्यः श्लुः । २ । ४ । ७५ ॥

शपः श्लुः स्यात् ।

श्लौ । ६ । १ । १० ॥

धातोर्द्वे स्तः । जुहोति । जुहुतः ।

अदभ्यस्तात् । ७ । १ । ४ ॥

झस्य । हुश्नुवोरिति यण् । जुह्वति ।

भीह्रीभृहुवां श्लुवच्च । ३ । १ । ३९ ॥

एभ्यो लिङ्याम् वा स्यादामि श्लाविव कार्यं च । जुहवाञ्चकार । जुहाव । होता । होष्यति । जुहोतु । जुहुतात् । जुहुताम् । जुह्वतु । जुहुधि । जुहवानि । अजुहोत् । अजुहुताम् ।

जुसि च। ७। ३। ८३॥

हृग्लाङ्गस्य गुणोऽजादौ जुसि। अजुहवुः। जुहुयात्। हृयात्। अह्वीषीत्। अह्वोष्यत्। ञिभी भये॥ २॥ बिभेति।

भियोऽन्यतरस्याम्। ६। ४। ११५॥

इः स्याद्वलादौ क्ङिति सार्वधातुके। बिभितः। बिभीतः। बिभ्यति। बिभयाञ्चकार। बिभाय। भेता। भेष्यति। बिभेतु। बिभितात्। बिभीतात्। अबिभेत्। बिभियात्। बिभीयात्। भीयात्। अभैषीत्। अभेष्यत्। ह्री लज्जायाम्॥ ३॥ जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयाञ्चकार। जिह्राय। ह्रेता। ह्रेष्यति। जिह्रेतु। अजिह्रेत्। जिह्रीयात्। ह्रीयात्। अह्रैषीत्। अह्रेष्यत्। पॄ पालनपूरणयोः॥ ४॥

अर्त्तिपिपर्त्योश्च। ७। ४। ७७॥

अभ्यासस्य इकारोऽन्तादेशः स्यात् श्नौ। पिपर्त्ति।

उदोष्ठ्यपूर्वस्य। ७। १। १०२॥

अङ्गावयवौष्ठ्यपूर्वो य ऋत् तदन्तस्याङ्गस्य उत् स्यात्।

हलि च। ८। २। ७७॥

रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात् हलि। पिपूर्त्तः। पिपुरति। पपार।

शृदृप्रां ह्रस्वो वा। ७। ४। १२॥

एषां किति लिटि ह्रस्वो वा स्यात्। पप्रतुः।

ऋच्छत्यृताम्। ७। ४। ११॥

तौदादिक ऋच्छेर्ऋदन्तानाञ्च गुणः स्यात् लिटि। पपरतुः। पपरुः।

वृतो वा। ७। २। ३८॥

वृङ्वृञ्भ्यामृदन्ताच्चेटो दीर्घो वा स्याच्च तु लिटि। परिता। परीता। परिथति। परीथति। पिपर्त्तुं। अपिपः। अपिपर्त्तां। अपिपरुः। पिपूर्य्यात्। पूर्य्यात्। अपारीत्।

सिचि च परस्मैपदेषु। ७। २। ४०॥

अत्र इटो न दीर्घः। अपारिष्टाम्। अपरीष्यत्। अपरिष्यत्। ओहाक् त्यागे॥ ५॥ जहाति।

जहातेश्च। ६। ४। ११६॥

इट् वा स्यादलादौ क्ङिति सार्वधातुके। जहितः।

ई हल्यघोः। ६। ४। ११३॥

आभ्यस्तयोरात ईत् सार्वधातुके क्ङिति हलि। जहीतः।

आभ्यस्तयोरातः। ६। ४। ११२॥

अनयोरातः लोपः स्यात् क्ङिति सार्वधातुके। जहति। जही। हाता। हास्यति। जहातु। जहितात्। जहीतात्।

आच हौ। ६। ४। ११७॥

जहातेः हौ परे आ स्यात् चादिदीतौ। जहाहि। जहिहि। जहीहि। अजहात्। अजहुः।

लोपो यि। ६। ४। ११८॥

जहातेरालोपो यादौ सार्वधातुके। जह्यात्। एर्लिङि। हेयात्। अहासीत्। अहास्यत्। माङ् माने शब्दे च॥ ६॥

भृञामित्। ७। ४। ७६॥

भृञ् माङ् ओहाङ् एषामभ्यासस्य इत् स्यात् श्नौ। मिमाति।

मिमाते। मिमते। ममे। माता। मास्यते। मिमीताम्। अमिमीत। मिमीत। मासीष्ट। अमास्त। अमास्यत। ओहाङ् गतौ॥ ७॥ जिहीते जिहाते। जिहते। जहे। हाता। हास्यते। जिहीताम्। अजिहीत। जिहीत। हासीष्ट। अहास्त। अहास्यत। डु भृञ् धारणपोषणयोः॥ ८॥ बिभर्त्ति। बिभृतः। बिभ्रति। बिभृते। बिभ्राते। बिभ्रते। बिभराञ्चकार। बभार। बभर्थ। बभृव। बिभराञ्चक्रे। बभ्रे। भर्त्ता। भरिष्यति। भरिष्यते। बिभर्त्तु। बिभराणि। बिभृताम्। अबिभः। अबिभृताम्। अबिभरुः। बिभृयात्। बिभ्रीत। भ्रियात्। भृषीष्ट। अभार्षीत्। अभृत। अभरिष्यत्। अभरिष्यत डुदाञ् दाने॥ ८॥ ददाति। दत्तः। ददति। दत्ते। ददाते। ददते। ददौ। ददे। दाता। दास्यति। दास्यते। ददातु।

दाधाघ्वदाप्। १। १। २०॥

दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दापदैपौ विना। घ्वसोरित्येत्वम्। देहि। दत्तम्। अददात्। अदत्त। दद्यात्। ददीत। देयात्। दासीष्ट। अदात्। अदाताम्। अदुः।

स्याश्वोरिच्च। १। २। १७॥

अनयोरिदादेशः स्यात् सिच्च कित् स्यात् आत्मनेपदे। अदित। अदास्यत्। अदास्यत। डुधाञ् धारणपोषणयोः॥१०॥ दधाति।

दधस्तथोश्च। ८। २। ३८॥

द्विरुक्तस्य झषन्तस्य धाञो वशो भष् तथोः परयोः सञ्ज्ञोश्च धरतः। धत्तः। दधति। दधासि। धत्थः। धत्ते। दधाते।

दधते । धत्से । धद्वे । घ्वसोरेद्धावभ्यासलोपश्च । धेहि । अदधात् । अधत्त । दध्यात् । दधीत । धेयात् । धासीष्ट । अधात् । अधित । अधास्यत् । अधास्यत । णिजिर् शौचपोषणयोः ॥ ११ ॥

इर इत्संज्ञा वाच्या ।

निजां त्रयाणां गुणः श्लौ । ७ । ४ । ५७ ॥

निज्विज्विषामभ्यासस्य गुणः स्यात् श्लौ । नेनेक्ति । नेनिक्तः । नेनिजति । नेनिक्ते । निनेज । निनिजे । नेक्ता । नेक्ष्यति । नेक्ष्यते । नेनेक्तु । नेनिग्धि ।

नाभ्यस्तस्याचि पिति सार्वधातुके ।७।३।८७ ॥

लघूपधगुणो न । नेनिजानि । नेनिक्ताम् । अनेनेक् । अनेनिक्ताम् । अनेनिजुः । अनेनिजम् । अनेनिक्त । नेनिज्यात् । निज्यात् । नेनिजीत । निक्षीष्ट ।

इरितो वा । ३ । २ । ५७ ॥

इरितो धातोश्लेरङ् वा स्यात् परस्मैपदेषु । अनिजत् । अनैक्षीत् । अनिक्त । अनेक्ष्यत् । अनेक्षत ।

इति जुहोत्यादयः ।

अथ दिवादयः ।

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु ॥ १ ॥

दिवादिभ्यः श्यन् । ३ । १ । ६९ ॥

श्यपोऽपवादः हलि चेति दीर्घः । दीव्यति । दिदेव देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत् । दीव्यात् ।

अदेवीत्। अदेविष्यत्। एवं षिवु तन्तुसन्ताने ॥ २ ॥ नृती गात्रविक्षेपे ॥ ३ ॥ नृत्यति। ननर्त्त। नर्त्तिता।

सेऽसिचि कृतचृतछृदतृदनृतः। ७।२।५७ ॥

एभ्यः सिज्भिन्नस्य सादेरार्द्धधातुकस्येड् वा। नर्त्तिष्यति। नर्त्स्यति। नृत्यतु। अनृत्यत्। नृत्येत्। नृत्यात्। अनर्त्तीत्। अनर्त्तिष्यत्। अनर्त्स्यत्। त्रसी उद्वेगे ॥ ४ ॥ वाभ्राम्रेति श्यन्वा। त्रस्यति। त्रसति। तत्रास।

वा जृभ्रमुत्रसाम्। ६। ४। १२४ ॥

एषाङ्किति लिटि सेटि थलि च एत्वाभ्यासलोपौ वा। त्रेसतुः। तत्रसतुः। त्रेसिथ। तत्रसिथ। त्रसिता। श्रो तनकरणे ॥ ५ ॥

श्नोतः श्यनि। ७। ३। ७१ ॥

लोपः स्यात् श्यनि। श्यति। श्यतः। श्यन्ति। शश्यौ। शश्यतुः। शश्युः। शाता। शास्यति।

विभाषा घ्राधेट्शाच्छासः। २। ४। ७८ ॥

एभ्यः सिचो लुग्वा परस्मैपदेषु। अशात्। अशाताम्। अशुः।

यमरमनमातां सक्च। ७। २। ७३ ॥

एषां सक् एभ्यः सिच इट् परस्मैपदेषु। इट्सकौ। अशासीत्। अशासिष्टाम्। क्ष्ो क्षेदने ॥ ६ ॥ क्ष्यति। क्षोऽन्तकर्म्मणि ॥ ७ ॥ स्यति। ससौ। दो अवखण्डने ॥ ८ ॥ द्यति। ददौ। देयात्। अदात्। व्यध ताड़ने ॥ ९ ॥

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छति-
भृज्जतीनां ङिति च । ६ । १ । १६ ॥

एषां संप्रसारणं स्यात् किति ङिति च । विध्यति । विव्याध । विविधतुः । विविधुः । विव्यधिथ । विव्यद्ध । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् । पुष पुष्टौ ॥ १० ॥ पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति ।

पुषादीत्यङ् । अपुषत् । शुष शोषणे ॥ ११ ॥ शुष्यति । शुशोष । अशुषत् । णश अदर्शने ॥ १२ ॥ नश्यति । ननाश । नेशतुः ।

रधादिभ्यश्च । ७ । २ । ४५ ॥

वलाद्यार्धधातुकस्य वेट् । नेशिथ ।

मस्जिनशोर्झलि । ७ । १ । ६० ॥

नुम्, ननंष्ठ, नेशिव, नेशिम, नशिता, नंष्टा, नशिष्यति, नक्ष्यति, नश्यतु, अनश्यत्, नश्येत्, नश्यात्, अनशत्, षूङ् प्राणिप्रसवे ॥ १३ ॥ सूयते, सुषुवे, क्रादिनियमादिट्, सुषुविषे, सुषुविवहे, सुषुविमहे, सोता, सविता, टूङ् परितापे ॥ १४ ॥ टूयते । दीङ् क्षये ॥ १५ ॥ दीयते ।

दीङो युडचि क्ङिति । ६ । ४ । ६३ ॥

दीङः परस्याजादेः क्ङिदार्धधातुकस्य युट् । वुग्युटावुवङौ यणः सिद्धौ वक्तव्यौ । दिदीये ।

मीनातिमिनोतिदीङां ल्यपि च । ६ । १ । ५० ॥

एषामात्वं ल्यपि, चादग्निल्येङ् [illegible]म्मित्ते । दाता, दास्यति, अदास्त, डीङ् विहायसा गतौ ॥ १६ ॥ [illegible]यते, डिड्ये, डयिता,

पीङ् पाने ॥ १७ ॥ पीयते, पेता, अपेष्ट, माङ् माने ॥ १८ ॥ मायते, मसे, जनी प्रादुर्भावे ॥ १९ ॥

ज्ञाजनोर्जा । ७ । ३ । ७९ ॥

अनयोः जादेशः स्यात् ञिति । जायते, जज्ञे, जनिता, जनिष्यते ।

दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ।

। ३ । १ । ९१ ॥

एभ्यश्लेश्चिखा स्यात् एकवचने तशब्दे परे ।

चिणो लुक् । ६ । ४ । १०४ ॥

चिणः परस्य तशब्दस्य लुक् स्यात् ।

जनिवध्योश्च । ७ । ३ । ३५ ॥

अनयोर्न वृद्धिश्चिणि ञ्णिति क्ङिति च । अजनि, अजनिष्ट. दीपी दीप्तौ ॥ २० ॥ दीप्यते, दिदीपे, अदीपि, अदीपिष्ट, पद गतौ ॥ २१ ॥ पद्यते, पेदे, पत्ता, पत्सीष्ट ।

चिण् ते पदः । ३ । १ । ६० ॥

पदश्लेश्चिण् ते परे । अपादि, अपत्साताम्, अपत्सत । विद सत्तायाम् ॥ २२ ॥ विद्यते, वेत्ता, अवित्त, बुध अवगमने ॥ २३ ॥ बुध्यते, बोद्धा, भोत्स्यते, भुत्सीष्ट, अबोधि, अबुद्ध, अभूत्साताम् । युध सम्प्रहारे ॥ २४ ॥ युध्यते, युयुधे, योद्धा, अयुद्ध । सृज विसर्गे ॥ २५ ॥ सृज्यते, ससृजे, ससृजिषे ।

सृजिदृशोर्झल्यमकिति । ६ । १ । ५८ ॥

अनयोरम् झलादावकिति । स्रष्टा, स्रक्ष्यति, स्रक्षीष्ट,

अस्रष्ट, अस्रक्षाताम्, मृष तितिक्षायाम् ॥ २६ ॥ मृष्यति, मृष्यते, ममर्ष, ममर्षिथ, ममृषिषे, मर्षितासि, मर्षितासे, मर्षिष्यति, मर्षिष्यते । णह बन्धने ॥ २७ ॥ नह्यति, नह्यते, ननाह, ननद्ध, नेहिथ, नेहे ॥ नद्धा, नत्स्यति, अनात्सीत्, अनद्ध ।

इति दिवादयः ।

स्वादयः ।

षुञ् अभिषवे ॥ १ ॥

स्वादिभ्यः श्नुः । ३ । १ । ७३ ॥

श्नोऽपवादः, सुनोति, सुनुतः इञ्शुवोरिति यण् । सुन्वन्ति, सुन्वः, सुनुवः, सुनुते, सुन्वाते, सुन्वते, सुन्वहे, सुनुवहे, सुषाव, सुषुवे, सोता, सुनु, सुनवानि, सुनवै, सुनुयात्, सूयात् ।

स्तसुधूञ्भ्यः परस्मैपदेषु । ७ । २ । ७२ ॥

एभ्यः सिच इट् । असावीत्, असोष्ट, चिञ् चयने ॥ २ ॥ चिनोति, चिनुते ।

विभाषा चेः । ७ । ३ । ५८ ॥

अभ्यासाच्चेः कुत्वं वा सनि लिटि च । चिकाय, चिचाय, चिक्ये, चिच्ये, अचैषीत्, अचेष्ट । स्तृञ् आच्छादने ॥ ३ ॥ स्तृणोति । स्तृणुते ।

शर्पूर्वाः खयः । ७ । ४ । ६१ ॥

अभ्यासस्य शर्पूर्वाः खयः शिष्यन्तेऽन्ये हलो लुप्यन्ते तस्तार । तस्तरतुः । तस्तरे, गुणोर्त्तीति गुणः, स्तर्य्यात् ।

ऋतश्च संयोगादेः। ७। २। ४३॥

ऋदन्तात् संयोगादेर्लिङ् सिचोरिड्वा, स्तरिषीष्ट, स्तृषीष्ट, अस्तरिष्ट, अस्तृत। धूञ् कम्पने॥ ४॥ धूनोति, धूनुते, दुधाव, स्वरतीति वेट्, दुधविथ, दुधोथ।

श्र्युकः किति। ७। २। ११॥

श्रिञ एकाच उगन्ताच्च गित् कितोरिण् न। इति प्राप्ते। क्रादिनियमान्नित्यमिट्। दुधुविव। दुधुवे। अधावीत्। अधविष्ट। अधोष्ट। अधविष्यत्। अधोष्यत्। अधविष्यताम्। अधविष्यत। अधोष्यत।

इति स्वादयः।

तुदादयः।

तुद व्यथने॥ १॥

तुदादिभ्यः शः। ३। १। ७७॥

शपोऽपवादः। तुदति। तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। अतौत्सीत्। अतुत्त। णुद प्रेरणे॥ २॥ नुदति। नुदते। नुनोद। नोत्ता। भ्रस्ज पाके॥ ३॥ ग्रहिज्येति सम्प्रसारणम्। सस्य श्चुत्वेन शः। शस्य जश्त्वेन जः। भृज्जति। भृज्जते।

भ्रस्जो रोपधयोरमन्यतरस्याम्।६।४।४७॥

भ्रस्जो रेफस्योपधायाश्च स्थाने रमागमो वार्द्धधातुके। मित्वादन्त्यादचः परः। स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः। बभर्ज। बभर्ज्जतुः। बभर्जिथ। बभर्ष्ठ। बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। स्कोरिति सलोपः। ब्रश्चेति षः। बभ्रष्ठ। बभर्ज्ज।

बभ्रज्जे । भर्ष्टा । भ्रष्टा । भ्रक्ष्यति । भर्क्ष्यति । क्ङिति रम् बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन । भृज्यात् । भृज्यास्ताम् भृज्यासुः । भर्क्षीष्ट । भ्रक्षीष्ट । अभ्राक्षीत् ॥ अभार्क्षीत् अभर्ष्ट अभ्रष्ट । क्षष विलेखने ॥ ४ ॥ क्षषति । क्षषते । चकर्ष । चक्षषे ।

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् । ६ । १ । ५९ ॥

उपदेशेऽनुदात्तो य ऋदुपधस्तस्यां वा झलादावकिति । क्रष्टा । कर्ष्टा । क्रक्षीष्ट ।

स्रग्र मृष क्षष तृप दृपेश्लेः सिज्वा वाच्यः । अक्राक्षीत् । अकार्क्षीत् । अक्षक्षत् । अक्षष्ट । अक्षक्षाताम् । अक्षक्षन्त । मिल सङ्गमे ॥ ५ ॥ मिलति । मिलते । मिमेल । मेलिता । अमेलीम् । मुच्ल मोचने ॥ ६ ॥

शे मुचादीनाम् । ७ । १ । ५९ ॥

मुच्लिप्विद् लुप्सिच् कृत् खिद् पिशां नुम् । मुञ्चति । मुञ्चते । मोक्ता । मुच्यात् । मुक्षीष्ट । अमुचत् । अमुक्त । ममुक्षाताम् । लुप्ल्छेदने ॥ ७ ॥ लुम्पति । लुम्पते । लोप्ता । अलुपत् । अलुप्त । विद्लृलाभे ॥ ८ ॥ विन्दति । विन्दते । विवेद । विविदे । व्याघ्रभूतिमते सेट् । वेदिता । भाष्यमतेऽनिट् । परिवेत्ता । षिच क्षरणे ॥ ९ ॥ सिञ्चति । सिञ्चते ।

लिपिसिचिह्वश्च । ३ । १ । ५३ ॥

एभ्यश्लेरङ् । असिचत् ।

आत्मनेपदेष्वन्यतरस्याम् । ३ । १ । ५४ ॥

लिपिसिचिह्वः परस्य च्लेरङ् वा । असिचत ॥ असिक्त ।

लिप उपदेहे ॥ १० ॥ उपदेहो वृद्धिः। लिम्पति। लिम्पते। लेप्ता। अलिपत्। अलिपत। अलिप्त ॥

इति उभयपदिनः ॥

तुदादयः।

कृती च्छेदने ॥ ११ ॥ कृन्तति। चकर्त्त। कर्त्तिता। कर्त्तिष्यति। कर्त्स्यति। अकर्त्तीत्। खिद परिघाते ॥१२॥ खिन्दति। चिखेद। खेत्ता। पिश अवयवे ॥ १३ ॥ पिंशति। पेशिता। ओव्रश्चू च्छेदने ॥ १४ ॥ व्रश्चति। वव्रश्च। वव्रश्चिथ। वव्रष्ठ। व्रश्चिता। व्रष्टा। व्रश्चिष्यति। व्रक्ष्यति। व्रश्चात्। अव्रश्चीत्। व्यच व्याजीकरणे ॥ १५ ॥ विचति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्। अव्यचीत्। व्यचेः कुटादित्वमनसीति तु नेह प्रवर्त्तते। अनसीति पर्य्युदासेन क्ङिन्मात्रविषयत्वात्। उछि उंछे ॥ १६ ॥ उञ्छः कणशआदानम्। कणिशाद्यर्জ্জनं शिलमिति यादवः। ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु ॥ १७ ॥ ऋच्छति। ऋच्छत्यतामिति गुणः। द्विहल्ग्रहणस्यानेकहलुपलक्षणत्वात् गुट्। आनर्च्छ। आनर्च्छतुः। ऋच्छिता। उज्झ उत्सर्गे ॥ १८ ॥ उज्झति। लुभ विमोहने ॥ १९ ॥ लुभति।

तीषसहलुभरुषरिषः। ७। २। ४८ ॥

इच्छत्यादेः परस्य तादेरार्द्धधातुकस्येड्वा स्यात्। लोभिता। लोब्धा। लोभिष्यति। टप टम्फ टप्पी ॥ २० ॥ २१ ॥ टपति। ततर्प। तर्पिता। अतर्पीत्। टम्फति।

ञ्नि टम्फादीनां नुम् वाच्यः। आदिशब्दः प्रकारे। तेन येऽत्र

नकारानुषक्तास्ते तस्मादयः । ततस्मः । तस्मात् । मृड़ मृड़ सुखने ॥ २२ ॥ २३ ॥ मृड़ति । मृड़ति । सुन गतौ ॥ २४ ॥ सुनति । इषु इच्छायाम् ॥ २५ ॥ इच्छति । एषिता । एष्टा । एषिष्यति । इष्यात् । ऐषीत् । कुट कौटिल्ये ॥ २६ ॥ गाङ् कुटादीति ङित्वम् । चुकुटिथ । चुकोट । चुकुट । कुटिता । पुट संश्लेषणे ॥ २७ ॥ पुटति । पुटिता । स्फुट विकसने ॥ २८ ॥ स्फुटति । स्फुटिता । स्फुर स्फुल सञ्चलने ॥२९ ॥३०॥ स्फुरति । स्फुलति ।

स्फुरतिस्फुलत्योर्निर्निविभ्यः । ८ । ३ । ७६ ॥

षत्वं वा निस्फुरति । निष्फुरति । णू स्तवने ॥ ३१ ॥ परिणूतगुणोदयः । नुवति । नुनाव । नुविता । टुमस्जो शुद्धौ ॥ ३२ ॥ मज्जति । ममज्ज । मस्जिनशोरिति नुम् ।

मस्जेरन्त्यात् पूर्वो नुम् वाच्यः । संयोगादिलोपः । ममंक्थ । ममङ्क्थ । मङ्क्ता । मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः । रुजो भङ्गे ॥ ३३ ॥ रुजति । रोक्ता रोक्ष्यति । अरौक्षीत् । भुजो कौटिल्ये ॥ ३४ ॥ रुजिवत् । विश प्रवेशने ॥ ३५ ॥ विशति । मृश आमर्शने ॥ ३६ ॥ आमर्शनं स्पर्शः । अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् । अम्राक्षीत् । अमार्क्षीत् । अमृक्षत् । षदॢ विशरणगत्यवसादनेषु ॥ ३७ ॥ सीदतीत्यादिशदॢ शातने ॥ ३८ ॥

शदेः शितः । १ । ३ । ६० ॥

शिद्भावितोऽस्मात्तङानौ स्तः । शीयते । शीयताम् । शीयेत । अशीयत । अशदत । शत्ता । शत्स्यति । अशदत् । अशत्स्यत् । कृ विक्षेपे ॥ ३९ ॥

कृत वृञ्चातोः। ७। १। १००॥

किरति। चकार। चकरतुः। चकरुः। करिता। करीता। कीर्य्यात्।

किरतौ लवने। ६। १। १४०॥

उपात्किरतेः सुट् क्षेदने। उपस्किरति।

अडभ्यासव्यवायेऽपि। ६। १। १३६॥

सुट्कात्पूर्व इति वक्तव्यम्। उपात्किरत्। उपचस्कार।

हिंसायां प्रतेश्च। ६। १। १४१॥

उपात् प्रतेश्च किरतेः सुट् हिंसायाम्। उपस्किरति। प्रतिस्किरति। गॄ निगरणे॥ ४०॥

अचि विभाषा। ८। २। २१॥

गिरतेः रेफस्य लोऽजादौ प्रत्यये। गिलति। गिरति। जगाल। जगार। जगलिथ। जगरिथ। गलिता। गलीता। गरिता। गरीता। प्रच्छ ज्ञीप्सायाम्॥ ४१॥ ग्रहिज्या इति सम्प्रसारणम्। पृच्छति। पप्रच्छ। पप्रच्छतुः। पप्रच्छुः। प्रष्टा। प्रक्ष्यति। अप्राक्षीत्। मृङ् प्राणत्यागे॥ ४२॥

म्रियतेर्लुङ्लिङोश्च। १। ३। ६१॥

लुङ् लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र। ङित्वं स्वरार्थम्। रिङ्। इयङ्। म्रियते। ममार। मर्त्ता। मरिष्यति। मृषीष्ट। अमृत। मृङ्व्यायामे॥ ४३॥ प्रायेणायं व्याङ्पूर्वः। व्यामियते। व्यापप्रे व्यापप्राते। व्यापरिष्यते। व्यापृत। व्यापृषाताम्। जुषी प्रीतिसेवनयोः॥ ४४॥ जुषते। जुजुषे। ओविजी भयचलनयोः॥ ४५॥ प्रायेण उत्पूर्वः। उद्विजते।

विज इट्। १। २। २॥

विजेः पर इड़ादिप्रत्ययो ङिद्वत्। उद्विजिता।

इति तुदादयः।

रुधादयः।

रुधिरावरणे॥ १॥

रुधादिभ्यः श्नम्। ३। १। ७८॥

शपोऽपवादः। रुणद्धि। असोरल्लोपः। रुन्द्धः। रुन्धन्ति। रुणत्सि। रुन्द्धः। रुन्धद्ध। रुणध्मि। रुन्ध्वः। रुन्ध्मः। रुन्द्धे। रुन्धाते। रुन्धते। रुन्त्से। रुन्धाथे। रुन्द्धे। रुन्धे। रुन्ध्वहे। रुन्ध्महे। अरुधत्। अरुधे। रोद्धा। रोत्स्यति। रोत्स्यते। रुणद्धु। रुन्द्धात्। रुन्द्धाम्। रुन्धन्तु। रुन्द्धि। रुणधानि। रुणधाव। रुणधाम। रुन्द्धाम्। रुन्धाताम्। रुन्धताम्। रुन्त्स्व। रुणधै। रुणधावहै। रुणधामहै। अरुणत्। अरुणद्। अरुन्द्धाम्। अरुन्धन्। अरुन्द्ध। अरुन्धाताम्। अरुन्धत। रुन्ध्यात्। रुन्धीत। रुध्यात्। रुत्सीष्ट। अरुधत्। अरौत्सीत्। अरोत्स्यत। भिदिर् विदारणे॥ २॥ छिदिर् द्वैधीकरणे॥ ३॥ युजिर् योगे॥ ४॥ रिचिर् विरेचने॥ ५॥ रिणक्ति। रिङ्क्ते। रिरेच। रेक्ता। रेक्ष्यति। अरिणक्। अरिचत्। अरैक्षीत्। अरिक्त। विचिर् पृथग्भावे॥ ६॥ विनक्ति। विङ्क्ते। चुदिर् संपेषणे॥ ७॥ चुणत्ति। चुन्त्ते। चोत्ता। अचुदत। अचौत्सीत्। अचुत्त। उच्छृदिर् दीप्तिदेवनयोः॥ ८॥ कृणत्ति। कृन्त्ते। चच्छर्द। से ऽसिचौ॰ वेट् चच्छृत्से। चच्छृदिषे। छर्दिता। छर्दिष्यति। छर्त्स्यति।

अच्छृदत्। अच्छर्दीत्। अच्छर्दिष्ट। उतृदिर् हिंसानादरयोः ॥८॥ तृणत्ति। तृन्ते। कृती वेष्टने ॥ १० ॥ कृणत्ति। तृह हिंसि हिंसायाम् ॥ ११ ॥ १२ ॥

तृणह इम्। ७। ३। ९२ ॥

तृहः झमि कृते इम् हलादौ पिति। तृणेढि। तृण्ढः। ततर्ह। तर्हिता। अतृणेट्। आन्नलोपः। हिनस्ति। जिहिंस। हिंसिता। उन्दी क्लेदने ॥ २१ ॥ उनत्ति। उन्तः। उन्दन्ति। उन्दाञ्चकार। औनत्। औन्ताम्। औन्दन्। औनः। औनदम्। अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ॥ १४ ॥ अनक्ति। अङ्क्तः। अञ्जन्ति। आनञ्ज। आनञ्जिथ। आनङ्क्थ। अञ्जिता। अङ्क्ता। अङ्धि। अनजानि। आनक्।

अञ्जेः सिचि। ७। २। ७१ ॥

अञ्जेः सिचो नित्यमिट्। आञ्जीत्। तञ्च् सङ्कोचने ॥१५॥ तनक्ति। तङ्क्ता। तञ्चिता। ओविजी भयचलनयोः ॥ १५ ॥ विनक्ति। विङ्क्तः। विज इड़िति डित्वम्। विविजिथ। विजिता। अविनक्। अविजीत्। शिष्लृविशेषणे ॥ १७ ॥ शिनष्टि। शिंष्टः। शिंषन्ति। शिनक्षि। शिशेष। शिशेषिथ। शेष्टा। शेक्ष्यति। ईर्षिः। शिक्षि। शिनषाणि। अशिनट्। शिंष्यात्। शिष्यात्। अशिषत्। एवं पिष्लृ सञ्चूर्णने ॥ १८ ॥ भञ्जो आमर्दने ॥ १९ ॥

आन्नलोपः। ६। ४। २३ ॥

झमः परस्य नस्य लोपः स्यात्। भनक्ति। बभञ्जिथ। बभङ्क्थ। भङ्क्ता। भङ्धि। अभाङ्क्षीत्। भुज पालनाभ्यवहारयोः ॥ २० ॥ भुनक्ति। भोक्ता। भोक्ष्यति। अभुनक्।

भुजोऽनवने । १ । ३ । ६६ ॥

तङानौ स्तः । ओदनभुङ्क्ते । अनवने किम् । मद्दौं भुनक्ति । जिइन्धी दीप्तौ ॥२१॥ इन्द्धे । इन्धाते । इन्धते । इंत्से । इन्द्धे । इन्धाञ्चक्रे । इन्धिता । इन्द्धाम् । इन्धाताम् । इनधै । ऐन्ध । ऐन्धाताम् । ऐन्धाः । विद विचारणे ॥ २२ ॥ विन्ते । वेत्ता ।

इति रुधादयः ।

तनादयः ।

तनु विस्तारे ॥ १ ॥

तनादिकृञ्भ्यः उः । ३ । १ । ७९ ॥

शपोऽपवादः । तनोति । तनुते । ततान । तेने । तनितासि । तनितासे । तनिष्यति । तनिष्यते । तनुताम् । अतनोत् । तनुयात् । तन्वीत । तन्यात् । तनिषीष्ट । अतनीत् । अतानीत् ।

तनादिभ्यस्तथासोः । २ । ४ । ७९ ॥

तनादेः सिचो वा लुक् तथासोः । अतत अतनिष्ट । अतथाः । अतनिष्ठाः । अतनिष्यत् । अतनिष्यत । षणु दाने ॥२॥ सनोति । सनुते ।

ये विभाषा । ६ । ४ । ४३ ॥

जनसनखनामात्वं वा यादौ क्ङिति । सायात् । सन्यात् ।

जनसनखनां सञ्झलोः । ६ । ४ । ४२ ।

एषामाकारः सनि झलादौ क्ङिति । असात । असनिष्ट ।

असाथाः। असनिष्ठाः। क्षण हिंसायाम् ॥ ३ ॥ क्षणोति। क्षणुते। क्ष्मान्तेति न वृद्धिः। अक्षणीत्। अक्षत। अक्षणिष्ट। अक्षथाः। अक्षणिष्ठाः। क्षिण च ॥ ४ ॥ उप्रत्यये लघूपधस्य गुणो वा। क्षिणोति। क्षेणोति। क्षेणिता। अक्षेणीत्। अक्षित। अक्षेणिष्ट। तृण अदने ॥ ५ ॥ तृणोति। तर्णोति। तृणुते। तर्णुते। डुकृञ् करणे ॥ ६ ॥

अत उत्सार्वधातुके। ६। ४। ११० ॥

कुरुतः।

न भकुर्छुराम्। ८। २। ७९ ॥

भस्य कुर्छुरोरुपधाया न दीर्घः। कुर्वन्ति।

नित्यङ्करोतेः। ६। ४। १०८ ॥

करोतेः प्रत्ययोकारस्य नित्यं लोपो म्वोः। कुर्वः। कुर्मः। कुरुते। चकार। चक्रे। कर्त्ता। करिष्यति। करिष्यते। करोतु। कुरुताम्। अकरोत्। अकुरुत।

ये च। ६। ४। १०९ ॥

कृञ उलोपो यादौ प्रत्यये। कुर्य्यात्। कुर्वीत। क्रियात्। कृषीष्ट। अकार्षीत्। अकृत। अकरिष्यत्। अकरिष्यत।

सम्परिभ्याङ्करोतौ भूषणे। ६। १। १३७ ॥

समवाये च। ६। १। १३८ ॥

सुट्। संस्करोति। अलङ्करोतीत्यर्थः। संस्कुर्वन्ति। संघीभवन्तीत्यर्थः। सम्पूर्वस्य क्वचिदभूषणेऽपि सुट्। संस्कृतम्भक्षा इति ज्ञापकात्।

उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु च

। ६ । १ । १३८ ॥

कृञः सुट् । चात् प्रागुक्तयोरर्थयोः । प्रतियत्नो गुणाधानम् । विकृतमेव वैकृतं विकारः । वाक्याध्याहार आकाङ्क्षैकदेश-पूरणम् । उपस्कृता कन्या । उपस्कृता ब्राह्मणाः । एधोदकस्यो-पस्कुरुते । उपस्कृतं भुङ्क्ते । उपस्कृतं ब्रूते । वनु याचने ॥ ७ ॥ वनुते । ववने । मनु अवबोधने ॥ ८ ॥ मनुते । मेने । मनिता । मनिष्यते । मनुताम् । अमनुत । मन्वीत । मनिषीष्ट । अम-निष्ट । अमनिष्यत ।

इति तनादयः ।

क्र्यादयः ।

डुक्रीञ् द्रव्यविनिमये ॥ १ ॥

क्र्यादिभ्यः श्ना । ३ । १ । ८१ ॥

श्नपोऽपवादः । क्रीणाति । ईहल्यघोः । क्रीणीतः । आभ्य-स्तयोरातः । क्रीणन्ति । क्रीणासि । क्रीणीथः । क्रीणीथ । क्रीणामि । क्रीणीवः । क्रीणीमः । क्रीणीते । क्रीणाते । क्रीणते । क्रीणीषे । क्रीणाथे । क्रीणीध्वे । क्रीणे । क्रीणीवहे । क्रीणी-महे । चिक्राय । चिक्रियतुः । चिक्रियुः । चिक्रेथ । चिक्रयिथ । चिक्रिये । क्रेता । क्रेष्यति । क्रेष्यते । क्रीणातु । क्रीणीतात् । क्रीणीताम् । अक्रीणात् । अक्रीणीत् । क्रीणीयात् । क्रीणीत । क्रीयात् । क्रेषीष्ट । अक्रैषीत् । अक्रेष्ट । अक्रेष्यत् । अक्रेष्यत । प्रीञ् तर्पणे कान्तौ च ॥ २ ॥ प्रीणाति । प्रीणीते श्रीञ् पाके ॥ ३ ॥ श्रीणाति । श्रीणीते । मीञ्हिंसायाम् ॥ ४ ॥

हिनुमीना। ८। ४। १५॥

उपसर्गस्थान्निमित्तात् परस्यैतयोर्नस्य णः स्यात्। प्रमीणाति। प्रमीणीते। मीनातीत्यात्वम्। ममौ। मिम्यतुः। ममिथ। ममाथ। मिम्ये। माता। मास्यति। मीयात्। मासीष्ट। अमासीत्। अमासिष्टाम्। अमास्त। षिञ् बन्धने॥ ५॥ सिनाति। सिनीते। सिषाय। सिष्ये। सेता। स्कुञ् आप्रवणे॥ ६॥

स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च

। ३। १। ८२॥

चात् श्ना। स्कुनोति। स्कुनुते। स्कुनाति। स्कुनीते। चुस्काव। चुस्कुवे। स्कोता। अस्कौषीत्। अस्कोष्ट। स्तन्भ्वादयश्चत्वारः सौत्राः सर्वे रोधनार्थाः परस्मैपदिनः।

हलः श्नः शानज्झौ। ३। १। ८३॥

स्तभान।

जॄस्तुन्भुस्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुभ्यश्च

। ३। १। ५८॥

चेरङ् वा।

स्तनभेः। ८। ३। ६७॥

स्तनभेः सौत्रस्य सस्य षः स्यात्। व्यष्टभत्। अस्तभ्नीत्। युञ् बन्धने॥ ७॥ युनाति। युनीते। योता। क्लूञ् शब्दे॥ ८॥ क्लूनाति। क्लूनीते। क्लविता। टॄञ् हिंसायाम्॥ ९॥ टॄणाति। टॄणीते। दूञ् हिंसायाम्॥ १०॥ दूणाति दूणीते। पूञ् पवने॥ ११॥

ष्ट्वादीनां ह्रस्वः। ७। ३। ८०॥

पूञ् लूञ् स्तॄञ् कॄञ् वॄञ् धूञ् शॄ पॄ वॄ भॄ मॄ जॄ भॄ धॄ नॄ ध्वॄ कॄ ऋ गॄ ज्यरीलीब्लीम्नीनाञ्चतुर्विंशतेः णिति ह्रस्वः। पुनाति। पुनीते। पविता लूञ् छेदने ॥ १२ ॥ लुनाति। लुनीते स्तॄञ् आच्छादने ॥ १३ ॥ स्तृणाति। शपूर्वाः खयः। तस्तार। तस्ततुः। तस्तरे। स्तरिता। स्तरीता। स्तृणीयात्। स्तृणीत। स्तीर्य्यात्।

लिङ्सिचोरात्मनेपदेषु। ७। २। ४२॥

वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ्सिचोरिड्वा स्यात् तङि।

न लिङि। ७। २। ३९॥

वृत इटो लिङि न दीर्घः। स्तरिषीष्ट। उश्च। अनेन कित्वम्। स्तीर्षीष्ट। सिचि च परस्मैपदेषु। अस्तारीत्। अस्तारिष्टाम्। अस्तारिषुः। अस्तरिष्ट। अस्तीर्ष्ट कॄञ् हिंसायाम् ॥ १४ ॥ कृणाति। कृणीते। चकार। चकरे। वृञ् वरणे ॥ १५ ॥ वृणाति वृणीते। ववार। ववरे। वरिता। वरीता। उदोष्ठ्यपूर्वस्येत्युत्वम्। वूर्य्यात्। वरिषीष्ट। वर्षीष्ट। अवारीत्। अवारिष्टाम् अवरिष्ट। अवरीष्ट। अवर्ष्ट। धूञ् कम्पने ॥ १६ ॥ धुनाति। धुनीते धोता। धविता। अधावीत्। अधविष्ट। अधीष्ट। ग्रह उपादाने ॥ १७ ॥ गृह्णाति। गृह्णीते। जग्राह। जगृहे।

ग्रहोऽलिटि दीर्घः। ७। २। ३७॥

एकाचो ग्रहेर्विहितस्येटो दीर्घो न तु लिटि। ग्रहीता। गृह्णातु।

हलः श्नः शानज्झौ। ३। १। ८३॥

हलः परस्य श्नः शानजादेशो झौ। गृह्णाण। गृह्णात्।

ग्रहीषीष्ट। ह्मान्तेति न वृद्धिः अग्रहीत्। अग्रहीष्टाम्। अग्रहीष्टः। अग्रहीषाताम्। कुष निष्कर्षे ॥ १८ ॥ कुष्णाति। कोषिता। अश भोजने ॥ १९ ॥ अश्नाति। आश। अशिता। अशिष्यति। अश्नातु। अशान। मुष स्तेये ॥ २० ॥ मोषिता। मुषाण। ज्ञा अवबोधने ॥ २१ ॥ जज्ञौ। वृङ् सम्भक्तौ ॥ २२ ॥ वृणीते। वव्रषे। वव्रढ्वे। वरिता। वरीता। अवरिष्ट। अवरीष्ट। अवृत।

इति क्रयादयः।

चुरादयः।

चुर स्तेये ॥ १ ॥

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचव-र्मवर्णचूर्णचुरादिभ्यो णिच्। २। १। २५ ॥

स्वार्थे। पुगन्तेति गुणः। सनाद्यन्ता इति धातुत्वम्। तिप्शबादि। गुणायादेशौ। चोरयति।

णिचश्च। १। ३। ७४ ॥

णिजन्तादात्मनेपदं कर्त्तृगामिनि क्रियाफले। चोरयते। चोरयामास। चोरयिता। चोर्य्यात्। चोरयिषीष्ट। णिश्रीति चङ्। णौ चङीति ह्रस्वः। चङि द्वित्वम्। हलादिः शेषः। दीर्घो लघोरित्यभ्यासस्य दीर्घः। अचूचुरत्। अचूचुरत। कथ वाक्यप्रबन्धे ॥ २ ॥ अल्लोपः।

अचः परस्मिन् पूर्वविधौ। १। १। ५७ ॥

परनिमित्तोऽजादेशः स्थानिवत् स्थानिभूताचः पूर्वत्वेन

दृष्टस्य विधौ कर्त्तव्ये । इति स्थानिवत्वात्तोपधाद्वृद्धिः । कथयति । अग्लोपित्वाद्दीर्घसन्वद्भावौ न । अचकथत् । गण संख्याने ॥ ३ ॥ गणयति ।

ई च गणः । ७ । ४ । ९७ ॥

गणयतेरभ्यासस्य ईत्याचादचङ् परे णौ । अजीगणत् । अजगणत् ।

इति चुरादयः ।

अथ ण्यन्ताः ।

स्वतन्त्रः कर्त्ता । १ । ४ । ५४ ॥

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्त्ता स्यात् ।

तत्प्रयोजको हेतुश्च । १ । ४ । ५५ ॥

कर्त्तुः प्रयोजको हेतुसंज्ञः कर्त्तृसंज्ञश्च ।

हेतुमति च । ३ । १ । २६ ॥

प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् । भवन्तमेरयति । भावयति ।

णेः पुयण् ज्यपरे । ७ । ४ । ८० ॥

सनि परे यदङ्गन्तदवयवाभ्यासात् इत्यात् पवर्गयण जकारेष्ववर्णपरेषु परतः । अवीभवत् । ष्ठा गतिनिवृत्तौ ।

अर्त्तिह्रीव्लेरी क्नूयीक्ष्माय्यातां पुङ्णौ

। ७ । २ । ३६ ॥

स्थापयति ।

तिष्ठतेरित्। ७। ४। ५॥

उपधायाश्चङ् परे णौ। अतिष्ठिपत्। घट चेष्टायाम्।

मितां ह्रस्वः। ६। ४। ९२॥

घटादीनां ज्ञपादीनाञ्च ह्रस्वः। घटयति। ज्ञप ज्ञाने ज्ञापने च। ज्ञपयति। अजिज्ञपत्।

इति णिजन्तप्रक्रिया।

अथ सन्नन्ताः।

धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा

। ३। १। ७॥

इषिकर्म्मणो धातोरिषिणैककर्त्तृकात् सन् वा इच्छायाम्। पठ व्यक्तायां वाचि।

सन्यङोः। ६। १। ९॥

सन्नन्तस्य यङन्तस्य च प्रथमस्य एकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य। सन्यतः। पठितुमिच्छति। पिपठिषति। कर्मणः किम्। गमनेनेच्छति। समानकर्त्तृकात्किम्। शिष्याः पठन्त्वितीच्छति गुरुः। वाग्रहणाद्दाक्यमपि। लुङ् सनोर्घस्लृ।

सः स्यार्द्धधातुके। ७। ४। ४९॥

सस्य तः स्यात्सादावार्द्धधातुके। अत्तुमिच्छति जिघत्सति। एकाच इति नेट्।

अज्झनगमां सनि। ६। ४। १६॥

अजन्तानां हन्तेरजादेश्चगमेश्च दीर्घो झलादौ सनि।

डुकृञो भ्रल्। १। २। ९॥

इगन्ताज्झलादिः सन् कित्। ऋत इद्धातोः। कर्त्तुमिच्छति चिकीर्षति।

सनि ग्रहगुहोश्च। ७। २। १२॥

ग्रहेर्गुहेरुगन्ताच्च सन् इट् न स्यात्। बुभूषति।

इति सन्नन्ताः।

अथ यङन्ताः।

धातोरेकाचो हलादेः क्रियासमभिहारे यङ्। ३। १। २२॥

पौनःपुन्ये भृशार्थे च द्योत्ये धातोरेकाचो हलादेर्यङ्।

गुणो यङ्लुकोः। ७। ४। ८२॥

अभ्यासस्य गुणो यङि यङ्लुकि च। ङिदन्तत्वादात्मनेपदम्। पुनः पुनरतिशयेन वा भवति। बोभूयते। बोभूयाञ्चक्रे। अबोभूयिष्ट।

नित्यं कौटिल्ये गतौ। ३। १। २३॥

गत्यर्थात्कौटिल्य एव यङ् न तु क्रियासमभिहारे।

दीर्घोऽकितः। ७। ४। ८३॥

अकितोऽभ्यासस्य दीर्घो यङ्लुकोः। कुटिलं व्रजति। वाव्रज्यते।

यस्य हलः। ६। ४। ४९॥

हलः परस्य यस्य लोप आर्द्धधातुके। आदेः। परस्य। अतो लोपः। वाव्रजाञ्चक्रे वाव्रजिता।

रीगृदुपधस्य च। ७। ४। ९०॥

ऋदुपधस्य धातोरभ्यासस्य रीगागमो यङ्लुकोः। वरीवृत्यते। वरीवृतात्। वरीवृतिता।

ह्वभ्नादिषु च। ८। ४। ३९॥

णत्वं न स्यात्। नरीनृत्यते। जरीगृह्यते।

इति यङन्तप्रक्रिया।

अथ यङ्लुगन्ताः।

यङोऽचि च। २। ४। ७४॥

यङोऽचि प्रत्यये लुक् स्याच्चकारात्तं विनापि क्वचित्। अनैमित्तिकोऽयम्। अन्तरङ्गत्वादादौ भवति। ततः प्रत्ययलक्षणेन यङन्तत्वाद् द्वित्वम्। अभ्यासकार्य्यम्। धातुत्वाल्लडादयः। शेषात् कर्त्तरीति परस्मैपदम्। चर्करीतञ्चेत्यदादौ पाठाच्छपो लुक्।

यङो वा। ७। ३। ९४॥

यङ्लुगन्तात् परस्य हलादेः पितः सार्वधातुकस्येड् वा स्यात्। भूसुवोरिति निषेधो यङ्लुकि भाषायां न। बोभूतु तेतिक्ते इति छन्दसि निपातनात्। बोभवीति। बोभोति। बोभूतः। अदभ्यस्तात्। बोभुवति। बोभवाञ्चकार। बोभवामास। बोभविता। बोभविष्यति। बोभवीतु। बोभोतु। बोभूतात्। बोभूताम्। बोभुवतु। बोभूहि। बोभवानि। अबोभवीत्। अबोभोत्। अबोभूताम्। अबोभुवुः। बोभूयात्। बोभूयाताम्। बोभूयुः। बोभूयात्। बोभूयास्ताम्। बोभूयाः।

गातिस्थेति सिचो लुक्। यङो वेतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्गुक्। अबोभूवीत्। अबोभौत्। अबोभूताम्। अबोभूवुः। अबोभविष्यत्।

इति यङ्लुगन्ताः।

नामधातवः।

सुप आत्मनः क्यच्। ३। १। ८॥

इषि कर्म्मण एषितुः सम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच् वा।

सुपो धातुप्रातिपदिकयोः। २। ४। ७१॥

एतयोरवयवस्य सुपो लुक्।

क्यचि च। ७। ४। ३३॥

अवर्णस्य ईः। आत्मनः पुत्रमिच्छति पुत्रीयति।

नः क्ये। १। ४। १५॥

क्यचि क्यङि च नान्तमेव पदं नान्यत्। न लोपः राजीयति। नान्तमेवेति किम्। वाचयति। इलि च। गीर्य्यति। पूर्य्यति। धातोरित्येव। नेह। दिवमिच्छति। दिव्यति।

क्यस्य विभाषा। ६। ४। ५०॥

हलः परयोः कचक्यङोर्लोपो वार्द्धधातुके। आदेः परस्य। अतो लोपः। तस्य स्थानिवत्वान्नधूपधगुणो न। समिधिता। समिध्यिता।

काम्यच्च। ३। १। ९॥

उक्तविषये काम्यच्। पुत्रमात्मन इच्छति पुत्रकाम्यति। पुत्रकाम्यिता।

उपमानादाचारे। ३। १। १०॥

उपमानात् कर्मणः सुबन्तादाचारेऽर्थे क्यच्। पुत्रमिवाचरति पुत्रीयति छात्रम्। विष्णूयति द्विजम्।

सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः। अतो गुणे। कृष्ण इवाचरति कृष्णति। स्व इवाचरति स्वति। सखौ।

अनुनासिकस्य क्विझलोः क्ङिति।६।४।१५॥

अनुनासिकान्तस्योपधाया दीर्घः स्यात् क्वौ झलादौ च क्ङिति। इदमिवाचरति इदामति। राजेव राजानति। पन्था इव पथीनति।

कष्टाय क्रमणे। २। १। १४॥

चतुर्थ्यन्तात् कष्टशब्दादुत्साहे क्यङ्। कष्टाय क्रमते कष्टायते। पापं कर्तुमुत्सहत इत्यर्थः।

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे।३।१।१७॥

एभ्यः कर्मभ्यः करोत्यर्थे क्यङ्। शब्दङ्करोति शब्दायते। तत्करोति तदाचष्टे इति णिच्।

प्रातिपदिकाद्भावार्थे बहुलमिष्टवच्च। प्रातिपदिकाद्भावार्थे णिच् स्यात्। इष्टे यथा प्रातिपदिकस्य पुंवद्भावटिलोपविन्मतुब्लोपयणादिलोपप्रत्ययस्कादादेशभसंज्ञास्तद्वावपि स्युः। इत्यत्र लोपः। घटङ्करोत्याचष्टे वा घटयति।

इति नामधातवः।

कण्ड्वादयः ।

कण्ड्वादिभ्यो यक् । ३ । १ । २७ ॥

एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे । कण्डूञ् गात्रविघर्षणे ॥ १ ॥ कण्डूयति । कण्डूयते । इत्यादि ।

इति कण्ड्वादयः ।

आत्मनेपदम् ।

कर्त्तरि कर्मव्यतिहारे । १ । ३ । १४ ॥

क्रियाविनिमये द्योत्ये कर्त्तर्य्यात्मनेपदम् । व्यतिलुनीते । अन्यस्य योग्यं लवनं करोतीत्यर्थः ।

न गतिहिंसार्थेभ्यः । १ । ३ । १५ ॥

व्यतिगच्छन्ति । व्यतिघ्नन्ति ।

नेर्विशः । १ । ३ । १७ ॥

निविशते ।

परिव्यवेभ्यः क्रियः । १ । ३ । १८ ॥

परिक्रीणीते । विक्रीणीते । अवक्रीणीते ।

विपराभ्यां जेः । १ । ३ । १९ ॥

विजयते । पराजयते ।

समवप्रविभ्यः स्थः । १ । ३ । २२ ॥

सन्तिष्ठते । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते ।

अपह्नवे ज्ञः । १ । ३ । ४४ ॥

शतमपजानीते । अपलपतीत्यर्थः ।

अकर्मकाच्च। १। ३। ४५॥

सर्पिषो जानीते। सर्पिषोपायेन प्रवर्त्तत इत्यर्थः।

समस्तृतीयायुक्तात्। १। ३। ५४॥

रथेन सञ्चरते।

दाणश्च सा चेच्चतुर्थ्यर्थे। १। ३। ५५॥

समो दाणस्तृतीयान्तेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे दाणा संयच्छते कामी।

पूर्ववत् सनः। १। २। ६२॥

सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्। एदिधिषते।

हलन्ताच्च। १। २। १०॥

इक्समीपाद्धलः परो झलादिः सन् कित्। निविविक्षते।

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः। १। ३। ३२॥

गन्धनं सूचनम्। उत्कुरुते सूचयतीत्यर्थः। अवक्षेपणं भर्त्सनम्। श्येनो वर्त्तिकामुत्कुरुते भर्त्सयतीत्यर्थः। हरिमुपकुरुते। सेवत इत्यर्थः। परदारान् प्रकुरुते। तेषु सहसा प्रवर्त्तते। एधोदकस्योपस्कुरुते गुणमाधत्ते। कथाः प्रकुरुते। कथयतीत्यर्थः। व्रतम् प्रकुरुते धर्म्मार्थं विनियुङ्क्ते। एषु किम्। कटङ्करोति। भुजोऽनवने। ओदनं भुङ्क्ते। अनवने किम्। महीं भुनक्ति।

इत्यात्मनेपदप्रक्रिया।

परस्मैपदम् ।

अनुपराभ्यां कृञः । १ । ३ । ७९ ॥

कर्त्तृगे च फले गन्धनादौ च परस्मैपदं स्यात् । अनुकरोति । पराकरोति ।

अभिप्रत्यतिभ्यः क्षिपः । १ । ३ । ८० ॥

क्षिप प्रेरणे । स्वरितेत् । अभिक्षिपति ।

प्राद्वहः । १ । ३ । ८१ ॥

प्रवहति ।

परेर्मृषः । १ । ३ । ८२ ॥

परिमृष्यति ।

व्याङ्परिभ्यो रमः । १ । ३ । ८३ ॥

रमु क्रीड़ायाम् । विरमति ।

उपाच्च । १ । ३ । ८४ ॥

यज्ञदत्तमुपरमति । उपरमयतीत्यर्थः अन्तर्भावितण्यर्थोऽयम् ।

इति पदव्यवस्था ।

भावकर्मप्रक्रिया ।

भावकर्मणोः । १ । ३ । १३ ॥

लस्यात्मनेपदम् ।

सार्वधातुके यक् । ३ । १ । ६७ ॥

भावकर्मवाचिनि धातोर्यक् सार्वधातुके । भावः क्रिया सा

च भावार्थकलकारेणानूद्यते। युष्मदस्मद्भ्यां सामानाधिकरण्याभावात् प्रथमः पुरुषः। तिङ् वाच्यक्रियाया अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि किन्त्वेकवचनमेवोत्सर्गतः। त्वया मया अन्यैश्च भूयते। बभूवे।

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च। ६। ४। ६२॥

उपदेशे योऽच् तदन्तानां हनादीनाञ्च चिणीवाङ्कार्य्यं वा स्यात्यादिषु भावकर्मणोर्गम्यमानयोः स्यादीनामिड़ागमश्च। चिण्वद्भावपक्षेऽयमिट्। चिण्वद्भावाद् वृद्धिः। भाविता। भविता। भाविष्यते। भविष्यते। भूयताम्। अभूयत। भाविषीष्ट। भविषीष्ट।

चिण् भावकर्मणोः। ३। १। ६६॥

चुलेश्चिण् स्याद्भावकर्मवाचिनि ते परे। अभावि। अभाविष्यत। अभविष्यत्। अकर्मकोऽप्युपसर्गवशात् सकर्मकः। अनुभूयते आनन्दश्चैत्रेण त्वया मया च। अनुभूयेते। अनुभूयन्ते। त्वमनुभूयसे। अहमनुभूये। अन्वभावि। अन्वभाविषाताम्। अन्वभविषाताम्। णि लोपः। भाव्यते॥ भावयाञ्चक्रे। भावयाम्बभूवे। भावयामासे। चिण्वदिट् भाविता। आभीयत्वेनासिद्धत्वात् णिलोपः। भावयिता। भावयिषीष्ट। अभावि। अभाविषाताम्। अभावयिषाताम्। बुभूषते। बुभूषाञ्चक्रे। बुभूषिता। बुभूषिष्यते॥ बोभूय्यते। बोभूयिष्यते। अकृत्सार्वधातुकयोर्दीर्घः। स्तूयते विष्णुः। स्तविता। स्तोता। स्तविष्यते। स्तोष्यते। अस्तावि। अस्तविषाताम्। अस्तोषाताम्। ऋ गतौ। गुणोऽर्त्तीति गुणः। अर्य्यते। स्मृ स्मरणे। स्मर्य्यते।

सस्मरे । उपदेशग्रहणाच्चिखदिट् । आरिता । अर्त्ता । स्मारिता । स्मर्त्ता । अनिदितामिति न लोपः । स्रस्यते । इदितस्तु । नन्द्यते । सम्प्रसारणम् । इज्यते ।

तनोतेर्यकि । ६ । ४ । ४४ ॥

आदन्तादेशो वा । तायते । तन्यते ।

तपोऽनुतापे च । ३ । १ । ६५ ॥

तपस्तु श्विण् न स्यात्कर्मकर्त्तर्यनुतापे च । अन्वतप्त पापेन । घुमास्थेतीत्वम् । दीयते । धीयते । ददे ।

आतो युक् चिण्कृतोः । ७ । ३ । ३३ ॥

आदन्तानां युगागमश्चिण्ण्यिति कृति च । दायिता । दाता । दायिषीष्ट । दासीष्ट । अदायि । अदायिषाताम् । भज्यते ।

भञ्जेश्च चिणि । ६ । ४ । ३३ ॥

न लोपो वा स्यात् । अभाजि । अभञ्जि । लभ्यते ।

विभाषा चिण्णमुलोः । ७ । १ । ६९ ॥

लभेर्नुम् वा स्यात् । अलम्भि । अलाभि ।

इति भावकर्मप्रक्रिया ।

अथ कर्मकर्त्तृप्रक्रिया ।

यदा कर्मैव कर्त्तृत्वेन विवक्षितं तदा सकर्मकाणामप्यकर्मकत्वात् कर्त्तरि भावे च लकारः ।

कर्मवत् कर्मणा तुल्यक्रियः । ३ । १ । ८७ ॥

कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मवत्स्यात् । कार्य्या-

तिदेशोऽयम्। तेन यगात्मनेपदचिण्चिण्वदिटः स्युः। पच्यते फलम्। भिद्यते काष्ठम्। अपाचि। अभेदि। भावे। भिद्यते काष्ठेन।

इति कर्मकर्तृप्रक्रिया।

लकारार्थः।

अभिज्ञावचने लट्। ३। २। ११२॥

स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट्। लङोऽपवादः। ऋस निवासे। स्मरसि कृष्ण गोकुले वत्स्यामः। एवं बुध्यसे वेत्तयसे। इत्यादिप्रयोगेऽपि।

न यदि। ३। २। ११३॥

यद्योगे उक्तं न। अभिजानासि यदने अभुञ्ज्महि।

लट् स्मे। ३। २। ११८॥

लिटोऽपवादः। यजति स्म युधिष्ठिरः।

वर्त्तमानसामीप्ये वर्त्तमानवद्वा। ३। ३। १३१॥

वर्त्तमाने ये प्रत्यया उक्तास्ते वर्त्तमानसामीप्ये भूते भविष्यति च वा स्युः। कदागतोऽसि। अयमागच्छामि। आगमं वा। कदा गमिष्यसि। एष गच्छामि। गमिष्यामि वा।

हेतुहेतुमतोर्लिङ्। ३। ३। १५६॥

वा स्यात्। कृष्णं नमेच्चेत् सुखं यायात्। कृष्णं नंस्यति चेत् सुखं यास्यति। भविष्यत्येवेष्यते। नेह। हन्तीति पलायते। विधि निमन्त्रणेति लिङ्। विधिः प्रेरणम्। भृत्यादेर्निकृष्टस्य प्रवर्त्तनम्। यजेत। निमन्त्रणं नियोगकरणम्। आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनम्। इह भुञ्जीत।

आमन्त्रणं कामचाराऽनुज्ञा। इहासीत। अधीष्टः सत्कारपूर्वको व्यापारः। पुत्रमध्यापयेत् भवान्। सम्प्रश्नः सम्प्रधारणम् किम्भो वेदमधीयीय उत तर्कम्। प्रार्थनं याञ्ज्ञा। भो भोजनं लभेय। एवं लोट्।

इति लकारार्थप्रक्रिया।

इति तिङन्तप्रक्रिया समाप्ता।

कृदन्ताः।

धातोः। ३। १। ९१॥

आद्यतीयान्तं ये प्रत्ययास्ते धातोः परे स्युः। कृदतिङिति कृत्संज्ञा।

वाऽसरूपोऽस्त्रियाम्। ३। १। ९४॥

अस्मिन् धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना।

कृत्याः। ३। १। ९५॥

ण्वुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः।

कर्त्तरि कृत्। ३। ४। ६७॥

इति प्राप्ते।

तयोरेव कृत्यक्तखलर्थाः। ३। ४। ७०॥

एते भावकर्मणोरेव स्युः।

तव्यत्तव्यानीयरः। ३। १। ९३॥

धातोरेते स्युः। एधितव्यम्। एधनीयं त्वया। भावे त्रीत्-सर्गिकमेकवचनं क्लीवत्वञ्च। चेतव्यश्चयनीयो वा धर्मस्त्वया।

केलिमर उपसंख्यानम्। पचेलिमा माषाः। पक्तव्या इत्यर्थः। भिदेलिमाः सरलाः भेत्तव्याः। कर्मणि प्रत्ययः।

कृत्यल्युटो बहुलम्। ३। ३। ११३॥

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः। क्वचिद्विभाषा क्वचिदन्यदेव॥ विधेर्विधानं बहुधा समीक्ष्य चातुर्विध्यं बाहुलकं वदन्ति॥ १॥ स्नात्यनेनेति स्नानीयं चूर्णम्। दीयतेऽस्मै दानीयो विप्रः।

अचो यत्। ३। १। ९७॥

चेयम्।

ईद्यति। ६। ४। ६५॥

यति परे आत ईत् स्यात्। देयम्। ग्लेयम्।

पोरदुपधात्। ३। १। ९८॥

पवर्गान्तादुपधावद्यत्। ण्यतोऽपवादः। शप्यम्। लभ्यम्।

एतिस्तुशास्वृदृजुषः क्यप्। ३। १। १०९॥

एभ्यः क्यप्।

ऋहलभ्य पिति कृति तुक्। ६। १। ७१॥

इत्यः। स्तुत्यः। शास्वनुशिष्टौ।

शास इदङ् हलोः। ६। ४। ३४॥

शास उपधाया इत्यादङि हलादौ क्ङिति च शिष्यः। इत्यः। आदित्यः। जुष्यः।

मृजेर्विभाषा। ३। १। ११३॥

मृजेः क्यब् वा। मृज्यः।

ऋ ह्लोर्ण्यत्। ३। १। १२४॥

ऋवर्णान्ताद्धलन्ताच्च ण्यत्। कार्य्यम्। हार्य्यम्। धार्य्यम्।

चजोः कुघिण्ण्यतोः। ७। ३। ५२॥

चजोः कुत्वं स्यात् घिति ण्यति च।

मृजेर्वृद्धिः। ७। २। ११४॥

मृजेरिको वृद्धिः सार्वधातुकार्द्धधातुकयोः। मार्ग्यः।

भोज्यम् भक्ष्ये। ७। ३। ६९॥

भोग्यमन्यत्।

इति कृत्यप्रक्रिया।

ण्वुल्तृचौ। ३। १। १३३॥

धातोरेतौ स्तः। कर्त्तरि कृदिति कर्त्तरि।

युवोरनाकौ। ७। १। १॥

युवु एतयोरनाकौ स्तः। कारकः। कर्त्ता।

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।३।१।१३४॥

तच्छब्दैर्ल्युर्ण्यच्छब्दैर्णिनिः पचादेरच्। नन्दयतीति नन्दनः। जनार्दनः। लवणः। ग्राही। स्थायी। मन्वी। पचादिराकृतिगणोऽयम्।

इगुपधज्ञाप्रीकिरः कः। ३। १। १३५॥

एभ्यः कः। बुधः। क्लथः। ज्ञः। प्रियः। किरः।

आतश्चोपसर्गे। ३। १। १३६॥

प्रज्ञः। सुग्लः।

गेहे कः। ३। १। १४४॥

गेहे कर्त्तरि ग्रहेः कः स्यात्। गृहम्।

कर्मण्यण् । ३ । २ । १ ॥

कर्मण्युपपदे धातोरण्प्रत्ययः स्यात् । कुम्भं करोति कुम्भकारः ।

आतोऽनुपसर्गे कः । ३ । २ । ३ ॥

आदन्तात् धातोरनुपसर्गात् कर्मणि उपपदे कः स्यात् । अणोऽपवादः । गोदः । धनदः । कम्बलदः । अनुपसर्गे किम् । गोसम्प्रदायः ।

मूलविभुजादिभ्यः कः । मूलानि विभुजति मूलविभुजो रथः । आकृतिगणोऽयम् । महीध्रः । कुध्रः ।

चरेष्टः । ३ । २ । १६ ॥

अधिकरणे उपपदे । कुरुचरः ।

भिक्षासेनादायेषु च । ३ । २ । १७ ॥

भिक्षाचरः । सेनाचरः । आदायेति ल्यबन्तम् । आदायचरः ।

कृञो हेतुताच्छील्यानुलोम्येषु ।३।२।२० ॥

एषु द्योत्येषु करोतेष्टः स्यात् ।

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य । ८ । ३ । ४६ ॥

अदुत्तरस्यानव्ययस्य विसर्जनीयस्य समासे नित्यं सादेशः करोत्यादिषु परेषु । यशस्करी विद्या । आशङ्करः । वचनकरः ।

एजेः खश् । ३ । २ । २८ ॥

ण्यन्तादेजेः खश् स्यात् ।

अरुर्द्विषदजन्तस्य मुम् । ६ । ३ । ६७ ॥

अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात् खिदन्ते उत्तरपदे नत्वव्ययस्य । शित्वाच्छबादिः । जनम् एजयतीति जनमेजयः ।

प्रियवशे वदः खच् । ३ । २ । ३८ ॥

प्रियंवदः । वशंवदः ।

आत्ममाने खश् च । ३ । २ । ८३ ॥

स्वकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश् स्यात् चाणिनिः । पण्डितमात्मानं मन्यते पण्डितम्मन्यः । पण्डितमानी ।

अन्येभ्योऽपि दृश्यन्ते । ३ । २ । ७५ ॥

मनिन् क्वनिप् वनिप् विच् एते प्रत्यया: धातोः स्युः ।

नेड्वशि कृति । ७ । २ । ८ ॥

वशादेः कृत इण् न स्यात् । शॄ हिंसायाम् । सुशर्मा । प्रातरित्वा ।

विड्वनोरनुनासिकस्यात् । ६ । ४ । ४१॥

अनुनासिकस्यात् स्यात् । विजायत इति विजावा । ओणृ अपनयने । अवावा । विच् । रुष् रिष् हिंसायाम् । रोट् । रेट् । सुगण् ।

क्विप् च । ३ । २ । ७६ ॥

अयमपि दृश्यते । उखास्रत् । पर्णध्वत् । वाहभ्रट् ।

सुप्यजातौ णिनिस्ताच्छील्ये । ३ । २ । ७८ ॥

अजात्यर्थे सुपि धातोर्णिनिस्ताच्छील्ये द्योत्ये । उष्णभोजी ।

मनः । ३ । २ । ८२ ॥

सुपि मन्यतेर्णिनिः स्यात् । दर्शनीयमानी ।

खित्यनव्ययस्य । ६ । ३ । ६६ ॥

पूर्वपदस्य ह्रस्वः । कालिं मन्या ।

करणे यजः। ३। २। ८५॥

करणे उपपदे भूतार्थयजेर्णिनिः स्यात् कर्त्तरि। सोमेनेष्टवान् सोमयाजी। अग्निष्टोमयाजी।

दृशेः क्वनिप्। ३। २। ९४॥

कर्मणि भूते। पारं दृष्टवान्। पारदृश्वा।

राजनि युधि कृञः। ३। २। ९५॥

क्वनिप् स्यात्। युधिरन्तर्भावितण्यर्थः। राजानं योधितवान् राजयुध्वा। राजकृत्वा।

सहे च। ३। २। ९६॥

सह योधितवान् सहयुध्वा। सहकृत्वा।

सप्तम्यां जनेर्डः। ३। २। ९७॥

सरसिजम्। मन्दुरायां जातः मन्दुरजः।

तत्पुरुषे कृति बहुलम्। ६। ३। १४॥

ङेरलुक्। सरसिजम्। सरोजम्।

उपसर्गे च संज्ञायाम्। ३। २। ९९॥

प्रजा स्यात् सन्ततौ जने।

क्तक्तवतू निष्ठा। १। १। २६॥

एतौ निष्ठासंज्ञौ स्तः।

निष्ठा। ३। २। १०२॥

भूतार्थवृत्तेर्धातोर्निष्ठा। तत्र तयोरेवेति भावकर्मणोः क्तः। कर्त्तरि क्तादिति कर्त्तरि क्तवतुः। स्नातम्मया। स्नातस्त्वया विष्णुः। विश्वं क्षतवान् विष्णुः।

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ।८।२।४२ ॥

रदाभ्यां परस्य निष्ठातस्य नः स्यात् । निष्ठापेक्षया पूर्वस्य धातोर्दस्य च । शॄ हिंसायाम् । शीर्णः । भिन्नः छिन्नः ।

संयोगादेरातोधातोर्यण्वतः । ८ । २ । ४३ ॥

निष्ठातस्य नः स्यात् । द्राणः । ग्लानः ।

ल्वादिभ्यः । ८ । २ । ४४ ॥

एकविंशतेर्लूआदिभ्यः प्राग्वत् । लूनः । ज्या धातुः । ग्रहिज्येति सम्प्रसारणम् ।

हलः । ६ । ४ । २ ॥

अङ्गावयवाद्धलः परं यत् सम्प्रसारणं तदन्तस्य दीर्घः । जीनः ।

ओदितश्च । ८ । २ । ४५ ॥

भुजो भुग्नः । टु ओश्वि । उच्छूनः ।

शुषः कः । ८ । २ । ५१ ॥

निष्ठातस्य शुष्कः ।

पचो वः । ८ । २ । ५२ ॥

पक्वः । चै हर्षक्षये ।

क्षायो मः । ८ । २ । ५३ ॥

क्षामः ।

निष्ठायां सेटि । ६ । ४ । ५२ ॥

ऊदुपधाया गोहः । भावितः । भावितवान् । ट्टह हिंसायाम् ।

दृढः स्थूलबलयोः । ७ । २ । २० ॥

स्थूले बलवति च निपात्यते ।

दधातेर्हिः। ७। ४। ४२॥

तादौ किति। हितम्।

दोदद्घोः। ७। ४। ४६॥

घुमंज्ञकस्य दा द्रव्यस्य दथ् तादौ किति। चर्वम्। दत्तः।

लिटः कानज्वा। ३। २। १०६॥

क्वसुश्च। ३। २। १०७॥

लिटः कानचक्वसू वा स्तः। तङानावात्मनेपदम्। चक्राणः।

म्वोश्च। ८। २। ६५॥

मान्तस्य धातोर्नत्वं म्वोः परतः। जगन्वान्।

लटः शतृशानचावप्रथमासमानाधिकरणे। ३। २। १२४॥

अप्रथमान्तेन समानाधिकरणे लट एतौ वा स्तः। शवादिः। पचन्तं चैत्रं पश्य।

आने मुक्। ७। २। ८२॥

अदन्ताङ्गस्य मुगागमः स्यात् आने परे। पचमानं चैत्रं पश्य। लड़ित्यनुवर्त्तमाने पुनर्लङ्ग्रहणात् प्रथमासामानाधिकरण्येऽपि क्वचित्। सन् द्विजः।

विदेः शतुर्वसुः। ७। १। ३६॥

वेत्तेः परस्य शतुर्वसुरादेशो वा स्यात्। विदन्। विद्वान्।

तौ सत्। ३। २। १२७॥

तौ शतृशानचौ सत्संज्ञौ स्तः।

लटः सद्वा । ३ । ३ । १४ ॥

करिष्यन्तं करिष्यमाणं पश्य ।

आक्रोस्तच्छीलतद्धर्मतत्साधुकारिषु ।३।२।१३४ ॥

क्रियमभिव्याप्य वक्ष्यमाणास्तच्छीलादिषु कर्त्तृषु बोध्याः ।

तृन् । ३ । २ । १३५ ॥

कर्त्ता कटान् ।

जल्पभिक्षकुट्टलुण्ठवृङः षाकन् ।३।२।१५५ ॥

षः प्रत्ययस्य । १ । ३ । ६ ॥

प्रत्ययस्यादिः ष इत्संज्ञः स्यात् । जल्पाकः । वराकः ।

सनाशंसभिक्ष उ । ३ । २ । १६८ ॥

चिकीर्षुः । आशंसुः । भिक्षुः ।

भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्

। ३ । २ । १७७ ॥

विभ्राट् । भाः ।

राल्लोपः । ६ । ४ । २१ ॥

रेफाच्छीलीपः क्वौ झलादौ क्ङिति च । धूः । विद्युत् । जर्क् । पूः । दृशिग्रहणस्यापकर्षाज्जयतेर्दीर्घः । जूः । ग्रावस्तुत् ।

क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्च । वक्तीति वाक् ।

च्छ्वोः शूडनुनासिके च । ६ । ४ । १९ ॥

सतुक्कस्य छस्य वस्य च क्रमात् श् उट् एतावादेशौ स्तः क्वौ अनुनासिकादौ झलादौ क्ङिति च । पृच्छतीति प्राट् ।

आयतं स्तौति आयतस्तूः। कटं प्रवते कटप्रूः। जृरुक्तः। अयति हरिं श्रीः।

दाव्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे। ३। २। १८२॥

दावादेः ष्ट्रन् स्यात् करणेऽर्थे। दात्यनेन दात्रम्।

तितुत्रतथसिसुसरकसेषु च। ७। २। ९॥

एषां दशानामिण् न स्यात्। शस्त्रम्। योत्रम्। योक्त्रम्। स्रोत्रम्। तोत्रम्। सेत्रम्। सेक्त्रम्। मेढ्रम्। पत्त्रम्। दंष्ट्रा। नड्वी।

अर्त्तिलूधूसूखनसहचर ट्रुचः। ३। २। १८४॥

अरित्रम्। लवित्रम्। धवित्रम्। सवित्रम्। खनित्रम्। सहित्रम्। चरित्रम्।

पुवः संज्ञायाम्। ३। २। १८५॥

पवित्रम्।

अथोणादयः।

ऋवापाजिमिस्वदिसाध्यशूभ्य उण्।

करोतीति कारुः। वायुः। पायुर्गुदम्। जायुरौषधम्। मायुः पित्तम्। स्वादुः। साध्नोति परकार्य्यमिति साधुः। आशु शीघ्रम्।

उणादयो बहुलम्। ३। ३। १॥

एते वर्त्तमाने संज्ञायां च बहुलं स्युः। केचिदविहिता अप्यूह्याः।

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद्विद्यादनवन्त्यमेतच्छास्त्रमुणादिषु ॥

तुमुन् ण्वुलौ क्रियायां क्रियार्थायाम् ।३।३।१० ॥

क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । मान्तत्वादव्ययत्वम् । कृष्णं द्रष्टुं याति । कृष्णन्दर्शको याति ।

कालसमयवेलासु तुमुन् । ३ । ३ । १६७ ॥

कालः समयो वेला वा भोक्तुम् ।

भावे । ३ । ३ । १८ ॥

सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् । पाकः ।

अकर्त्तरि च कारके संज्ञायाम् ।३।३।१९ ॥

कर्त्तृभिन्ने कारके घञ् ।

घञि च भावकरणयोः । ६ । ४ । २७ ॥

रञ्जेर्नलोपः स्यात् । रागः । अनयोः किम् । रज्यत्यस्मिन्निति रङ्गः ।

निवासचितिशरीरोपसमाधानेष्वादेश्च कः ।३।३।४१ ॥

एषु चिनोतेर्घञ् आदेश्च कः । उपसमाधानं राशीकरणम् । निकायः । कायः । गोमयनिकायः ।

एरच् । ३ । ३ । ५६ ॥

इवर्णान्तात् । चयः । जयः ।

ऋदोरप् । ३ । ३ । ५७ ॥

ऋवर्णान्तादुवर्णान्तादप् । करः । गरः । शरः । यवः । स्तवः । लवः । पवः । घञर्थे कविधानम् । प्रस्थः विघ्नः ।

डिवः क्तिः। ३। ३। ८८॥

क्तेर्मप् नित्यम्। ४। ४। २०॥

क्तिप्रत्ययान्तात् मप् निर्वृत्तेऽर्थे। पाकेन निर्वृत्तं पक्तिमम्। डुवप्। उप्तिमम्।

ट्वितोऽथुच्। ३। ३। ८९॥

डुवेपृ कम्पने। वेपथुः।

यजयाचयतविच्छप्रच्छरक्षो नङ्। ३। ३। ९०॥

यज्ञः। याञ्ञा। यत्नः। विश्नः। प्रश्नः। रक्षा।

स्वपो नन्। ३। ३। ९१॥

स्वप्नः।

उपसर्गे घोः किः। ३। ३। ९२॥

प्रधिः। उपधिः।

स्त्रियां क्तिन्। ३। ३। ९४॥

स्त्रीलिङ्गे भावे क्तिन्। घञोऽपवादः। कृतिः। स्तुतिः। ऋत्वादिभ्यः क्तिन् निष्ठावद्वाच्यः। तेन नत्वम्। कीर्णिः। लूनिः। धूनिः। पूनिः।

सम्पदादिभ्यः क्विप्। सम्पत्। विपत्। आपत्। क्तिन्नपोऽत्रे। सम्पत्तिः। विपत्तिः। आपत्तिः।

ऊतियूतिजूतिसातिहेतिकीर्तयश्च। ३। ३। ९७॥

एते निपात्यन्ते।

ज्वरत्वरस्रिव्यविमवामुपधायाश्च। ६। ४। २०॥

एषामुपधावकारयोरूट् अनुनासिके क्ङिति च। जनिः। क्विप्। जूः। तूः। स्रुः। जः। मूः।

इच्छा । ३ । ३ । १०१ ॥

इषेर्निपातोऽयम् ।

अः प्रत्ययात् । ३ । ३ । १०२ ॥

प्रत्ययान्तेभ्यः स्त्रियामकारः प्रत्ययः स्यात् । चिकीर्षा । कीर्षा पुत्रकाम्या ।

गुरोश्च हलः । ३ । ३ । १०३ ॥

गुरुमतो हलन्तात् स्त्रियामः प्रत्ययः । ईहा ।

ण्यासश्रन्थो युच् । ३ । ३ । १०७ ॥

अकारस्यापवादः । कारणा । हारणा ।

नपुंसके भावे क्तः । ३ । ३ । ११४ ॥

ल्युट् च । ३ । ११५ ॥

हसितम् । हसनम् ।

पुंसि संज्ञायां घः प्रायेण । ३ । ३ । १८८ ॥

कृदेर्धेऽद्व्युपसर्गस्य । ६ । ४ । ९६ ॥

द्व्यादिप्रभृत्युपसर्गहीनस्य कृदेर्ङ्खो घे । दन्तच्छदः । आकुर्वन्त्यस्मिन्निति आकरः ।

अवेतॄस्तोर्घञ् । ३ । ३ । १२० ॥

अवतारः । अवस्तारो यवनिका ।

हलश्च । ३ । ३ । १२१ ॥

हलन्ताद् घञ् । घापवादः । रमन्ते योगिनोऽस्मिन्निति रामः । अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः ।

ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।३।३।१२६॥

एषु दुःखसुखार्थेषूपपदेषु । खल् । तयोरेवेति भावे कर्मणि च । कृच्छ्रे । दुष्करः कटो भवता । अकृच्छ्रे । ईषत्करः । सुकरः ।

आतो युच् । ३ । ३ । १२८ ॥

खलोऽपवादः । ईषत्पानः सोमो भवता । दुष्पानः । सुपानः ।

अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा ।३।४।१८॥

प्रतिषेधार्थयोरलं खल्वोरुपपदयोः क्त्वा । दोदद्घोः । अलन्दत्वा । घुमास्थेतीत्वम् । पीत्वा खलु । अलं खल्वोः किम् । मा कार्षीत् । प्रतिषेधयोः किम् । अलङ्कारः ।

समानकर्तृकयोः पूर्वकाले । ३ । ४ । २१ ॥

समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा । स्नात्वा व्रजति । हित्वमतन्त्रम् । भुक्त्वा पीत्वा व्रजति ।

न त्वासेट् । १ । २ । १८ ॥

सेट् क्त्वा किन्न स्यात् । शयित्वा । सेट् किम् । कृत्वा ।

रलो व्युपधाद्धलादेः संश्च । २ । २ । २६ ॥

इवर्णोवर्णोपधाद्धलादेरलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः । द्युतित्वा । द्योतित्वा । लिखित्वा । लेखित्वा । व्युपधा-किम् । वर्त्तित्वा । रलः किम् । सेवित्वा हलादेः किम् । एधित्वा । सेट किम् । भुक्त्वा ।

उदितो वा। ७। २। ५६॥

उदितः परस्य क्त्वः इड्वा। शमित्वा। शान्त्वा। देवित्वा। दीव्यित्वा। दधातेर्हिः। हित्वा।

जहातेश्च क्त्वि। ७। ४। ४३॥

हित्वा। हाङस्तु हात्वा।

समासेऽनञ्पूर्वे क्त्वो ल्यप्। ७। १। ३७॥

अव्ययपूर्वपदेऽनञ् समासे क्त्वो ल्यबादेशः। तुक्। प्रकृत्य। अनञ् किम्। अकृत्वा। अव्यय पूर्वपदे किम्। परमकृत्वा।

आभीक्ष्ण्ये णमुल् च। ३। ४। २२॥

आभीक्ष्ण्ये द्योत्ये पूर्वविषये णमुल् क्त्वा च।

नित्यवीप्सयोः। ८। १। ४॥

आभीक्ष्ण्ये वीप्सायाञ्च द्योत्ये पदस्य द्वित्वं स्यात्। आभीक्ष्ण्ये तिङन्तेष्वव्ययसंज्ञकेषु कृदन्तेषु च। स्मारं स्मारं नमति शिवम्। स्मृत्वा स्मृत्वा। पायं पायम्। भोजं भोजम्। आवं आवम्।

अन्यथैवङ्कथमित्थं सुसिद्धाप्रयोगश्चेत्। ३।४।२७॥

एषु कृजो णमुल् स्यात् सिद्धोऽप्रयोगो यस्य एवम्भूतश्चेत् कृञ्। व्यर्थत्वात् प्रयोगानर्ह इत्यर्थः। अन्यथाकारम्। एवङ्कारम्। कथङ्कारम्। इत्थङ्कारं भुङ्क्ते। सिद्धेति किम्। शिरोऽन्यथा कृत्वा भुङ्क्ते।

इति कृदन्तप्रक्रिया।

कारकम् ।

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । २ । ३ । ४६ ॥

नियतोपस्थितिकः प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात् । प्रातिपदिकार्थमात्रे । उच्चैः । नीचैः । कृष्णः । स्त्रीः । ज्ञानम् । लिङ्गमात्रे । तटः । तटी । तटम् । परिमाण-मात्रे । द्रोणो व्रीहिः वचनं संख्या । एकः । द्वौ । बहवः ।

सम्बोधने च । २ । ३ । ४७ ॥

प्रथमा । हे राम ।

कर्तुरीप्सिततमं कर्म । १ । ४ । ४९ ॥

कर्तुः क्रियया यमभिप्रैति तत्कारकं कर्मसंज्ञं स्यात् ।

कर्मणि द्वितीया । २ । ३ । २ ॥

अनुक्ते कर्मणि द्वितीया । हरिं भजति । अभिहिते तु कर्मादौ प्रथमा । हरिः सेव्यते । लक्ष्म्या सेवितः ।

अकथितञ्च । १ । ४ । ५१ ॥

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् ।

दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमन्थमुषाम् । कर्मयुक् स्यादकथितन्तथा स्यान्नीहृकृष्वहाम् ॥ १ ॥ गां दोग्धि पयः । बलिं याचते वसुधाम् । तण्डुलानोदनं पचति । गर्गान् शतं दण्डयति । व्रजमवरुणद्धि गाम् । माणवकं पन्थानं पृच्छति । वृक्षमवचिनोति फलानि । माणवकं धर्मं ब्रूते ।

शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति हरति कर्षति वहति वा। अर्थनिबन्धनेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते अभिधत्ते वक्ति इत्यादि।

साधकतमं करणम्। १। ४। ४२॥

क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। स्वतन्त्र इति कर्तृसंज्ञा।

कर्तृकरणयोस्तृतीया। २। ३। २८॥

अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो बाली।

कर्मणा यमभिप्रैति स सम्प्रदानम्।१।४।३२॥

दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्।

चतुर्थी सम्प्रदाने। २। ३। १३॥

विप्राय गां ददाति।

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च

। २। ३। १६॥

एभिर्योगे चतुर्थी स्यात्। हरये नमः। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्याप्त्यर्थग्रहणम्। तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि।

ध्रुवमपायेऽपादानम्। १। ४। २४॥

अपायो विश्लेषस्तस्मिन् साध्ये यद्ध्रुवमवधिभूतं कारकं तदपादानसंज्ञं स्यात्।

अपादाने पञ्चमी। २। ३। २८॥

ग्रामादायाति। धावतोऽश्वात्पतति। इत्यादि।

षष्ठी शेषे। २। ३। ५०॥

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः शेषस्तत्र षष्ठी। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सताङ्गतम्। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः।

आधारोऽधिकरणम्। १। ४। ४५॥

कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणं स्यात्।

सप्तम्यधिकरणे च। २। ३। ३६॥

चकाराद् दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्मास्ति। वनस्य दूरे अन्तिके वा।

इति विभक्त्यर्थाः।

समासः।

समासः पञ्चधा।

तत्र समसनं समासः। स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः। प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः। प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषस्तृतीयः। तत्पुरुषभेदः कर्मधारयः। कर्मधारयभेदो द्विगुः। प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः। प्रायेणोभयपदार्थप्रधानो द्वन्द्वः पञ्चमः।

समर्थः पदविधिः । २ । १ । १ ॥

पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः ।

प्राक् कड़ारात्समासः । २ । १ । ३ ॥

कड़ाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते ।

सह सुपा । २ । १ । ४ ॥

सुप् सुपा सह वा समस्यते । समासत्वात् प्रातिपदिकत्वेन सुपो लुक् । परार्थाभिधानं वृत्तिः । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । वृत्त्यर्थावबोधकं वाक्यं विग्रहः । स च लौकिकोऽलौकिकश्चेति द्विधा । तत्र पूर्वं भूत इति लौकिकः । पूर्वं अम् भूत सु इति अलौकिकः । भूतपूर्वः । भूतपूर्वे चरडिति निर्देशात् पूर्वनिपातः । इवेन सह समासो विभक्त्यलोपश्च । वागर्थौ इव वागार्थाविव ।

इति केवलसमासः प्रथमः ।

अव्ययीभावः ।

अव्ययीभावः । २ । १ । ५ ॥

अधिकारोऽयम् । प्राक् तत्पुरुषात् ।

अव्ययं विभक्तिसमीपसमृद्धिव्यृध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु ।२।१।६ ॥

विभक्त्यर्थादिषु वर्त्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते । प्रायेणाविग्रहो नित्यसमासः । प्रायेणास्वपदविग्रहो वा । विभक्तौ इति ङि अधि इति स्थिते ।

प्रथमानिर्दिष्टं समास उपसर्जनम् । १।२।४३ ॥

समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनं स्यात् ।

उपसर्जनं पूर्वम् । २ । २ । ३० ॥

समासे उपसर्जनं प्राक् प्रयोज्यम् । इत्यधेः प्राक् प्रयोगः । सुपो लुक् । एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः । अव्ययीभावश्चेत्यव्ययत्वात् सुपो लुक् । अधिहरि ।

अव्ययीभावश्च । २ । ४ । १८ ॥

अयं नपुंसकं स्यात् । गाः पातीति गोपाः । तस्मिन्नित्यधिगोपम् ।

नाव्ययीभावादतोऽम् त्वपञ्चम्याः । २।४।८३ ॥

अदन्तादव्ययीभावात् सुपो न लुक् तस्य पञ्चमीं विना अमादेशः ।

तृतीयासप्तम्योर्बहुलम् । २ । ४ । ८४ ॥

अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलमभावः । उपकृष्णम् । उपकृष्णेन । मद्राणां समृद्धिः सुमद्रम् । यवनानां व्यृद्धिर्दुर्यवनम् । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्यात्ययोऽतिहिमम् । निद्रा सम्प्रति न युज्यत इत्यतिनिद्रम् । हरिशब्दस्य प्रकाश इति अधिहरि । विष्णोः पश्चादनुविष्णु । योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । रूपस्य योग्यमनुरूपम् । अर्थमर्थं प्रति प्रत्यर्थम् । शक्तिमनतिक्रम्य यथाशक्ति ।

अव्ययीभावे चाकाले । ६ । ३ । ८१ ॥

सहस्य सः स्यादव्ययीभावे न तु काले । हरेः सादृश्यं सहरि । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण युगपत् सचक्रम् ।

सप्तन: सख्या समखि । क्षत्राणां सम्पत्ति: सक्षत्रम् । तृणमप्य-परित्यज्य सतृणमत्ति । अग्नियन्त्यपर्य्यन्तमधीते साग्नि ।

नदीभिश्च । २ । १ । २० ॥

नदीभि: सह संख्या वा समस्यते । समाहारे चायमिष्यते । पञ्चगङ्गम् । द्वियमुनम् ।

तद्धिता: । ४ । १ । ७६ ॥

आ पञ्चमसमाप्ते रधिकारोऽयम् ।

अव्ययीभावे शरत्प्रभृतिभ्य: । ५ । ४ । १०७ ॥

शरदादिभ्यष्टच् स्यात् समासान्तोऽव्ययीभावे । शरद: समीपमुपशरदम् । प्रतिविपाशम् । जराया जरस् च । उपजरसम् । इत्यादि ।

अनश्च । ५ । ४ । १०८ ॥

अन्नन्तादव्ययीभावाट्टच् ।

नस्तद्धिते । ६ । ४ । १४४ ॥

नान्तस्य भस्य टेर्लोपस्तद्धिते । उपराजम् । अध्यात्मम् ।

नपुंसकादन्यतरस्याम् । ५ । ४ । १०९ ॥

अन्नन्तं यत् क्लीवं तदन्तादव्ययीभावाट्टच् वा । उपचर्मम् । उपचर्म ।

ऋयः । ५ । ४ । १११ ॥

ऋयन्तादव्ययीभावाट्टच्वा । उपसमिधम् । उपसमित् ।

इत्यव्ययीभाव: ।

तत्पुरुषः ।

तत्पुरुषः । २ । १ । २२ ॥

अधिकारोऽयम् । प्राग् बहुव्रीहेः ।

द्विगुश्च । २ । १ । २३ ॥

तत्पुरुषसंज्ञकः ।

द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः । २ । १ । २४ ॥

द्वितीयान्तं श्रितादिप्रकृतिकैः । सुबन्तैः सह वा समस्यते । कृष्णं श्रितः कृष्णश्रितः । इत्यादि ।

तृतीया तत्कृतार्थेन गुणवचनेन ।२।१।३० ॥

तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थेन च सह वा प्राग्वत् । शङ्कुलया खण्डः शङ्कुलाखण्डः । धान्येनार्थः धान्यार्थः । तत्कृतेति किम् । अक्ष्णा काणः ।

कर्त्तृकरणे कृता बहुलम् । २ । १ । ३२ ॥

कर्त्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत् । हरित्रातः । नखभिन्नः । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् । नखनिर्भिन्नः ।

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ।२।१।३६ ॥

चतुर्थ्यन्तार्थाय यत् तदाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत् । यूपाय दारु यूपदारु । तदर्थेन प्रकृतिविकृतिभाव वेष्टः । तेनेह न । रन्धनाय स्थाली ।

अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् । द्विजाय

अयम् । द्विजार्थः सूपः । द्विजार्था यवागूः । द्विजार्थं पयः । भूतबलिः । गोहितम् । गोसुखम् । गोरक्षितम् ।

पञ्चमी भयेन । २ । १ । ३७ ॥

चौराद्भयं चौरभयम् ।

स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन । २ । १ । ३९ ॥

पञ्चम्याः स्तोकादिभ्यः । ६ । ३ । २ ॥

अलुगुत्तरपदे । स्तोकान्मुक्तः । अन्तिकादागतः । अभ्यासादागतः । दूरादागतः । कृच्छ्रादागतः ।

षष्ठी । २ । २ । ८ ॥

सुबन्तेन प्राग्वत् । राजपुरुषः ।

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे । २ । २ । १ ॥

अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी । षष्ठी समासापवादः । पूर्वं कायस्य पूर्वकायः । अपरकायः । एकाधिकरणे किम् ? पूर्वश्छात्राणाम् ।

अर्द्धं नपुंसकम् । २ । २ । २ ॥

समांशवाचार्द्धशब्दो नित्यं क्लीवे प्राग्वत् । अर्द्धं पिप्पल्याः अर्द्धपिप्पली ।

सप्तमी शौण्डैः । २ । १ । ४० ॥

सप्तम्यन्तं शौण्डादिभिः प्राग्वत् । अक्षेषु शौण्डः अक्षशौण्डः । इत्यादि । द्वितीयाश्रितेत्यादि । योगविभागादन्यत्रापि द्वितीयादिविभक्तीनां प्रयोगवशात् समासो ज्ञेयः ।

दिक्संख्ये संज्ञायाम्। २। १। ५०॥

संज्ञायामेवेति नियमार्थं सूत्रम्। पूर्वेषु कामशमी पूर्वकामशमो। सप्त ऋषयः सप्तर्षयः। तेनेह न। उत्तरा वृक्षाः। पञ्च ब्राह्मणाः।

तद्धितार्थोत्तरपदसमाहारे च। २। १। ५१॥

तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत्। पूर्वस्यां शालायां भवः पूर्वशाला इति समासे जाते। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः।

दिक् पूर्वपदादसंज्ञायां ञः। ४। २। १०७॥

अस्माद्भवाद्यर्थे ञः स्यादसंज्ञायाम्।

तद्धितेष्वचामादेः। ७। २। ११७॥

ञिति णिति च तद्धितेष्वचामादेरचो वृद्धिः स्यात्। यस्येति च। पौर्वशालः। पञ्चगावो धनं यस्येति त्रिपदे बहुव्रीहौ।

द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्।

गोरतद्धितलुकि। ५। ४। ९२॥

गोऽन्तात्तत्पुरुषाट्टच् स्यात् समासान्तो न तु तद्धितलुकि। पञ्चगवधनः।

तत्पुरुषः समानाधिकरणः कर्मधारयः। १। २। ४२॥

संख्यापूर्वो द्विगुः। २। १। ५२॥

तद्धितार्थेत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्विगुसंज्ञः स्यात्।

द्विगुरेकवचनम् । २ । ४ । १ ॥

द्विग्वर्थः समाहारः एकवत्स्यात् ।

स नपुंसकम् । २ । ४ । १७ ॥

समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । पञ्चानां गवां समाहारः पञ्चगवम् ।

विशेषणं विशेष्येण बहुलम् । २ । १ । ५७ ॥

भेदकं भेद्येन समानाधिकरणेन बहुलं प्राग्वत् । नीलमुत्पलं नीलोत्पलम् । बहुलग्रहणात् क्वचिन्नित्यम् । कृष्णसर्पः । क्वचिन्न । रामो जामदग्न्यः ।

उपमानानि सामान्यवचनैः । २ । १ । ५५ ॥

घनश्यामः ।

शाकपार्थिवादीनामुत्तरपदलोपो वक्तव्यः । शाकप्रियः पार्थिवः शाकपार्थिवः । देवब्राह्मणः ।

नञ् । २ । २ । ६ ॥

नञ् सुपा प्राग्वत् ।

न लोपो नञः । ६ । ३ । ७३ ॥

नञो नस्य लोप उत्तरपदे । अब्राह्मणः ।

तस्मान्नुड्चि । ६ । ३ । ७४ ॥

लुप्तनकाराद्यत्र उत्तरपदस्यादेर्नुट् । अनश्वः । नैकधेत्यादौ तु नञ्शब्देन सह सुप्सुपेति समासः ।

कुगतिप्रादयः । २ । २ । १८ ॥

एते समर्थेन नित्यं समस्यन्ते । कुत्सितः पुरुषः कुपुरुषः ।

कर्म्यादिच्विडाचश्च। १। ४। ६१॥

कर्म्यादयः च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञा स्युः। करीकृत्य। शुक्लीकृत्य। पटपटाकृत्य। सुपुरुषः।

प्रादयो गताद्यर्थे प्रथमया। प्रगत आचार्य्यः। प्राचार्य्यः।

अत्यादयः क्रान्ताद्यर्थे द्वितीयया। अतिक्रान्तो मालामिति विग्रहे।

एकविभक्ति चापूर्वनिपाते। १। २। ४४॥

विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं न तु तस्य पूर्वनिपातः।

गोस्त्रियोरुपसर्जनस्य। १। २। ४८॥

उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तश्च तदन्तस्य प्रातिपदिकस्य ह्रस्वः। अतिमालः।

अवादयः क्रुष्टाद्यर्थे तृतीयया। अवक्रुष्टः कोकिलया अवकोकिलः।

पर्य्यादयो ग्लानाद्यर्थे चतुर्थ्या। परिग्लानोऽध्ययनाय पर्य्यध्ययनः।

निरादयः क्रान्ताद्यर्थे पञ्चम्या। निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः।

तत्रोपपदं सप्तमीस्थम्। ३। १। ९२॥

सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत् कुम्भादि तद्वाचकं पदमुपपदं स्यात्।

उपपदमतिङ्। २। २। १९॥

उपपदं समर्थेन नित्यं समस्यतेऽतिङन्तञ्च समासः। कुम्भं

करोतीति कुम्भकारः। अतिङ् किम्। मा भवान् भूत्। माङि लुङीति सप्तमीनिर्देशात् माङुपपदम्। गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः। व्याघ्री। अश्वक्रीती। कच्छपी। इत्यादि।

तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ।५।४।८६॥

संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात्। द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम्। निर्गतमङ्गुलिभ्यो निरङ्गुलम्।

अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ।५।४।८७॥

एभ्यो रात्रेरच् स्यात्। चात्संख्याव्ययादेः। अहर्गृहण द्वन्द्वार्थम्।

रात्राह्नाहाः पुंसि। २। ४। २९॥

एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव। अहश्च रात्रिश्चाहोरात्रः। सर्वरात्रः। संख्यातरात्रः। संख्यापूर्वं रात्रं क्लीवम्। द्विरात्रम् त्रिरात्रम्।

राजाहःसखिभ्यष्टच्। ५। ४। ९१॥

एतदन्तात्तत्पुरुषाट्टच्। परमराजः।

आन्महतः समानाधिकरणजातीययोः ।६।३।४६॥

महाराजः। प्रकारवचने जातीयर्। महाप्रकारो महाजातीयः।

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः। ६।३।४७॥

आत्स्यात्। द्वादश। अष्टाविंशतिः।

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः। २। ४। २६॥

कुक्कुटमयूर्यौ विमे। मयूरीकुक्कुटावमी। अजैडपिप्पली।

द्विगुप्राप्तापन्नालं पूर्वगतिसमासेषु न। पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः पुरोडाशः। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नजीविकः। अलं कुमार्यै अलंकुमारिः। अत एव ज्ञापकात् समासः। निष्कौशाम्बिः।

अर्धर्चाः पुंसि च। २। ४। ३१॥

अर्धर्चादयः पुंसि क्लीबे च स्युः। अर्धर्चः। अर्धर्चम्। एवं ध्रजतीर्थशरीरमण्डपयूपदेहाङ्गशकलशपात्रसूत्रादयः।

सामान्ये नपुंसकम्। मृदु पचति। प्रातः कमनीयम्।

इति तत्पुरुषः।

बहुव्रीहिः।

शेषो बहुव्रीहिः। २। २। २३॥

अधिकारोऽयम्। प्राग्द्वन्द्वात्।

अनेकमन्यपदार्थे। २। २। २४॥

अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः।

सप्तमी विशेषणे बहुव्रीहौ। २। २। ३५॥

सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात्। कण्ठे कालः अत एव ज्ञापकाद्यधिकरणपदो बहुव्रीहिः।

हलदन्तात् सप्तम्याः संज्ञायाम्। ६। ३। ९॥

हलन्ताददन्ताच्च सप्तम्या अलुक्। त्वचि-सारः। प्राप्तमुदकं यं प्राप्तोदको ग्रामः। जाठरथोऽनड्वान्। उपहृतपशुरुद्रः। उद्धृतौदना स्थाली। पीताम्बरो हरिः। वीरपुरुषको ग्रामः।

प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्च । प्रपतितपर्णः प्रपर्णः ।

नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः । अविद्यमानपुत्रोऽपुत्रः ।

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु । ६ । ३ । ३४

उक्तपुंस्कादनूङ् जङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं समानाधिकरणे न तु पूरण्यां प्रियादौ च । गोस्त्रियोरिति ह्रस्वः । चित्रगुः । रूपवद्भार्यः । अनूङ् किम् । वामोरूभार्यः ।

अप् पूरणीप्रमाण्योः । ५ । ४ । ११६ ॥

पूरणार्थप्रत्ययान्तं यत् स्त्रीलिङ्गं तदन्तात् प्रमाणान्ताच्च बहुव्रीहेरप् स्यात् । कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । स्त्री प्रमाणी यस्य स्त्रीप्रमाणः । अप्रियादिषु किम् । कल्याणीप्रियः । इत्यादि ।

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।५।४।११३ ॥

स्वाङ्गवाचि सक्थ्यक्ष्यन्ताद् बहुव्रीहेः षच् । दीर्घसक्थः । जलजाक्षी । स्वाङ्गात् किम् । दीर्घसक्थि शकटम् । स्थूलाक्षा वेणुयष्टिः ।

अक्ष्णोऽदर्शनादिति वक्ष्यमाणोऽच् ।

द्वित्रिभ्यां षो मूर्धः । ५ । ४ । ११५ ॥

द्विमूर्धः । त्रिमूर्धः ।

अन्तर्बहिर्भ्याञ्च लोम्नः । ५ । ४ । ११७ ॥

अप् स्यात् । अन्तर्लोमः । बहिर्लोमः ।

पादस्य लोपोऽहस्त्यादिभ्यः । ५ । ४ । १३८ ॥

हस्त्यादिवर्जितादुपमानात् परस्य पादस्य लोपः । व्याघ्रस्येव पादावस्य व्याघ्रपात् । अहस्त्यादिभ्यः किम् । हस्तिपादः । कुसूलपादः ।

संख्यासुपूर्वस्य । ५ । ४ । १४० ॥

लोपः स्यात् । द्विपात् । सुपात् ।

उद्विभ्यां काकुदस्य । ५ । ४ । १४८ ॥

लोपः स्यात् । उत्काकुत् । विकाकुत् ।

पूर्णाद्विभाषा । ५ । ४ । १४९ ॥

पूर्णकाकुत् । पूर्णकाकुदः ।

सुहृद्दुर्हृदौ मित्रामित्रयोः । ५ । ४ । १५० ॥

सुहृन्मित्रम् । दुर्हृदमित्रः ।

उरःप्रभृतिभ्यः कप् । ५ । ४ । १५१ ॥

कस्कादिषु च । ८ । ३ । ४८ ॥

एभिर्य उत्तरस्य विसर्गस्य षोऽन्यस्य तु सः । इति सः । व्यूढोरस्कः । प्रियसर्पिष्कः ।

निष्ठा । २ । २ । ३६ ॥

निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् । युक्तयोगः ।

श्रेष्ठादिभाषा । ५ । ४ । १५४ ॥

अनुक्तसमासान्ताद् बहुव्रीहेः कप् वा । महायशस्कः । महायशाः ।

इति बहुव्रीहिः ।

द्वन्द्वः ।

चार्थे द्वन्द्वः । २ । २ । २९ ॥

अनेकं सुबन्तं चार्थे वर्त्तमानं वा समस्यते स द्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः तत्रेश्वरं गुरुं च भजस्वेति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः । भिक्षामट गां चानयेति । अन्यतरस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयः । अनयोरसामर्थ्यात् समासो न । धवखदिरौ छिन्धीति । मिलितानामन्वय इतरेतरयोगः । संज्ञापरिभाषमिति समूहः समाहारः ।

राजदन्तादिषु परम् । २ । २ । ३१ ॥

एषु पूर्वप्रयोगार्हं परं स्यात् दन्तानां राजा राजदन्तः । धर्मादिष्वनियमः । अर्थधर्मौ । धर्मार्थौ । इत्यादि ।

द्वन्द्वे घि । २ । २ । ३२ ॥

पूर्वं स्यात् । हरिहरौ ।

अजाद्यदन्तम् । २ । २ । ३३ ॥

ईशकृष्णौ ।

अल्पाच् तरम् । २ । २ । ३४ ॥

शिवकेशवौ ।

पिता मात्रा । १ । २ । ७० ॥

मात्रा सहोक्तौ पिता वा शिष्यते । पितरौ मातापितरौ ।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् । २ । ४ । २ ॥

एषां द्वन्द्व एकवत् । पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् ।

इन्द्वाच्चवर्गषहान्तात् समाहारे । ५ । ४ । १०६ ॥

चवर्गान्ताद्षहान्ताच्च इन्द्वाट्टच् स्यात् समाहारे । वाक्त्वचम् । त्वक्स्रजम् । शमीट्षदम् । वाक्त्विषम् । क्त्वोपानहम् । समाहारे किम् । प्रावृट्शरदौ ।

इति इन्द्वः ।

समासान्ताः ।

ऋक्पूरब्धूः पथामानक्षे । ५ । ४ । ७४ ॥

ऋगाद्यन्तस्य समासस्य अप्रत्ययोऽन्तावयवः अक्षे या धूस्तदन्तस्य न । अर्धर्चः । विष्णुपुरम् । विमलापं सरः । राजधुरा । अक्षे तु । अक्षधूः । दृढ़धूरक्षः । सखिपथः । रम्यपथो देशः ।

अच्क्षोऽदर्शनात् । ५ । ४ । ७६ ॥

अचक्षुः पर्य्यायादक्षोऽच् स्यात् । गवामक्षीव गवाक्षः ।

उपसर्गादध्वनः । ५ । ४ । ८५ ॥

प्रगतोऽध्वानं प्राध्वो रथः ।

न पूजनात् । ५ । ४ । ६६ ॥

पूजनार्थात् परेभ्यः समासान्ता न स्युः । सुराजा । अतिराजा ।

इति समासान्ताः ।

तद्धिताः ।

समर्थानां प्रथमाद्वा । ४ । १ । ८२ ॥

इदमधिक्रियते । प्राग्दिश इति यावत् ।

अश्वपत्यादिभ्यश्च । ४ । १ । ८४ ॥

एभ्योऽण् स्यात् प्राग्दीव्यतीयेष्वर्थेषु ।

तद्धितेष्वचामादेः । ७ । २ । ११७ ॥

ञिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः स्यात् । आश्वपतेरपत्यादि । आश्वपतम् । गाणपतम् ।

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः । ४ । १ । ८५ ॥

प्राग्दीव्यतीयेष्वर्थेषु । दितेरपत्यं दैत्यः । अदितेरादित्यस्य वा आदित्यः । प्राजापत्यः । देवाद्यञञौ । दैव्यम् । दैवम् ।

वह्निष्टिलोपो यञ् च । वाह्यः । ईकक् च ।

किति च । ७ । २ । ११८ ॥

अचामादेरचो वृद्धिः स्यात् । बाह्वीकः ।

गोरजादिप्रसङ्गे यत् । गोरपत्यादि । गव्यम् ।

उत्कादिभ्योऽञ् । ४ । १ । ८६ ॥

औत्सः । इत्यपत्यादि विकारान्तार्थाः प्रत्ययाः ।

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् । ४ । १ । ८७ ॥

धान्यानां भवन इत्यतः प्रागर्थेभ्याभ्यामेतौ स्तः । स्त्रैणः । पौंस्नः ।

तस्यापत्यम् । ४ । १ । ९२ ॥

षष्ठ्यन्तात् कृतसम्बेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः ।

ओर्गुणः । ६ । ४ । १४६ ॥

उवर्णान्तस्य भस्य गुणस्तद्धिते । उपगोरपत्यमौपगवः । आश्वपतः । दैत्यः । औत्सः । स्त्रैणः । पौंस्नः ।

अपत्यं पौत्रप्रभृति गोत्रम् । ४ । १ । १६२॥

अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् ।

एको गोत्रे । ४ । १ । ९३ ॥

प्रत्ययः स्यात् । उपगोर्गोत्रापत्यमौपगवः ।

गर्गादिभ्यो यञ् । ४ । १ । १०५ ॥

गोत्रापत्ये । गर्गस्य गोत्रापत्यं गार्ग्यः । वात्स्यः ।

यञञोश्च । २ । ४ । ६४ ॥

गोत्रे यद्यञन्तमञन्तञ्च तदवयवयोरेतयोर्लुक् तत् कृते बहुत्वे न तु स्त्रियाम् । गर्गाः । वत्साः ।

जीवति तु वंश्ये युवा । ४ । १ । १६३ ॥

वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यात् ।

गोत्रादून्यस्त्रियाम् । ४ । १ । ९४ ॥

यून्यपत्ये गोत्रप्रत्ययान्तादेव प्रत्ययः स्यात् स्त्रियान्तु न युवसंज्ञा ।

यञिञोश्च । ४ । १ । १०१ ॥

गोत्रे यौ यञिञौ तदन्तात् फक् ।

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् । ७ । १ । २ ॥

प्रत्ययादेः फस्य आयन् ढस्येय् खस्य ईन् छस्य ईय् घस्य इय् एते स्युः । गर्गस्य युवापत्यं गार्ग्यायणः । दाक्षायणः ।

अत इञ् । ४ । १ । ९५ ॥

अपत्येऽर्थे । दाक्षिः ।

बाह्वादिभ्यश्च । ४ । १ । ९६ ॥

बाह्विः । औडुलोमिः । आकृतिगणोऽयम् ।

अनृष्यानन्तर्ये विदादिभ्योऽञ् । ४ । १ । १० ४॥

ये त्वत्रानृषयस्तेभ्योऽपत्येऽन्यत्र तु गोत्रे । विदस्य गोत्रं वैदः । वैदौ । वैदाः । पुत्रस्यापत्यं पौत्रः । पौत्रौ । पौत्राः । एवं दौहित्रादयः ।

शिवादिभ्योऽण् । ४ । १ । ११२ ॥

अपत्ये । शैवः । गाङ्गः ।

ऋष्यन्धकवृष्णिकुरुभ्यश्च । ४ । १ । ११४ ॥

ऋषिभ्यः । वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः । श्वाफल्कः । वृष्णिभ्यः । वासुदेवः । कुरुभ्यः । नाकुलः । साहदेवः ।

मातुरुत्संख्यासंभद्रपूर्वायाः । ४ । १ । ११५॥

सख्यादिपूर्वस्य मातृशब्दस्य उदादेशः स्यादण्प्रत्ययश्च । द्वैमातुरः । षाण्मातुरः । सांमातुरः । भाद्रमातुरः ।

स्त्रीभ्यो ढक् । ४ । १ । १२० ॥

स्त्रीप्रत्ययान्तेभ्यो ढक् । वैनतेयः ।

कन्यायाः कनीन च । ४ । १ । ११६ ॥

चादण् । कानीनो व्यासः कर्णश्च ।

राजश्वशुराद्यत् । ४ । १ । १३७ ॥

राज्ञो जातावेव ।

ये चाभावकर्मणोः। ६। ४। १६८॥

यादौ तद्धितेऽन् प्रकृत्या स्यात्र तु भावकर्मणोः। राजन्यः। जातावेवेति किम्। राजनः।

अन्। ६। ४। १६७॥

अन् प्रकृत्यादि परे। राजनः। श्वशुर्यः।

क्षत्राद् घः। ४। १। १३८॥

क्षत्रियः। जातावित्येव। क्षात्रिरन्यः।

रेवत्यादिभ्यष्ठक्। ४। १। १४६॥

ठस्येकः। ७। ३। ५०॥

अङ्गात्परस्य ठस्येकादेशः। रैवतिकः।

जनपदशब्दात् क्षत्रियादञ्। ४। १। १६८॥

जनपदक्षत्रियवाचकाच्छब्दादञ् स्यात् अपत्ये। पाञ्चालः।

क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्। पञ्चालानां राजा पाञ्चालः।

पुरोरण्। पौरवः।

पाण्डोर्ढ्यण्। पाण्ड्यः।

कुरुनादिभ्यो ण्यः। ४। १। १७२॥

कौरव्यः। नैषध्यः।

ते तद्राजाः। ४। १। १७४॥

अञादयस्तद्राजसंज्ञाः स्युः।

तद्राजस्य बहुषु तेनैवास्त्रियाम्। २।४।६२॥

बहुष्वर्थेषु तद्राजस्य लुक् तत्कृते बहुत्वे न तु स्त्रियाम्। पञ्चालाः। इत्यादि।

कम्बोजाल्लुक् । ४ । १ । १७५ ॥

अस्मात्तद्राजस्य लुक् । कम्बोजः । कम्बोजौ । कम्बोजादिभ्य इति वक्तव्यम् । चोलः । शकः । केरलः । यवनः ।

इत्यपत्याधिकारः ।

तेन रक्तं रागात् । ४ । २ । १ ॥

अण् स्यात् । कषायेण रक्तं वस्त्रं काषायम् ।

नक्षत्रेण युक्तः कालः । ४ । २ । ३ ॥

अण् स्यात् ।

तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम् । पुष्येण युक्त पौषमहः ।

लुबविशेषे । ४ । २ । ४ ॥

पूर्वेण विहितस्य लुप् षष्टिदण्डात्मकस्य कालस्यावान्तर विशेषश्चेन्न गम्यते । अद्य पुष्यः ।

दृष्टं साम । ४ । २ । ७ ॥

तेनेत्येव । वसिष्ठेन दृष्टं वासिष्ठं साम ।

वामदेवाड् ड्यड्यौ । ४ । २ । ९ ॥

वामदेवेन दृष्टं साम वामदेव्यम् ।

परिवृतो रथः । ४ । २ । १० ॥

अस्मिन्नर्थेऽण्प्रत्ययो भवति । वस्त्रेण परिवृतो वास्त्रो रथः ।

तदोद्धृतममत्रेभ्यः । ४ । २ । १४ ॥

शरावे उद्धृतः शारावः ओदनः ।

संस्कृतं भक्षाः। ४। २। १६॥

सप्तम्यन्तादण् स्यात् संस्कृतेऽर्थे यत् संस्कृतं भक्षाश्चेत् ते स्युः। भ्राष्ट्रे षु संस्कृता भ्राष्ट्राः भक्षाः।

साऽस्य देवता। ४। २। २४॥

इन्द्रो देवता अस्येति ऐन्द्रं हविः। पाशुपतम्। वार्हस्पत्यम्।

शुक्राद् घन्। ४। २। २६॥

शुक्रियम्।

सोमाट् ष्यण्। ४। २। ३०॥

सौम्यम्।

वाय्वृतुपित्रुषसो यत्। ४। २। ३१॥

वायव्यम्। ऋतव्यम्।

रौङ् ऋतः। ७। ४। २७॥

अकृत्यकारे असार्वधातुके यकारे च्वौ च परे ऋतो रौङादेशः। यस्येति च। पित्र्यम्। उषस्यम्।

पितृव्यमातुलमातामहपितामहाः। ४। २। ३६॥

एते निपात्यन्ते। पितुर्भ्राता पितृव्यः। मातुर्भ्राता मातुलः। मातुः पिता मातामहः। पितुः पिता पितामहः।

तस्य समूहः। ४। २। ३७॥

काकानां समूहः काकम्।

भिक्षादिभ्योऽण्। ६। ४। १४६॥

भैक्षम्। गर्भिणीनां समूहो गार्भिणम्। इह भस्याढे तद्धित इति पुंवद्भावे कृते।

इनण्यनपत्ये । ४ । २ । ३७ ॥

अनपत्यार्थेऽणि इन्प्रकृत्या । तेन नस्तद्धित इति टिलोपो न । युवतीनां समूहो यौवतम् ।

ग्रामजनबन्धुभ्यस्तल् । ४ । २ । ४३ ॥

तलन्तं स्त्रियाम् । ग्रामता । जनता । बन्धुता ।

गजसहायाभ्यां चेति वक्तव्यम् । गजता । सहायता । अङ्क: स्व: क्रतौ । अङ्कीन: ।

अचित्तहस्तिधेनोष्ठक् । ४ । २ । ४७ ॥

इसुसुक्तान्तात्क: । ७ । ३ । ५१ ॥

इस् उस् उक् तान्तात्परस्य ठस्य क: । सात्तुकम् । हास्तिकम् । धैनुकम् ।

तदधीते तद्वेद । ४ । २ । ५९ ॥

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ।७।३।३॥

पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धि: किन्तु ताभ्यां पूर्वौ क्रमादैतौ आगमौ स्त: । व्याकरणमधीते वेद वा वैयाकरण: ।

क्रमादिभ्यो वुन् । ४ । २ । ६१ ॥

क्रमक: । पदक: । शिक्षक: । मीमांसक: ।

तदस्मिन्नस्तीति देशे तन्नाम्नि । ४ । २ । ६७ ॥

उदुम्बरा: सन्त्यस्मिन् देशे औदुम्बरो देश: ।

तेन निर्वृत्तम् । ४ । २ । ६८ ॥

कुशाम्बेन निर्वृत्ता नगरी कौशाम्बी ।

तस्य निवासः। ४। २। ६९॥

शिबीनां निवासो देशः शैवः।

अदूरभवश्च। ४। २। ७०॥

विदिशाया अदूरभवं वैदिशम्।

जनपदे लुप्। १। २। ५१॥

जनपदे वाच्ये चातुरर्थिकस्य लुप्।

लुपि युक्तवद्व्यक्तिवचने। १। २। ५१॥

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः। पञ्चालानां निवासो जनपदः पञ्चालाः। कुरवः। अङ्गाः। वङ्गाः। कलिङ्गाः।

वरणादिभ्यश्च। ४। २। ८२॥

अजनपदार्थ आरम्भः। वरणानामदूरभवं नगरं वरणाः।

कुमुदनडवेतसेभ्यो ड्मतुप्। ४। २। ८७॥

झयः। ८। २। १०॥

झयन्तान्मतोर्मस्य वः। कुमुद्वान् नड्वान्।

मादुपधायाश्च मतोर्वोऽयवादिभ्यः।८।२।९॥

मवर्णावर्णान्तान्मवर्णावर्णोपधाच्च यवादिवर्जितात् परस्य मतोर्मस्य वः। वेतस्वान्।

नडशादाड् ड्वलच्। ४। २। ८८॥

नड्वलः।

शिखाया वलच्। ४। २। ८९॥

शिखावलः।

इति चातुरर्थिकाः।

शेषे। ४। २। ९२॥

अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषस्तत्राणादयः स्युः। चक्षुषा गृह्यते चाक्षुषं रूपम्। श्रावणः शब्दः। औपनिषदः पुरुषः। दृषदि पिष्टा दार्षदाः सक्तवः। चतुर्भिरूह्यते चातुरं शकटम्। चतुर्दश्यां दृश्यते चातुर्दशं रक्षः। तस्य विकार इत्यतः प्राक्शेषाधिकारः।

राष्ट्रावारपाराद् घखौ। ४। २। ९३॥

राष्ट्रे जातादौ राष्ट्रियः। अवारपारीणः।

अवारपारादिगृहीतादपि विपरीताच्चेति वक्तव्यम्। अवारीणः। पारीणः। पारावारीणः। इह प्रकृतिविशेषात् घादयश्च्वुल्न्ता उच्यन्ते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते।

ग्रामाद्यखञौ। ४। २। ९४॥

ग्राम्यः। ग्रामीणः।

नद्यादिभ्यो ढक्। ४। २। ९७॥

नादेयम्। माहेयम्। वाराणसेयम्।

दक्षिणापश्चात्पुरसस्त्यक्। ४। २। ९८॥

दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः।

दिग्प्रागपागुदक्प्रतीचो यत्। ४। २। १०१॥

दिव्यम्। प्राच्यम्। अपाच्यम्। उदीच्यम्। प्रतीच्यम्।

अव्ययात्त्यप्। ४। २। १०४॥

अमेहकृतसित्रेभ्य एव। अमात्यः। इहत्यः। कृत्यः। ततस्त्यः। तत्रत्यः।

त्यव्नेभ्रुवे। नित्यः।

वृद्धिर्यस्याचामादिस्तद्वृद्धम्। १। १। ७३॥

यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात्।

त्यदादीनि च। १। १। ७४॥

वृद्धसंज्ञानि स्युः।

वृद्धाच्छः। ४। २। ११४॥

शालीयः। तदीयः।

वा नामधेयस्य। वृद्धसंज्ञा। देवदत्तीयः। दैवदत्तः।

गहादिभ्यश्च। ४। २। १३८॥

गह्यः।

युष्मदस्मदोरन्यतरस्यां खञ् च। ४। ३। १॥

चाच्छः। पक्षेऽण्। युवयोर्युष्माकं वायं युष्मदीयः। अस्मदीयः।

तस्मिन्नणि च युष्माकास्माकौ। ४। ३। २॥

युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः।

तवकममकावेकवचने। ४। ३। ३॥

एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अणि च। तावकीनः। तावकः। मामकीनः। मामकः। क्वेतु।

प्रत्ययोत्तरपदयोश्च। ७। २। ९८॥

मपर्यन्तयोरनयोरेकार्थवाचिनोस्त्वमौ स्तः प्रत्यये उत्तरपदे च परतः। त्वदीयः मदीयः। त्वत्पुत्रः। मत्पुत्रः।

मध्यान्मः । ४ । ३ । ८ ॥

मध्यमः ।

कालाट्ठञ् । ४ । ३ । ११ ॥

कालिकम् । मासिकम् । सांवत्सरिकम् ।

अव्ययानां भमात्रे टिलोपः । सायंप्रातिकः । पौनःपुनिकः ।

प्रावृष एण्यः । ४ । ३ । १७ ॥

प्रावृषेण्यः ।

सायंचिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च । ४ । ३ । २३ ॥

सायमित्यादिभ्यश्चतुर्भ्यः अव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तस्तयोस्तुट् च । सायन्तनम् । चिरन्तनम् । प्राह्णे प्रगेऽनयोरेदन्तत्वं निपात्यते । प्राह्णेतनम् । प्रगेतनम् । दोषातनम् ।

तत्र जातः । ४ । ३ । २५ ॥

सप्तमी समर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः । स्रुघ्ने जातः स्रौघ्नः । उत्से जातः औत्सः । राष्ट्रे जातः राष्ट्रियः । अवारपारे जातः अवारपारीणः । इत्यादि ।

प्रावृषष्ठप् । ४ । ३ । २६ ॥

एण्यापवादः । प्रावृषिकः ।

प्रायभवः । ४ । ३ । ३८ ॥

तत्रेत्येव । स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः ।

सम्भूते। ४। ३। ४१॥

सुघ्ने सम्भवति। स्रौघ्नः।

कोशाड्ढञ्। ४। ३। ४२॥

कौशेयं वस्त्रम्।

तत्र भवः। ४। ३। ५३॥

स्रौघ्नः औत्सः। राष्ट्रियः।

दिगादिभ्यो यत्। ४। ३। ५४॥

दिश्यम्। वर्ग्यम्।

शरीरावयवाच्च। ४। ३। ५५॥

दन्त्यम्। कण्ठ्यम्। अध्यात्मादेष्ठञिष्यते। अध्यात्मे भवमाध्यात्मिकम्।

अनुशतिकादीनाञ्च। ७। ३। २०॥

एषामुभयपदवृद्धिर्जिति णिति किति च। अधिदैविकम्। आधिभौतिकम्। ऐहलौकिकम्। आकृतिगणोऽयम्।

जिह्वामूलाङ्गुलेश्छः। ४। ३। ६२॥

जिह्वामूलीयम्। अङ्गुलीयम्।

वर्गान्ताच्च। ४। ३। ६३॥

कवर्गीयम्।

तत आगतः। ४। ३। ७४॥

सुघ्नादागतः। स्रौघ्नः।

ठगायस्थानेभ्यः। ४। ३। ७५॥

शुल्कशालायाम् आगतः। शौल्कशालिकः।

विद्यायोनिसम्बन्धेभ्यो वुञ् । ४ । ३ । ७७ ॥

औपाध्यायकः । पैतामहकः ।

हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः । ४ । ३ । ८१ ॥

समादागतं समरूप्यम् । पक्षे गहादित्वाच्छः । समीयम् । देवदत्तरूप्यम् । दैवदत्तम् ।

मयट् च । ४ । ३ । ८२ ॥

सममयम् । देवदत्तमयम् ।

प्रभवति । ४ । ३ । ८३ ॥

हिमवतः प्रभवति हैमवती गङ्गा ।

तद्गच्छति पथिदूतयोः । ४ । ३ । ८५ ॥

स्रुघ्नं सङ्गच्छति स्रौघ्नः । पन्था दूतो वा ।

अभिनिष्क्रामति द्वारम् । ४ । ३ । ८६ ॥

स्रुघ्नमभिनिष्क्रामति स्रौघ्नम् । कान्यकुब्जद्वारम् ।

अधिकृत्य कृते ग्रन्थे । ४ । ३ । ८७ ॥

शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः ।

सोऽस्य निवासः । ४ । ३ । ८९ ॥

स्रुघ्नोऽनिवासोऽस्य सौघ्नः ।

तेन प्रोक्तम् । ४ । ३ । १०१ ॥

पाणिनिना प्रोक्तं पाणिनीयम् ।

तस्येदम् । ४ । ३ । १२० ॥

उपगोरिदम् औपगवम् ।

इति शैषिकाः ।

तस्य विकारः। ४। ३। १३४॥

अश्मनो विकारे टिलोपः। अश्मनो विकारः आश्मः। भास्मनः। मार्त्तिकः।

अवयवे च प्राण्योषधिवृक्षेभ्यः। ४। ३। १३५॥

चाद्विकारे। मयूरस्यावयवो विकारो वा मायूरः। मौर्वम्। काण्डम्। भस्म वा। पैप्पलम्।

मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः।४।३।१४३॥

प्रकृतिमात्रान्मयड्वा स्यात् विकारावयवयोः अश्ममयम्। आश्मनम्। अभक्ष्येत्यादि किम्? मौद्गः सूपः। कार्पासमाच्छादनम्।

नित्यं वृद्धशरादिभ्यः। ४। ३। १४४॥

आस्त्रमयम्।

गोश्च पुरीषे। ४। ३। १४५॥

गोमयम्।

गोपयसोर्यत्। ४। ३। १६०॥

गव्यम्। पयस्यम्। इति प्राग्दीव्यतीयाः।

प्राग्वहतेष्ठक्। ४। ४। १॥

तद्वहतीत्यतः प्राक् ठगधिक्रियते।

तेन दीव्यति खनति जयति जितम्। ४।४।२॥

अक्षैर्दीव्यति खनति जयति जितं वा। आक्षिकम्।

संस्कृतम्। ४। ४। ३॥

दध्ना संस्कृतं दाधिकम्। मरिचिकम्।

तरति । ४ । ४ । ५ ॥

उडुपेन तरति औडुपिकः ।

चरति । ४ । ४ । ८ ॥

हस्तिना चरति हास्तिकः । दध्ना चरति दाधिकः ।

संसृष्टे । ४ । ४ । २२ ॥

दध्ना संसृष्टं दाधिकम् ।

उञ्छति । ४ । ४ । ३२ ॥

बदराण्युञ्छति बादरिकः ।

रक्षति । ४ । ४ । ३३ ॥

समाजं रक्षति सामाजिकः ।

शब्ददर्दुरं करोति । ४ । ४ । ३४ ॥

शब्दं करोति शाब्दिकः । दर्दुरं करोति दार्दुरिकः ।

धर्मं चरति । ४ । ४ । ४१ ॥

धार्मिकः । अधर्माच्चेति वक्तव्यम् । अधार्मिकः ।

शिल्पम् । ४ । ४ । ५५ ॥

मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः ।

प्रहरणम् । ४ । ४ । ५७ ॥

असिः प्रहरणमस्य आसिकः । धानुष्कः ।

शीलम् । ४ । ४ । ६१ ॥

अपूपभक्षणं शीलमस्य आपूपिकः ।

निकटे वसति । ४ । ४ । ७३ ॥

नैकटिको भिक्षुकः । इति ठगधिकारः ।

प्राग्घिताद्यत्। ४। ४। ७५॥

तस्मै हितमित्यतः प्राक् यदधिक्रियते।

तद्वहति रथयुगप्रासङ्गम्। ४। ४। ७६॥

रथं वहति रथ्यः। युग्यः। प्रासङ्गः।

धुरो यड्ढकौ। ४। ४। ७७॥

धुर्यः। धौरेयः।

नौवयोधर्म्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्य-प्राप्यवध्यानाम्यसमसमितसंमितेषु।४।४।९१॥

नावा तार्यम्। नाव्यं जलम्। वयसा तुल्यो वयसः। धर्म्मेण प्राप्यं धर्म्यम्। विषेण वध्यः विष्यः। मूलेन आनाय्यं मूल्यम्। मूलेन समो मूल्यः। सीतया समितं सीत्यं क्षेत्रम्। तुलया सम्मितं तुल्यम्।

तत्र साधुः। ४। ४। ९८॥

सामसु साधुः सामन्यः। कर्म्मण्यः। शरण्यः।

सभाया यः। ४। ४। १०५॥

सभ्यः।

इति यतोऽधिः।

प्राक् क्रीताच्छः। ५। १। १॥

तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते।

उगवादिभ्यो यत्। ५। १। २॥

उवर्णान्ताद्गवादिभ्यश्च यत्। छस्यापवादः। शङ्क्यं दारु। गव्यम्।

नाभि नभश्च । नभ्योऽग्निः । नभ्यमञ्जनम् ।

तस्मै हितम् । ५ । १ । ५ ॥

वत्सेभ्यो हितो वत्सीयो गोधुक् ।

शरीरावयवाद्यत् । ५ । १ । ६ ॥

दन्त्यम् । कण्ठ्यम् । नस्यम् ।

आत्मन् विश्वजनभोगोत्तरपदात् खः ।५।१।९॥

आत्माध्वानौ खे । ६ । ४ । १६९ ॥

एतौ खे प्रकृत्या स्तः । आत्मने हितम् आत्मनीनम् । विश्वजनीनम् । मात्रभोगीणः ।

इति छयतोः पूर्णोऽवधिः ।

प्राग्वतेष्ठञ् । ५ । १ । १८ ॥

तेन तुल्यमित्यतः प्राक् ठञधिक्रियते ।

तेन क्रीतम् । ५ । १ । ३७ ॥

सप्तत्या क्रीतं साप्ततिकम् । प्राष्टिकम् ।

तस्येश्वरः । ५ । १ । ४२ ॥

सर्वभूमिपृथिवीभ्यामणञौ स्तः । अनुशतिकादीनाञ्च । सर्वभूमेरीश्वरः सार्वभौमः । पार्थिवः ।

पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टि-सप्तत्यशीतिनवतिशतम् । ५ । १ । ५९ ॥

एते रूढ़शब्दा निपात्यन्ते ।

तदर्हति। ५। १। ६३॥

खेतच्छत्रमर्हति खैतच्छत्रिकः।

दण्डादिभ्यो यः। ५। १। ६६॥

एभ्यो यः। दण्डमर्हति दण्ड्यः। अर्घ्यः। वध्यः।

तेन निर्वृत्तम्। ५। १। ७९॥

अङ्का निर्वृत्तम् आङ्किकम्।

इति ठञोऽधिः।

तेन तुल्यं क्रिया चेद्वतिः। ५। १। ११५॥

ब्राह्मणेन तुल्यं ब्राह्मणवत् अधीते। क्रिया चेल्किम्? गुण-तुल्ये मा भूत्। पुत्रेण तुल्यः स्थूलः।

तत्र तस्येव। ५। १। ११६॥

मथुरायामिव मथुरावत्। स्रुघ्ने प्राकारः। चैत्रस्येव चैत्र-वन्मैत्रस्य गावः।

तस्य भावस्त्वतलौ। ५। १। ११९॥

प्रकृतिजन्यबोधे प्रकारो भावः। गोर्भावो गोत्वम्। त्वान्त क्लीवम्।

आ च त्वात्। ५। १। १२०॥

ब्राह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते। अपवादैः सह समावेशार्थमिदम्। चकारो नञ् स्नञ् भ्यामपि समा-वेशार्थः। स्त्रिया भावः स्त्रैणम्। स्त्रीत्वम्। स्त्रीता। पौंस्नम्। पुंस्त्वम्। पुंस्ता।

पृथ्वादिभ्य इमनिज्वा। ५। १। १२२॥

वा वचनमणादिसमावेशार्थम्।

र ऋतो हलादेर्लघोः। ६। ४। १६१॥

इष्ठे मेयःसु।

टेः। ६। ४। १५५॥

टेर्लोप इष्ठेमेयस्सु। पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम्। पृथोर्भावः प्रथिमा। पार्थवम्। भ्रदिमा। मार्दवम्।

वर्णदृढादिभ्यः ष्यञ् च। ५। १। १२३॥

चादिमनिच्। शौक्ल्यम्। शुक्लिमा। दार्ढ्यम्। द्रढिमा।

गुणवचनब्राह्मणादिभ्यः कर्मणि च।५।१।१२४॥

चाड्ढावे। जडस्य भावः। कर्म्म वा जाड्यम्। मौढ्यम्। ब्राह्मण्यम्। आकृतिगणोऽयम्।

सख्युर्यः। ५। १। १२६॥

सख्यम्।

कपिज्ञात्योर्ढक्। ५। १। १२७॥

कापेयम्। ज्ञातेयम्।

पत्यन्तपुरोहितादिभ्यो यक्। ५। १। १२८॥

सैनापत्यम्। पौरोहित्यम्।

इति नञ्स्नञोरधिकारः।

धान्यानां भवने क्षेत्रे खञ्। ५। २। १॥

व्रीहीणां भवनं क्षेत्रं व्रैहीनम्।

व्रीहिशाल्योर्ढक्। ५। २। २॥

व्रैहेयम्। शालेयम्।

हैयङ्गवीनं संज्ञायाम्। ५। २। २३॥

नवनीते निपातितोऽयम्।

तदस्य सञ्जातं तारकादिभ्य इतच्। ५।२।३६॥

तारकाः सञ्जाता अस्य तारकितं नभः। पण्डितः। आकृतिगणोऽयम्।

प्रमाणे द्वयसज्दघ्नञ् मात्रचः। ५। २। ३७॥

ऊरू प्रमाणमस्य ऊरुद्वयसम्। ऊरुदघ्नम्। ऊरुमात्रम्।

यत्तदेतेभ्यः परिमाणे वतुप्। ५। २। ३९॥

यत्परिमाणमस्य। यावान्। तावान्। एतावान्।

संख्याया अवयवे तयप्। ५। २। ४२॥

पञ्चावयवा अस्य पञ्चतयम् दारु।

द्वित्रिभ्यां तयस्यायज्वा। ५। २। ४३॥

द्वयम्। द्वितयम्। त्रयम्। त्रितयम्।

उभादुदात्तो नित्यम्। ५। २। ४४॥

उभशब्दात् तयपोऽयच् स्यात्। स च आद्युदात्तः। उभयम्।

तस्य पूरणे डट्। ५। २। ४८॥

एकादशानां पूरणः एकादशः।

नान्तादसंख्यादेर्मट्। ५। २। ४९॥

डटो मडागमः स्यात्। पञ्चानां पूरणः पञ्चमः। नान्तात् किम्? विंशः। असंख्यादेः किम्? एकादशः।

ति विंशतेर्डिति । ६ । ४ । १४२ ॥

विंशतेर्भस्य तिशब्दस्य लोपः स्यात् डिति परे । आसन्नविंशाः ।

षट् कतिकतिपयचतुरां थुक् । ५ । २ ।५१॥

एषां थुगागमः स्यात् डटि । षष्णां पूरणः षष्ठः । कतिथः । कतिपयशब्दस्य असंख्यात्वेऽपि अत एव ज्ञापकात् डट् । कतिपयथः । चतुर्थः ।

द्वे स्तीयः । ५ । २ । ५४ ॥

डटोऽपवादः द्वयोः पूरणो द्वितीयः ।

त्रेः सम्प्रसारणं च । ५ । २ । ५५ ॥

तृतीयः ।

श्रोत्रियश्छन्दोऽधीते । ५ । २ । ८४ ॥

श्रोत्रियः । वेत्यनुवृत्तेश्छान्दसः ।

पूर्वादिनिः । ५ । २ । ८६ ॥

पूर्वं ज्ञातमनेन पूर्वी ।

सपूर्वाच्च । ५ । २ । । ८७ ॥

कृतपूर्वी ।

इष्टादिभ्यश्च । ५ । २ । ८८ ॥

इष्टमनेन इष्टी । अधीती ।

तदस्यास्त्यस्मिन्निति मतुप् । ५ । २ । ९४ ॥

गावोऽस्यास्मिन् वा सन्ति गोमान् ।

तसौ मत्वर्थे । १ । ४ । १९ ॥

तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे । वसोः सम्प्रसारणम् । विदुषान् ।

गुणवचनेभ्यो मतुपो लुगिष्टः। शुक्लो गुणोऽस्यास्तीति शुक्लः पटः। कृष्णः।

प्राणिस्थादातो लजन्यतरस्याम् ।५।२।९९ ॥

चूड़ालः। चूड़ावान्। प्राणिस्थात् किम्?। शिखावान् दीपः। प्राख्यङ्गादेव नेह। मेधावान्।

लोमादिपामादिपिच्छादिभ्यः शनेलचः

। ५ । २ । १०० ॥

लोमादिभ्यः शः। लोमशः। लोमवान्। पामादिभ्यो नः। पामनः।

अङ्गात् कल्याणे। अङ्गना।

लक्ष्मा अच्च। लक्ष्मणः। पिच्छादिभ्य इलच्। पिच्छिलः।

दन्त उन्नत उरच् । ५ । २ । १०९ ॥

उन्नता दन्ता सन्ति अस्य दन्तुरः।

केशाद्वोऽन्यतरस्याम् । ५ । २ । १०९ ॥

केशवः। केशवान्।

अन्येभ्योऽपि दृश्यते। मणिवः।

अर्णसो लोपश्च। अर्णवः।

अत इनिठनौ । ५ । २ । ११५ ॥

दण्डी। दण्डिकः।

व्रीह्यादिभ्यश्च । ५ । २ । ११६ ॥

व्रीही। व्रीहिकः।

अस्मायामेधास्रजो विनिः । ५ । २ । १२१ ॥

यशस्वी। यशस्वान्। मायावी। मेधावी। स्रग्वी।

वाचो ग्मिनिः । ५ । २ । १२४ ॥

वाग्मी ।

अर्श आदिभ्योऽच् । ५ । २ । १२७ ॥

अर्शो विद्यते अस्य अर्शसः । आकृतिगणोऽयम् ।

इति मत्वर्थीयः ।

प्राग्दिशो विभक्तिः । ५ । ३ । १ ॥

दिक्शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः । अथ स्वार्थिकाः प्रत्ययाः ।

किं सर्वनामबहुभ्योऽद्व्यादिभ्यः । ५ । ३ । २ ॥

किमः सर्वनाम्नो बहुशब्दाच्च प्राग्दिशोऽधिक्रियते ।

पञ्चम्यास्तसिल् । ५ । ३ । ७ ॥

पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल् वा स्यात् ।

कु तिहोः । ७ । २ । १०४ ॥

किमः कुः स्यात् तादौ हादौ च विभक्तौ परतः । कुतः । कस्मात् ।

इदम इश् । ५ । ३ । २ ॥

प्राग्दिशीये परे । इतः ।

एतदोऽन् । ५ । ३ । ५ ॥

प्राग्दिशीये । अनेकाल् त्वात् सर्वादेशः । अतः । अमुतः । यतः । ततः । बहुतः । द्व्यादेस्तु । द्वाभ्याम् ।

पर्यभिभ्याञ्च । ५ । ३ । ९ ॥

आभ्यां तसिल् स्यात् । परितः । सर्वत इत्यर्थः । अभितः । उभयत इत्यर्थः ।

सप्तम्यास्त्रल्। ५। ३। १०॥

कुत्र। यत्र। तत्र। बहुत्र।

इदमो हः। ५। ३। ११॥

त्रलोऽपवादः। इह।

किमोऽत्। ५। ३। १२॥

सप्तम्यन्तात् किमोऽत् वा स्यात्।

क्वाति। ७। २। १०५॥

किमः क्वादेशः स्यात् अति। कुत्र।

इतराभ्योऽपि दृश्यन्ते। ५। ३। १४॥

पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते दृशिग्रहणाङ्गवदादियोग एव। स भवान्। ततो भवान्। तत्र भवान्। ततो भवन्तम्। तत्र भवन्तम्। एवं दीर्घायुः। देवानां प्रियः। आयुष्मान्।

सर्वैकान्यकिं यत्तदः काले दा। ५।३।१५॥

सप्तम्यन्तेभ्य कालार्थेभ्यः स्वार्थे दा स्यात्।

सर्वस्य सोऽन्यतरस्यां दि। ५। ३। ६॥

दादौ प्राग्दिशीये सर्वस्य सो वा स्यात्। सर्वस्मिन् काले सदा। सर्वदा। अन्यदा। कदा। यदा। तदा। काले किम्। सर्वत्र देशे।

इदमोर्हिल्। ५। ३। १६॥

सप्तम्यन्तात्।

एतेतौ रथोः। ५। ३। ४॥

इदम् एत इत् एतौ स्तोरेफादौ थकारादौ च प्राग्दिशीये परे। अस्मिन् काले एतर्हि। काले किम्। इह देशे।

अनद्यतनेर्हिलन्यतरस्याम्। ५। ३। २१॥

कर्हि। कदा। यर्हि। यदा। तर्हि। तदा।

एतदोऽन्। ५। ३। ५॥

एतदः एतेतौ स्तो रेफादौ थादौ च प्राग्दिशीये। एतस्मिन् काले एतर्हि।

प्रकारवचने थाल्। ५। ३। २३॥

प्रकारवृत्तिभ्यः किमादिभ्यः थाल् स्यात् स्वार्थे। तेन प्रकारेण तथा।

इदमस्थमुः। ५। ३। २४॥

थालोऽपवादः। एतदोऽपि वाच्यः। अनेन एतेन वा प्रकारेण इत्थम्।

किमश्च। ५। ३। २५॥

केन प्रकारेण कथम्।

इति प्राग्दिशीयाः।

अतिशायने तमबिष्ठनौ। ५। ३। ५५॥

अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अयमेषामतिशयेनाढ्यः आढ्यतमः। लघुतमः लघिष्ठः।

तिङश्च। ५। ३। ५६॥

तिङन्तादतिशये द्योत्ये तमप् स्यात्।

तरप्तमपौ घः। १। १। २२॥

किमेत्तिङव्ययघादाम्बद्रव्यप्रकर्षे। ५। ४। ११॥

किम् एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यात्। न तु द्रव्यप्रकर्षे। किंतमाम्। पचतितमाम्। उच्चैस्तमाम्। द्रव्यप्रकर्षे तु। उच्चैस्तमस्तरुः।

द्विवचनविभज्योपपदे तरबीयसुनौ ।५।३।५७॥

द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः। पूर्वयोरपवादः। अयमनयोरतिशयेन लघुर्लघुतरः। लघीयान्। उदीच्याः। प्राच्येभ्यः पटुतराः पटीयांसः।

प्रशस्यस्य श्रः। ५। ३। ६०॥

इष्ठेयसोः परतः।

प्रकृत्यैकाच्। ६। ४। १६३॥

इष्ठादावेकाच् प्रकृत्या स्यात्। श्रेयान्।

ज्य च। ५। ३। ६१॥

प्रशस्यस्य ज्यादेशः स्यात् इष्ठेयसोः। ज्येष्ठः।

ज्यादादीयसः। ६। ४। १६०॥

आदेः परस्य। ज्यायान्।

बहोर्लोपो भू च बहोः। ६। ४। १५८॥

बहोः परयोरिमेयसोर्लोपः स्यात् बहोश्च भूरादेशः। भूमा।

इष्ठस्य यिट् च। ६। ४। १५९॥

बहोः परस्य इष्ठस्य लोपः स्याद्यिड़ागमश्च। भूयिष्ठः।

विन्मतोर्लुक् । ५ । ३ । ६५ ॥

विनो मतुपश्च लुक् स्यात् इष्ठेयसोः । अतिशयेन स्रग्वीये स्रजिष्ठः । स्रजीयान् । अतिशयेन त्वग्वान् त्वचिष्ठः । त्वचीयान्

ईषदसमाप्तौ कल्पदेश्यदेशीयरः । ५ । ३ । ६७ ॥

ईषदूनो विद्वान् विद्वत्कल्पः । विद्वद्देश्यः । विद्वद्देशीयः । पचतिकल्पम् ।

विभाषा सुपो बहुच् पुरस्तात् तु । ५ । ३ । ६८॥

ईषदूनः पटुः बहुपटुः । पटुकल्पः । सुपः किम् । पचतिकल्पम् ।

प्रागिवात् कः । ५ । ३ । ७० ॥

इवे प्रतिकृतावित्यतः प्राक् काधिकारः ।

अव्ययसर्वनाम्नामकच् प्राक् टेः । ५ । ३ । ७१ ॥

कापवादः ।

अङ्गाते । ५ । ३ । ७३ ॥

कस्यायमश्वोऽश्वकः । उच्चकैः । नीचकैः । सर्वकैः ।

कुत्सिते । ५ । ३ । ७४ ॥

कुत्सितोऽश्वोऽश्वकः ।

किं यत्तदोर्निर्धारणे द्वयोरेकस्य डतरच् ।५।३।९२॥

अनयोः कतरो वैष्णवः । यतरः ततरः ।

वा बहूनां जातिपरिप्रश्ने डतरच् । ५ । ३ । ९३॥

बहूनां मध्ये एकस्य निर्द्धारणे उतमच् वा स्यात् । जातिपरिप्रश्न इति प्रत्याख्यातमाकरे । कतमो भवतां कठः । यतमः । ततमः । वा ग्रहणमकजर्थम् यकः । सकः ।

इति प्रागिवीयाः ।

ईवे प्रतिकृतौ। ५। ३। ९६॥

कन् स्यात्। अश्व इव प्रतिकृतिः। अश्वकः। सर्वप्रातिपदिकेभ्यः स्वार्थे कन्। अश्वकः।

तत्प्रकृतवचने मयट्। ५। ४। २१॥

प्राचुर्येण प्रस्तुतं प्रकृतन्तस्य वचनं प्रतिपादनम्। भावे अधिकरणे वा ल्युट्। आद्ये प्रकृतमन्नमन्नमयम्। अपूपमयम्। द्वितीये तु। अन्नमयो यज्ञः। अपूपमयं पर्व।

प्रज्ञादिभ्यश्च। ५। ४। ३८॥

अण् स्यात्। प्रज्ञ एव प्राज्ञः। दैवतः।

बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्। ५।४।४२॥

बह्वनि ददाति बहुशः। अल्पशः। आद्यादिभ्यस्तसेरूपसंख्यानम्। आदौ आदितः। मध्यतः। अन्ततः पृष्ठतः। पार्श्वतः। आकृतिगणोऽम्। स्वरेण स्वरतः। वर्णतः।

कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः। ५। ४। ५०॥

अभूततद्भाव इति वक्तव्यम्। विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्त्तमानादिकारशब्दात् स्वार्थे च्विर्वा स्यात् करोत्यादिभिर्योगे।

अस्य च्वौ। ७। ४। ३२॥

अवर्णस्य ईत् स्यात् च्वौ। अकृष्णः कृष्णः सम्पद्यते तत्करोति कृष्णीकरोति। ब्रह्मीभवति। गङ्गीस्यात्।

अव्ययस्य च्वावीत्वं नेति वाच्यम्। दोषाभूतमहः। दिवाभूता रात्रिः।

विभाषा सातिः कार्त्स्न्ये। ५। ४। ५२॥

च्विविषये सातिर्वा स्यात् साकल्ये।

सात्पदाद्योः। ८। ३। १११॥

सस्य षत्वं न। दधि सिञ्चति। क्रत्वं श्रस्तमग्निः सम्पद्यतेऽग्निसाङ्गवति।

चौ च। ७। ४। २६॥

दीर्घः स्यात्। अग्नीभवति।

अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ ड्राच्॥ ५। ४। ५७॥

द्व्यजवरं न्यूनं न तु ततो न्यूनं अनेकाजिति यावत्ताट्टशमर्धं यस्य तस्मात् ड्राच् स्यात् क्रुभ्वस्तिभिर्योगे।

डाचि बहुलं हे भवतः। इति डाचि विवक्षिते द्वित्वम्।

नित्यमाम्रेड़िते डाचीति वक्तव्यम्। डाच् परं यदाम्रेड़ितं तस्मिन् परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति तकारपकारयोः पकारः। पटपटाकरोति। अव्यक्तानुकरणात् किम्। दृषत्करोति। द्व्यजवरार्धात् किम्। अत्करोति। अवरेति किम्। खरटखरटाकरोति। अनितौ किम्। पटिति करोति।

इति तद्धिताः।

अथ स्त्रीप्रत्ययाः।

अजाद्यतष्टाप्। ४। १। ४॥

अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्। अजा। एड़का। अश्वा। चटका। मूषिका। बाला। वत्सा। होडा। मन्दा। विलाता। मेधा। इत्यादि। गङ्गा। सर्वा।

उगितश्च। ४। १। ६॥

उगिदन्तात् प्रातिपदिकात् ङीप्। भवन्ती। पचन्ती।

टिड्ढाणञ् द्वयसज् दघ्नञ्मात्रच्तयप्ठक्ठञ् कञ्क्वरपः। ४। १। १५॥

अनुपसर्जनम् यट्टिदादि तदन्तं यददन्तं ततः स्त्रियः ङीप्। कुरुचरी। नदट्। नदी। देवट्। देवी। सौपर्णेयी। ऐन्द्री। औत्सी। जरुद्वयसी। जरुदघ्नी। जरुमात्री। पञ्चतयी। आक्षिकी। प्राक्षिकी। लावणिकी। यादृशी। इत्वरी।

नञ् स्नञौकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्। स्त्रैणी। पौंस्नी। शाक्तीकी। आढ्यङ्करणी। तरुणी। तलुनी।

यञश्च। ४। १। १६॥

यञन्तात् ङीप्। अकारलोपे कृते।

हलस्तद्धितस्य। ६। ४। १५०॥

हलः परस्य तद्धितयकारस्य लोप ईति परे। गार्गी।

प्राचां ष्फस्तद्धितः। ४। १। १७॥

यञन्तात् ष्फो वा स्यात् स च तद्धितः।

षिद्गौरादिभ्यश्च। ४। १। ४१॥

ङीष् स्यात्। गार्ग्यायणी। नर्त्तकी। गौरी। अनड्वही। अनड्वाही आकृतिगणोऽयम्।

वयसि प्रथमे। ४। १। २०

प्रथमवयो वाचिनोऽदन्तात् ङीप्। कुमारी।

द्विगोः । ४ । १ । ४१ ॥

अदन्ताद् द्विगोर्ङीप् । त्रिलोकी । अजादित्वात्टिलोपः । त्रयनीका ।

वर्णादनुदात्तात्तोपधात्तो नः । ४ । १ । ३९॥

वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनाद्वा ङीप् तकारस्य नः । एता एनी । रोहिता । रोहिणी ।

वोतो गुणवचनात् । ४ । १ । ४४ ॥

उदन्ताद्गुणवाचिनो वा ङीप् । मृद्वी । मृदुः ।

वह्वादिभ्यश्च । ४ । १ । ४५ ॥

वा ङीष् । बह्वी । बहुः ।

क्षुद्रिकाराटक्षिनः । राट्वी । राट्रिः ।

सर्वतोऽक्षिभ्यर्थादित्येके । शकटी । शकटिः ।

पुंयोगादाख्यायाम् । ४ । १ । ४८ ॥

या पुमाख्या पुंयोगात् स्त्रियां वर्त्तते ततो ङीष् स्यात् । गोपस्य स्त्री गोपी ।

पालकान्तान्न । गोपालिका । अश्वपालिका ।

प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ।७।३।४४॥

प्रत्ययस्थात् कात् पूर्वस्याकारस्येकारः स्यात् आपि परे स आप् सुपः परो न चेत् । सर्विका । कारिका । अतः किम् । नौका । प्रत्ययस्थात् किम् । शक्नोतीति शका । असुपः किम् । बहुपरिव्राजका नगरी ।

सूर्यादेवतायां चाप् । सूर्यस्य स्त्री देवता सूर्या । देवतायां किम् ।

सूर्यागस्त्ययोश्छे च ङ्याच्च यलोपः । शूरी । कुन्ती ।

इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्य्याणामानुक्। ४। १। ४९॥

ङीष् च। इन्द्रस्य स्त्री इन्द्राणी। वरुणानी। भवानी। शर्वाणी। रुद्राणी। मृडानी।

हिमारण्ययोर्महत्वे। महद्धिमं हिमानी। महदरण्यम् अरण्यानी।

यवाद्दोषे। दुष्टो यवो यवानी।

यवनाल्लिप्याम् यवनानां लिपिर्यवनानी।

मातुलोपाध्याययोरानुग्वा। मातुलानी। मातुली। उपाध्यायानी। उपाध्यायी।

आचार्य्यादणत्वञ्च। आचार्य्यानी।

अर्यक्षत्रियाभ्यां वा स्वार्थे। अर्याणी। अर्या। क्षत्रियाणी। क्षत्रिया।

क्रीतात् करणपूर्वात्। ४। १। ५०॥

ङीष्। वस्त्रक्रीती। क्वचिन्न। धनक्रीता।

स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्। ४। १। ५४॥

असंयोगोपधमुपसर्जनं यत् स्वाङ्गं तदन्तात् ङीष् वा। केशानतिक्रान्ता अतिकेशी। अतिकेशा। चन्द्रमुखी। चन्द्रमुखा। असंयोगोपधात् किम्। सुगुल्फा। उपसर्जनात् किम्। सुशिखा।

न क्रोडादिबह्वचः। ४। १। ५६॥

क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष्। कल्याणक्रोडा। आकृतिगणोऽयम्। सुजघना।

नखमुखात् संज्ञायाम्। ४। १। ५८

न ङीष्। फला।

पूर्वपदात् संज्ञायामगः। ८। ४। ३॥

पूर्वपदस्थान्निमित्तात् परस्य नस्य णः स्यात् संज्ञायां न तु गकारव्यवधाने। शूर्पणखा। गौरमुखा। संज्ञायां किम्। ताम्रमुखी कन्या।

जातेरस्त्रीविषयादयोपधात्। ४। १। ६३॥

जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततो ङीष्। नटी। वृषली। कठी। बह्वृची जातेः किम्। मुण्डा। अस्त्रीविषयात् किम्। बलाका। अयोपधात् किम्। क्षत्रिया।

योपधप्रतिषेधे गवयहयमुकयमत्स्यमनुष्याणामप्रतिषेधः। गवयी। हयी। मुकयी। हलस्तद्धितस्येति यलोपः। मनुषी। मत्स्यस्य ह्यां यलोपः। मत्सी।

ङ्तो मनुष्यजातेः। ४। १। ६५॥

ङीष्। दाक्षी।

ऊङुतः। ४। १। ६६॥

उदन्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ्। कुरुः। अयोपधात् किम्। अध्वर्युर्ब्राह्मणी।

पङ्गोश्च। पङ्गूः।

श्वशुरश्योकाराकारलोपश्च। श्वश्रूः।

ऊरूत्तरपदादौपम्ये। ४। १। ६८॥

उपमानवाचिपूर्वपदमूरुत्तरपदं यत्प्रातिपदिकं तस्मादूङ्। करभोरूः।

संहितशफलक्षणवामादेश्च । ४ । १ । ७० ॥

अनौपम्यार्थं सूत्रम् । संहितोरूः । शफोरूः । लक्षणोरूः । वामोरूः ।

शार्ङ्गरवाद्यञो ङीन् । ४ । १ । ७३ ॥

शार्ङ्गरवादेरञोऽकारस्तदन्ताच्च जातिवाचिनो ङीन् । शार्ङ्गरवी । वैदी । ब्राह्मणी ।

नृनरयोर्वृद्धिश्च । नारी ।

यूनस्तिः । ४ । १ । ७७ ॥

युवन् शब्दात् स्त्रियां तिः स्यात् । युवतिः ।

इति स्त्रीप्रत्ययाः ।

शास्त्रान्तरे प्रविष्टानां बालानाञ्चोपकारिका ।
कृता वरदराजेन लघुसिद्धान्तकौमुदी ॥ १ ॥

इति श्रीवरदराजकृता लघुसिद्धान्तकौमुदी समाप्ता ।

इति लघुकौमुदी समाप्ता ।

प्रकाशक—श्रीजीवानन्द विद्यासागर बि, ए,
२ नं रमानाथ मजूमदारेर ष्ट्रीट्, कलिकाता ।

प्रिण्टार—श्रीगोवर्द्धन पान,
४७ नं तुलापटी, बड़बाजार, कलिकाता ।